सिंघी जैन ग्रन्थमाला

[ग्रन्थांक ३२]

संस्थापक

स्व० श्रीमद् बहादुर सिंहजी सिंघी

संरक्षक

श्री राजेन्द्र सिंह सिंघी तथा श्री नरेन्द्र सिंह सिंघी

*

प्रधान सम्पादक तथा संचालक

आचार्य जिनविजय मुनि

महामात्य - वस्तुपाल - कीर्तिकीर्तनस्वरूप - काव्यद्वय

सोमेश्वरदेव - कवि - विरचित

कीर्तिकौमुदी

तथा

अरिसिंह कवि - कृत

सुकृतसंकीर्तन

संपादनकर्ता

आगमप्रभाकर - मुनिप्रवर श्री पुण्यविजय सूरि

[प्रकाशनकर्ता]

सिंघी जैन शास्त्र शिक्षापीठ

भारतीय विद्या भवन, बम्बई. ७

वि. सं. २०१७] 卐 [मूल्य रू. ६/६०

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्वर्गवासी साधुचरित श्रीमान् डालचन्दजी सिंघी



बाबू श्री बहादुर सिंहजी सिंघीके पुण्यश्लोक पिता

जन्म-वि. सं. १९२१, मार्ग. वदि ६ 卐 स्वर्गवास-वि. सं. १९८४, पोष सुदि ६

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दानशील - साहित्यरसिक - संस्कृतिप्रिय

स्व० बाबू श्री बहादुर सिंहजी सिंघी

अजीमगंज-कलकत्ता

जन्म ता. २८-६-१८८५] [मृत्यु ता. ७-७-१९४४

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सिंघी जैन ग्रन्थ माला

[ग्रन्थांक ३२]

महामात्य - वस्तुपाल - कीर्तिकीर्तनस्वरूप - काव्यद्वय

महाकवि - सोमेश्वरदेव - विरचित

कीर्तिकौमुदी

तथा

कवि - अरिसिंह ठक्कुर - विरचित

सुकृतसंकीर्तन



SINGHI JAIN SERIES

[NUMBER 32]

Two panegyric and historical poems describing the good deeds of the great minister Vastupal of Gujarat.

I. KĪRTIKOUMUDĪ

By Mahakavi Somes'vara Deva

2. SUKRITASAMKĪRTANA

By Kavi Arisimha Thakkura

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कलकत्तानिवासी

साधुचरित-श्रेष्ठिवर्य **श्रीमद् डालचन्द्जी सिंघी** पुण्यस्मृतिनिमित्त

प्रतिष्ठापित एवं प्रकाशित

सिंघी जैन ग्रन्थमाला

[जैन आगमिक, दार्शनिक, साहित्यिक, ऐतिहासिक, वैज्ञानिक, कथात्मक - इत्यादि विविधविषयगुम्फित प्राकृत, संस्कृत, अपभ्रंश, प्राचीनगूर्जर, - राजस्थानी आदि नाना भाषानिबद्ध सार्वजनीन पुरातन वाङ्मय तथा नूतन संशोधनात्मक साहित्य प्रकाशिनी सर्वश्रेष्ठ जैन ग्रन्थावलि]

प्रतिष्ठाता

श्रीमद् - डालचन्दजी - सिंघीसत्पुत्र

स्व० दानशील - साहित्यरसिक - संस्कृतिप्रिय

श्रीमद् बहादुर सिंहजी सिंघी

प्रधान सम्पादक तथा संचालक

आचार्य जिनविजय मुनि

अधिष्ठाता, सिंघी जैन शास्त्र शिक्षापीठ

निवृत्त ऑनररि डायरेक्टर

भारतीय विद्या भवन, बम्बई

*

ऑनररी फाउंडर - डायरेक्टर

राजस्थान ओरिएण्टल रिसर्च इन्स्टीट्यूट, जोधपुर (राजस्थान)

ऑनररी मेंबर - जर्मन ओरिएण्टल सोसाईटी, जर्मनी; भाण्डारकर ओरिएण्टल रिसर्च इन्स्टीट्यूट, पूना (दक्षिण); गुजरात साहित्यसभा, अहमदाबाद (गुजरात); विश्वेश्वरानन्द वैदिक शोध प्रतिष्ठान, होसियारपुर (पञ्जाब) इत्यादि ।

*

संरक्षक

श्री राजेन्द्र सिंह सिंघी तथा श्री नरेन्द्र सिंह सिंघी

व्यवस्थापक

अधिष्ठाता, सिंघी जैन शास्त्र शिक्षापीठ

भारतीय विद्या भवन, बम्बई

प्रकाशक - ज. ह. दवे, ऑनररी डायरेक्टर, भारतीय विद्या भवन, बम्बई, नं. ७

मुद्रक - जयन्ती दलाल, वसन्त प्रिंटिंग प्रेस, घेलाभाईनी वाडी, घीकांटा, अहमदाबाद.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

महामात्य - वस्तुपाल - कीर्तिकीर्त्तनस्वरूप - काव्यद्वय

महाकवि - सोमेश्वरदेव - विरचित

कीर्तिकौमुदी

तथा

कवि - अरिसिंह ठक्कुर - विरचित

सुकृतसंकीर्तन

नम्र सूचन
इस ग्रन्थ के अभ्यास का कार्य पूर्ण होते ही नियत
समयावधि में शीघ्र वापस करने की कृपा करें.
जिससे अन्य वाचकगण इसका उपयोग कर सकें.

संपादनकर्ता

अनेकग्रन्थभाण्डागारोद्धारक – विविधदुर्लभ्यग्रन्थसंशोधक

जिनागमप्रकाशकारि - प्रतिष्ठानप्रवर्तक

आगमप्रभाकर - मुनिप्रवर श्री पुण्यविजय सूरि ।

प्रकाशनकर्ता

अधिष्ठाता, सिंघी जैन शास्त्र शिक्षापीठ

भारतीय विद्याभवन, बम्बई

विक्रमाब्द २०१७] प्रथमावृत्ति [खिस्ताब्द १९६१

ग्रन्थांक ३२] सर्वाधिकार सुरक्षित [मूल्य रु० ६/६०

Jain Education International For Private & Personal Use Only www.jainelibrary.org

SINGHI JAIN SERIES

अद्यावधि मुद्रितग्रन्थ नामावलि

१ मेरुतुङ्गाचार्यरचित **प्रबन्धचिन्तामणि** मूल संस्कृत ग्रन्थ.
२ **पुरातनप्रबन्धसंग्रह** बहुविध ऐतिह्यतथ्यपरिपूर्ण अनेक प्राचीन निबन्ध संचय.
३ राजशेखरसूरिरचित **प्रबन्धकोश.**
४ जिनप्रभसूरिकृत **विविधतीर्थकल्प.**
५ मेघविजयोपाध्यायकृत **देवानन्दमहाकाव्य.**
६ यशोविजयोपाध्यायकृत **जैनतर्कभाषा.**
७ हेमचन्द्राचार्यकृत **प्रमाणमीमांसा.**
८ भट्टाकलङ्कदेवकृत **अकलङ्कग्रन्थत्रयी.**
९ **प्रबन्धचिन्तामणि** – हिन्दी भाषांतर.
१० प्रभाचन्द्रसूरिरचित **प्रभावकचरित.**
११ सिद्धिचन्द्रोपाध्यायरचित **भानुचन्द्रगणिचरित.**
१२ यशोविजयोपाध्यायविरचित **ज्ञानबिन्दुप्रकरण.**
१३ हरिषेणाचार्यकृत **बृहत्कथाकोश.**
१४ **जैनपुस्तकप्रशस्तिसंग्रह, प्रथम भाग.**
१५ हरिभद्रसूरिविरचित **धूर्ताख्यान.** (प्राकृत)
१६ दुर्गदेवकृत **रिष्टसमुच्चय.** (प्राकृत)
१७ मेघविजयोपाध्यायकृत **दिग्विजयमहाकाव्य.**
१८ कवि अब्दुल रहमानकृत **सन्देशरासक.** (अपभ्रंश)
१९ भर्तृहरिकृत **शतकत्रयादि सुभाषितसंग्रह.**
२० शान्त्याचार्यकृत **न्यायावतारवार्तिक-वृत्ति.**
२१ कवि धाहिलरचित **पउमसिरीचरिउ.** (अप०)
२२ महेश्वरसूरिकृत **नाणपंचमीकहा.** (प्रा०)
२३ श्रीभद्रबाहुआचार्यकृत **भद्रबाहुसंहिता.**
२४ जिनेश्वरसूरिकृत **कथाकोषप्रकरण.** (प्रा०)
२५ उदयप्रभसूरिकृत **धर्माभ्युदयमहाकाव्य.**
२६ जयसिंहसूरिकृत **धर्मोपदेशमाला.** (प्रा०)
२७ कोऊहलविरचित **लीलावई कहा.** (प्रा०)
२८ **जिनदत्ताख्यानद्वय.** (प्रा०)
२९.३०.३१ स्वयंभूविरचित **पउमचरिउ.** भाग १. २. ३ (अप०)
३२ सिद्धिचन्द्रकृत **काव्यप्रकाशखण्डन.**
३३ दामोदरपण्डितकृत **उक्तिव्यक्तिप्रकरण.**
३४ भिन्नभिन्न विद्वत्कृत **कुमारपालचरित्रसंग्रह.**
३५ जिनपालोपाध्यायरचित **खरतरगच्छ बृहद्गुर्वावलि**
३६ उद्द्योतनसूरिकृत **कुवलयमाला कहा.** (प्रा०)
३७ गुणपालमुनिरचित **जंबुचरियं.** (प्रा०)
३८ पूर्वाचार्यविरचित **जयपायड-निमित्तशास्त्र.** (प्रा०)
३९ भोजनृपतिरचित **शृङ्गारमञ्जरी.** (संस्कृत कथा)
४० धनसारगणीकृत–**भर्तृहरिशतकत्रयटीका.**
४१ कौटल्यकृत **अर्थशास्त्र - सटीक.** (कतिपयअंश)
४२ **विज्ञप्तिलेखसंग्रह** विज्ञप्तिमहालेख - विज्ञप्तित्रिवेणी आदि अनेक विज्ञप्तिलेख समुच्चय.
४३ महेन्द्रसूरिकृत **नर्मदासुन्दरीकथा.** (प्रा०)
४४ हेमचन्द्राचार्यकृत–**छन्दोऽनुशासन.**
४५ वस्तुपालगुणवर्णनात्मक **काव्यद्वय** **कीर्तिकौमुदी** तथा **सुकृतसंकीर्तन**
४६ सुकृतकीर्तिकल्लोलिनी आदि वस्तुपालप्रशस्तिसंग्रह.
४७ जयसोमविरचित **मंत्रीकर्मचन्द्रवंशप्रबन्ध.**

Shri Bahadur Singh Singhi Memoirs

Dr. G. H. Bühler's Life of Hemachandrāchārya.

Translated from German by Dr. Manilal Patel, Ph. D.

1 **स्व. बाबू श्रीबहादुरसिंहजी सिंघी स्मृतिग्रन्थ** [भारतीयविद्या भाग ३] सन १९४५.
2 Late Babu Shri Bahadur Singhji Singhi Memorial Volume BHARATIYA VIDYA [Volume V] A. D. 1945.
3 Literary Circle of Mahāmātya Vastupāla and its Contribution to Sanskrit Literature. By Dr. Bhogilal J. Sandesara, M. A., Ph. D. (S.J.S.33.)
4–5 Studies in Indian Literary History. Two Volumes. By Prof. P. K. Gode, M. A. (S. J. S. No. 37–38.)

संप्रति मुद्र्यमाणग्रन्थनामावलि

१ **विविधगच्छीय पट्टावलिसंग्रह.**
२ **जैनपुस्तकप्रशस्तिसंग्रह, भाग २.**
३ गुणप्रभाचार्यकृत **विनयसूत्र.** (बौद्धशास्त्र)
४ रामचन्द्रकविरचित-**मल्लिकामकरन्दादिनाटकसंग्रह.**
५ तरुणप्रभाचार्यकृत **षडावश्यकबालावबोधवृत्ति.**
६ प्रद्युम्नसूरिकृत **मूलशुद्धिप्रकरण-सटीक.**
७ **कुवलयमाला कथा, भाग २**
८ सिंहतिलकसूरिरचित **मन्त्रराजरहस्य.**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विषयानुक्रम ।

प्रासङ्गिक – वक्तव्य

गूर्जरेश्वरपुरोहित महाकवि श्रीसोमेश्वरदेवविरचित कीर्ति-
कौमुदीमहाकाव्य : पृ० १ - ४२

(१) नगरवर्णनो नाम प्रथमः सर्गः । १–६
(२) नरेद्रवंशवर्णनो नाम द्वितीयः सर्गः । १–१२
(३) मन्त्रिप्रतिष्ठा नाम तृतीयः सर्गः । १३–१६
(४) दूतसमागमनो नाम चतुर्थः सर्गः । १७–२२
(५) युद्धवर्णनो नाम पञ्चमः सर्गः । २३–२५
(६) पुरप्रमोदवर्णनो नाम षष्ठः सर्गः । २६–२९
(७) चन्द्रोदयवर्णनो नाम सप्तमः सर्गः । ३०–३३
(८) परमार्थविचारो नाम अष्टमः सर्गः । ३४–३६
(९) यात्रासमागमनो नाम नवमः सर्गः । ३७–४२

प्रथम परिशिष्ट पृ० ४३–८८

(1) Kathavate's Introduction to the first edition of Kirtikaumudi 43–59
(2) Professor G. Bühler's critical study of the Sukritasamkirtana of Arisimha 60–82
(3) Introduction of the Sukritasamkirtana text of late Muniraj Shri Chaturvijayaji Maharaj 83–88

कीर्तिकौमुदी - सुकृतसंकीर्तनमहाकाव्यगत-विशिष्टनामानुक्रम । ८९–९२

द्वितीय परिशिष्ट –

महाकवि - अरिसिंहविरचित सुकृतसंकीर्तनमहाकाव्य । पृ० ९५–१३६

(१) चापोत्कटान्वयवर्णनो नाम प्रथमः सर्गः । ९६–९९
(२) चौलुक्यान्वयवर्णनो नाम द्वितीयः सर्गः । ९९–१०४
(३) मन्त्रिप्रकाशो नाम तृतीयः सर्गः । १०४–१०७
(४) धर्मोपदेशनो नाम चतुर्थः सर्गः । १०७–११०
(५) सङ्घप्रस्थानो नाम पञ्चमः सर्गः । १११–११४
(६) सूर्योदयवर्णनो नाम षष्ठः सर्गः । ११५–११७
(७) शत्रुञ्जयदर्शनो नाम सप्तमः सर्गः । ११८–१२१
(९) षड्ऋतुवर्णनो नाम नवमः सर्गः । १२५–१२९
(१०) पुरप्रवेशो नाम दशमः सर्गः । १२९–१३३
(११) [illegible]कीर्तनकीर्त्तनो नामैकादशः सर्गः । १३३–१३६

कीर्तिकौमुदीमहाकाव्यस्थश्लोकानामकारादिक्रमेणानुक्रमः । १३७–१४७
सुकृतसंकीर्तनमहाकाव्यस्थश्लोकानामकारादिक्रमेणानुक्रमः । १४८–१५६

Jain Education International For Private & Personal Use Only www.jainelibrary.org

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रासंगिक वक्तव्य

*

गूर्जर महामात्य वस्तुपालकी कीर्तिको काव्यबद्ध करनेका जिन कवियोंने प्रयत्न किया है उनमें राजपुरोहित कवि सोमेश्वर और ठक्कुर अरिसिंह मुख्य हैं। कवि सोमेश्वरने कीर्तिकौमुदी नामक काव्य रच कर और अरिसिंहने सुकृतसंकीर्तन काव्य बना कर, वस्तुपालकी यशःकीर्तिको युगान्त तक स्थिर रखनेका सत्प्रयत्न किया है।

कीर्तिकौमुदी काव्यका कर्ता कवि सोमेश्वर सुप्रसिद्ध व्यक्ति है। वह वस्तुपालका अनन्य मित्र और राजपुरोहित था। वस्तुपालके गुणोंका वह बहुत अनुरागी और प्रशंसक था। वस्तुपालकी युद्धवीरता और दानवीरता का वह प्रत्यक्ष साक्षी था, इसलिये उसके काव्यकी गुणवत्ताका महत्त्व बहुत है। कविता की दृष्टिसे भी यह काव्य बहुत उच्च कोटिका है।

इस काव्यका, बहुत पहले (सन् १८८३ में) अहमदाबादके गुजरात कालेजके संस्कृतके प्रोफेसर ए. वी. काथवटे नामक विद्वान्‌ने संपादन कर 'बॉम्बे संस्कृत सीरीझ' नामक ग्रन्थमाला द्वारा प्रकाशन किया था। प्रो. काथवटेने इसकी भूमिका रूपसे एक बहुत विस्तृत इंग्रेजी प्रस्तावना लिखी, जिसमें काव्यगत बातोंका विस्तृत ऊहापोह किया है। प्रो. काथवटे संपादित यह पुस्तक अब अलभ्य है। इसलिये इसका पुनर्मुद्रण करनेकी दृष्टिसे प्रस्तुत प्रकाशन किया गया है। मूल ग्रन्थके संशोधनमें कुछ अन्य प्राचीन हस्तलिखित पोथियां भी और मिल आईं, इसलिये इसका यह प्रकाशन अधिक शुद्ध हो गया है।

इसके साथ, कवि अरिसिंह विरचित सुकृतसंकीर्तन काव्य भी सम्मिलित कर दिया है। क्यों कि ये दोनों काव्य, वर्णन और वस्तुकी दृष्टिसे, परस्पर बहुत कुछ साम्य रखते हैं।

'सुकृतसंकीर्तन' काव्यकी एक प्राचीन हस्तलिखित प्रति, जब स्व० जर्मन महाविद्वान् डॉ. ब्युहलरको मिली तो वे इसको देख कर बहुत आकृष्ट हुए और इस पर उन्होंने जर्मन भाषाके एक सुप्रसिद्ध साहित्यिक जर्नल में, बहुत बडा निबन्ध लिख कर प्रकट किया। उस निबन्ध के महत्त्वको देख कर, इ. एच्. बर्जेस नामक इंग्रेज विद्वान् ने, उसका इंग्रेजी अनुवाद कर, इन्डियन एन्टीकेरी नामक सुप्रसिद्ध पत्रिकामें प्रकट किया। पर मूल संस्कृत काव्य कहीं प्रकट नहीं हुआ था। इसलिये स्वर्गवासी मुनिवर श्री चतुरविजयजी महाराजने, इसकी प्राचीन हस्तलिखित प्रतियां प्राप्त कर, भावनगर की जैन आत्मानन्द सभा द्वारा प्रकाशित होने वाली 'आत्मानन्द जैन ग्रन्थमाला' के एक ग्रन्थके रूपमें प्रकाशित किया। यह प्रकाशन भी अब अप्राप्य है, अतः इसका पुनर्मुद्रण भी इसके साथ कर देनेका हमारा विचार हुआ। इस प्रकार इसका पुनः प्रकाशन करनेकी हमारी इच्छाका मुनिवर्य्य श्री पुण्यविजयजी महाराजने सहर्ष स्वीकार कर, अपने स्वर्गीय गुरुमहाराजके संपादनको सुप्रतिष्ठित किया।

इस प्रकार 'कीर्ति कौमुदी' और 'सुकृत संकीर्तन' इन दोनों काव्योंका संयुक्त प्रकाशन कर देना जब निश्चित हुआ, तो हमारे मनमें इन दोनों काव्योंके परिचयस्वरूप जो उक्त दो इंग्रेजी निबन्ध लिखे गये हैं, उनको भी इसमें सम्मिलित करना अधिक उपयुक्त लगा। क्यों कि वे दोनों निबन्ध अब अप्राप्य हैं; और उन निबन्धोंके विद्वान् लेखकों द्वारा जिस परिश्रम और जिस अध्ययनके फल स्वरूप वे प्रौढ निबन्ध लिखे गये हैं, सर्वथा संरक्षणीय और सदैव पठनीय हैं। अतः हमने उन दोनों विशिष्ट निबन्धोंको भी यथावत् इस प्रकाशनमें मुद्रित कर दिये हैं।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्व० मुनिवर्य्य श्री चतुरविजयजी महाराज द्वारा संपादित और प्रकाशित 'सुकृत संकीर्तन' काव्यके प्रास्ताविक रूपमें, स्व० विद्वान् चिमनलाल डा. दलाल (गायकवाडस् ओरिएन्टल सीरीझ, बडौदा, के मूल प्रतिष्ठापक)ने, ग्रन्थपरिचयात्मक छोटासा इंग्रेजी वक्तव्य लिखा था, उसको भी हमने इसके साथ संकलित कर देना उचित समझ कर, वैसा किया है। इस वक्तव्यमें वस्तुपालके कीर्तिकलापोंका वर्णन करने वाली समसामयिक जितनी रचनाएं, उपलब्ध हैं, उनका संक्षिप्त परिचय दिया गया है।

महामात्य वस्तुपालके जीवन और कार्योंसे संबद्ध जितनी समकालीन साहित्यिक कृतियों उपलब्ध होती हैं उनका संक्षिप्त परिचय, हमने इस ग्रन्थमालाके ४ थे ग्रन्थके रूपमें प्रकाशित 'धर्माभ्युदय महाकाव्य'के किंचित् प्रास्ताविकमें लिखा है। उससे संबद्ध 'सुकृतकीर्तिकल्लोलिनी' आदि वस्तुपालकी प्रशस्त्यात्मक रचनाओंका तथा उसके बनाये हुए मन्दिरों और मूर्तिओंके जितने शिलालेख अभी तक ज्ञात हुए हैं उन सबका भी, एक संग्रह ग्रन्थ, इसी ग्रन्थमालाके ५ वें ग्रन्थके रूपमें प्रकट किया गया है।

पहले, प्रस्तुत काव्य-द्वय भी उसी संग्रहके अन्तर्गत संकलित रूपमें प्रकट कर देनेका विचार रहा और तदनुसार इसका मुद्रण कार्य भी कराया गया। परंतु पीछेसे प्रो. काथवटे लिखित 'कीर्तिकौमुदी' की इंग्रेजी प्रस्तावना और डॉ. ब्युहलर लिखित 'सुकृत संकीर्तन' काव्यका विशिष्ट परिचायक बहुमूल्य निबन्धका इंग्रेजी अनुवाद भी, इसमें संकलित कर देनेके विचारसे, प्रस्तुत ग्रन्थ को, अब ग्रन्थमालाके ३२ वें ग्रन्थके रूपमें, पृथक् प्रकट किया जा रहा है।

'धर्माभ्युदय महाकाव्य' 'सुकृतकीर्तिकल्लोलिनी आदि वस्तुपाल-प्रशस्तिसंग्रह' तथा प्रस्तुत 'कीर्तिकौमुदी तथा सुकृतसंकीर्तन काव्य द्वय'–इन तीनों ग्रन्थोंका संपादन कार्य विद्वद्रत्न मुनिमहोदय श्री पुण्यविजयजी महाराजने किया है और इसके लिये हम इनके प्रति, अपना पुनः पुनः सादर कृतज्ञभाव प्रकट करना कर्तव्य समझते है।

महावीर जन्मदिन, चैत्र शुक्ला १३, सं. २०१७
ता. ३० मार्च, १९६१, भारतीयविद्याभवन, बंबई

–मुनि जिनविजय

–आभार प्रदर्शन–

इस ग्रन्थके प्रकाशनमें जो द्रव्य व्यय हुआ है उसका अर्द्ध भाग भारत सरकारने देनेकी उदारता प्रकट की है, अतः इसके लिये हम भारत सरकारके प्रति अपना सादर आभार प्रकट करते हैं।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

गूर्जरेश्वरपुरोहित-

महाकविश्रीसोमेश्वरदेवविरचितं

कीर्तिकौमुदीमहाकाव्यम् ।

(महामात्यश्रीवस्तुपालचरितात्मकम्)

Jain Education International For Private & Personal Use Only www.jainelibrary.org

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रथमः सर्गः ।

॥ नमः सर्वज्ञाय ॥

मङ्गलाचरणम्

श्रिये सन्तु सतामेते, चिरं **चातुर्भुजा** भुजाः । यामिका इव धर्मस्य, चत्वारः स्फुरदायुधाः ॥ १

कुर्वन् गिरिभुवि क्रीडां, दृष्टोन्नतपयोधरः । उल्लसच्चन्द्रकः प्रीतिं, **नीलकण्ठः** करोतु वः ॥ २

जटा-सीमन्तकान्तं वः, श्रियेऽस्तु **शिव**योर्वपुः । तातेत्यम्बेति वांऽऽहूतं, **गुहेन** प्रतिवक्ति यत् ॥ ३

भूयान्मुदे तदेकं वः, **शिव-केशव**योर्वपुः । करोति प्रणतिं यस्य, भीतः प्रीतश्च मन्मथः ॥ ४

सारस्वतमयं वन्दे, तमोपहमहं महः । अपि सूक्ष्मपदार्थानां, साक्षात्कारं करोति यत् ॥ ५

सरस्वतीं सदा वन्दे, यदुपास्तिसमुच्छ्रिताः । काव्यानि कुसुमानीव, सुवते कविपादपाः ॥ ६

कविवर्णना

वन्द्यास्ते कवयो येषां, सूक्तिसौरभवासिता । कृतत्रिजगदाह्लादं, कीर्तिर्भ्रमति भूभुजाम् ॥ ७

जयन्ति कवयः केऽपि, सूक्तैर्मन्त्रैरिव द्रुतम् । तांस्तांश्चिद्रूपचित्तेषु, रसानावेशयन्ति ये ॥ ८

मधुना लसदुत्कर्षां, कविषट्पदपद्मिनीम् । **रामायणकवे**स्तस्य, हृद्यां वन्दे सरस्वतीम् ॥ ९

स्तुमस्तमेव **वाल्मीकिं**, यत्प्रसादात् प्रशस्यते । लौकैर्**दाशरथं वृत्त**मपि श्रवणदुःखकृत् ॥ १०

स नमस्यः कथं न स्यात्, सतां **सत्यवतीसुतः**? । सुपर्वोपचितं चक्रे, यः स्वर्गमिव **भारतम्** ॥ ११

कालिदासः कविर्जातः, श्री**रामचरित**स्य यत् । स एष शर्करायोगः, पयसः समपद्यत ॥ १२

विरक्तश्चेद् दुरुक्तिभ्यो, निर्वृतिं वाऽथ वाञ्छसि । वयस्य ! कथ्यते तथ्यं, **माघ**सेवां कुरुष्व तत् ॥ १३

जैनिताऽर्जुनतेजस्कं तमीश्वरमुपाश्रिता । राकेव **भारवे**र्भाति, कृतिः कुवलयप्रिया ॥ १४

युक्तं **कादम्बरीं** श्रुत्वा, कवयो मौनमाश्रिताः । **बाण**ध्वनावनध्यायो, भवतीति स्मृतिर्यतः ॥ १५

वचनं **धनपाल**स्य, चन्दनं मलयस्य च । सरसं हृदि विन्यस्य, कोऽभून्नाम न निर्वृतः ? ॥ १६

---

१ "गम्यस्याप्ये" (सिद्धहेमसूत्र २-२-६२) इति सूत्रेण चतुर्थी, श्रियं कर्तुं सन्तु इत्यर्थः इति **टिप्पणी वा०** पुस्तके ॥ २ पार्वत्याम्, पक्षे पर्वतभूमौ **वा० टि०** ॥ ३ स्तना मेघाश्च **वा० टि०** ॥ ४ उल्लसन् चन्द्रो यस्य "शेषाद्वा" (सिद्धहेम ७-३-१७५) इति बहुव्रीहौ कच्, पक्षे चन्द्रकाः चांदला इति रूढाः **वा० टि०** ॥ ५ इश्वरो मयूरश्च **वा० टि०** ॥ ६ **चाऽऽहू**° प्र० वासं० ॥ ७ °**तमहं व**° प्र० । °**तमयं व**° इति स्थाने °**तमिदं व**° इति संशोधितः पाठः वा० ॥ ८ °**पास्ति स**° मु० ॥ ९ स्थापनामन्त्रैः **वा० टि०** ॥ १० स्थापयन्ति **वा० टि०** ॥ ११ पक्षे सरवणो यो दशरथेन हतः **वा० टिप्पणी** ॥ १२ कृष्णद्वीपायनव्यासः **वा० टि०** ॥ १३ देवाः, पक्षे शोभना अधिकाराः **वा० टि०** ॥ १४ जनितम् अर्जुनस्य-पार्थस्य बलं येन तम्, अर्थाद् युधिष्ठिरम्, पक्षे अर्जुनं-निर्मलम् **वा० टि०** ॥ १५ तमीश्वरं-चन्द्रम् **वा० टि०** ॥ १६ बाणः कवीश्वरः शराश्च **वा० टि०** ॥ १७ अणोज्झउ **वा० टि०** ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

बिल्हणस्य कवेः प्राप्तप्रसादैव सरस्वती । नीयते जातु कालुष्यं, दुर्जनैर्न घनैरपि ॥ १७
सदा हृदि वहेम श्री**हेमसूरेः** सरस्वतीम् । सुवत्या शब्दरत्नानि, ताम्रपर्णी जिता यया ॥ १८
स्तुमः सुमनसां श्रेष्ठं, **नीलकण्ठ**महर्निशम् । **दर्पकोपचितं** यस्य, सर्वज्ञस्यं न मानसम् ॥ १९
श्री**प्रह्लादनदेवो**ऽभूद्, द्वितयेन प्रसिद्धिमान् । पुत्रत्वेन सरस्वत्याः, पतित्वेन जयश्रियः ॥ २०
श्री**भोज-मुञ्ज**दुःखार्ता, रम्यां वर्तयता कथाम् । **प्रह्लादनेन** साह्लादा, पुनश्चक्रे सरस्वती ॥ २१
कवीन्द्रश्च मुनीन्द्रश्च, **नरचन्द्रो** जयत्ययम् । प्रशस्तिर्यस्य काव्येषु, सङ्क्रान्ता हृदयादिव ॥ २२
मुने**र्विजयसेनस्य**, सुधामधुरया गिरा । भारतीमञ्जुमञ्जीरस्वरोऽपि परुषीकृतः ॥ २३
सुभटेन पदन्यासः, स कोऽपि समितौ कृतः । येनाधुनाऽपि धीराणां, रोमाञ्चो नापचीयते ॥ २४
स्ववाक्पाकेन यो वाचां, पाकं शास्त्यपरान् कवीन् । स्वयं **हरिहरः** सोऽभूत्, कवीनां पाकशासनः ॥ २५
न **माघः** श्लाघ्यते कैश्चिन्ना**ऽभिनन्दो**ऽभिनन्द्यते । निष्कलः **कालिदासो**ऽपि, **यशोवीरस्य** सन्निधौ ॥ २६
प्रकाश्यते सदा साक्षाद्, **यशोवीरेण** मन्त्रिणा । मुखे दन्तद्युता ब्राह्मी, करे श्रीः स्वर्णमुद्रया ॥ २७
अर्जितास्ते गुणास्तेन, **चौहमानेन्द्रमन्त्रिणा** । विधेरब्धेश्च नन्दिन्यौ, यैरनेन नियन्त्रिते ॥ २८
वस्तुपाल-यशोवीरौ, सत्यं वाग्देवतासुतौ । एको दानस्वभावोऽभूदुभयोरन्यथा कथम् ? ॥ २९

सज्जन-दुर्जनवर्णना

हृदा यादःपरित्यक्ता, निर्व्याला मलयद्रुमाः । अमालिन्यकृतो दीपाः, श्रीपात्रं सन्तु साधवः ॥ ३०
साधूनां लुब्धता काचिदचिन्त्यैव तथाहि ये । परेषामेव गृह्णन्ति, गुणान् भूरिगुणा अपि ॥ ३१
रमयन्ति न कं नाम, सन्तश्छायाद्रुमा इव । पुष्यन्ति स्मितपुष्पं ये, सूचितोच्चैःफलोदयम् ॥ ३२
अमृतैर्मानसं मन्ये, सपूर्णं सततं सताम् । स्यन्देनेव तदीयेन, वाचो मुञ्चन्ति नाऽऽर्द्रताम् ॥ ३३

अश्रुप्रवर्तकैर्धूमैरिव किं तैरसाधुभिः ? । रसवत्यां कवेरुक्तौ, मालिन्यं जनयन्ति ये ॥ ३४
वृश्चिकानां भुजङ्गानां दुर्जनानां च वेधसा । विभज्य नियतं न्यस्तं, विषं पुच्छे मुखे हृदि ॥ ३५
अस्मिन् कलौ खलोत्सृष्टदुष्टवाग्बाणदारुणे । कथं जीवेज्जगन्न स्युः, सन्नाहाः सज्जना यदि ? ॥ ३६
निदानं नात्र पश्यामि, यदुपेत्यापि दुर्जनाः । आक्रोशन्ति भृशं साधूनध्वगानिव कुर्कुराः ॥ ३७
दोषज्ञैस्तेन रंजैव, सह साधनरा सभा । त्याज्याऽवकरभूमीव, सहसा घनरासभा ॥ ३८
दुर्जनैस्तर्ज्यमानस्य, साधोरधिकमेधते । भस्मभिर्मृज्यमानस्य, मुकुरस्येव चारुता ॥ ३९

आस्तां तावत् कृतक्रोधः, सप्रमोदोऽपि दुर्जनः । कष्टाय जायते दृष्टो, रतैवानिव वायसः ॥ ४०
दुर्जनानां द्विजिह्वत्वख्यातिरेषा मृषैव यत् । विश्वोपतापिनां तेषामुचिता सप्तजिह्वता ॥ ४१
अस्मिन्नसमयारण्ये, खलवेतालसङ्कुले । चरतः सज्जनालापाः, शिखाबन्धीभवन्तु मे ॥ ४२

---

१ कविम्, पक्षे ईश्वरम् **वा० टि०** ॥ २ °**यसिंहस्य** मु० ॥ ३ मितौ–प्रमाणग्रन्थे स स कोऽपि पदन्यासः कृतः । पक्षे समितौ सङ्ग्रामे **वा० टि०** ॥ ४ विदुषां वीराणां च **वा० टि०** ॥ ५ कवीन् जलपक्षिणः हंसान् **वा० टि०** ॥ ६ इन्द्रः **वा० टि०** ॥ ७ °**न्दोऽपि नन्द्य**° वा० ॥ ८ **सत्तां सा**° प्र० वा० ॥ ९ ३१ (तृतीयैकवचनम् इत्यर्थः) **वा० टि०** ॥ १० औदार्यादयः, पक्षे रज्जवः **वा० टि०** ॥ ११ चहूआण **वा० टि०** ॥ १२ **हृदापद्वः** मु० ॥ १३ **पुष्पन्ति** वा० । **पुष्यन्ति** मु० ॥ १४ **रात्रैव** प्र० वा० ॥ १५ °**तमानि**° प्र० ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सोऽस्ति कश्चन यो दृष्टोऽप्यशुद्धानां विशुद्धये । तेऽपि तिष्ठन्ति ये दृष्टाः, शुद्धानामप्यशुद्धये ॥ ४३

कवेः वस्तुपालचरित्रवर्णनप्रतिज्ञा

कुलमुज्ज्वलमाकारं, चारुमाचारमुत्तमम् । दानं सम्मानसम्पन्नमुन्नतिं नमिताहिताम् ॥ ४४

प्रज्ञामाङ्गिरसावज्ञां, दयां भग्नभयोदयाम् । श्लोकं भूषितभूर्लोकं, मन्त्रितां न्याययन्त्रिताम् ॥ ४५

विलोक्य **वस्तुपाल**स्य, भक्तिं चात्मनि निर्भराम् । श्री**सोमेश्वरदेवे**न, तत्स्वरूपं निरूप्यते ॥

त्रिभिः कुलकम् ॥ ४६

मन्त्रीशगुणमाणिक्यश्रेणिलाभमहोत्सवे । श्री**सोमेश्वरदेव**स्य, गातुमुत्ताम्यतीव गीः ॥ ४७

अणहिल्लपत्तननगरवर्णनम्

अस्ति हस्तिमदक्लेदविराजद्गोपुरं पुरम् । **अणहिल्लपुरं** नाम, धाम श्रेयःश्रियामिह ॥ ४८

कृतहारानुकारेण, प्राकारेण चकास्ति यत् । सुकृतेन वृतीभूय, त्रायमाणं कलेरिव ॥ ४९

अनेकानोकहच्छन्ना, प्रत्यासन्ना वनावलिः । यत्रोन्नतस्य वप्रस्य, च्छायेव प्रतिभासते ॥ ५०

चन्द्रशालासु बालानां, खेलन्तीनां निशामुखे । यत्र वक्त्रश्रिया भाति, शतचन्द्रं नभस्तलम् ॥ ५१

कुत्रापि श्रुतिनिर्घोषैः, क्वचिन्मङ्गलगीतिभिः । बन्दिकोलाहलैः क्वापि, यत् सदा मुखरं पुरम् ॥ ५२

धौतेव सुधया यत्र, तुषारेणेव भूषिता । रचिता रजतेनेव, राजते सौधपद्धतिः ॥ ५३

दत्तचित्तप्रसादेषु, प्रासादेषु सदा वसन् । यत्र शम्भुर्न कैलासविलासमभिलष्यति ॥ ५४

यस्मिन् होमानलोद्भूतधूमधोरणिरुद्धती । विभाति भानुकन्येव, स्वर्गङ्गासङ्गमोन्मुखी ॥ ५५

यत्र सौधांशुविध्वस्तसमस्ततिमिरे पुरे । न स्वैरिणीसपक्षस्य, पक्षस्य भवति क्षणः ॥ ५६

लङ्का शङ्कावती **चम्पा,** साकम्पा **विदिशा** कृशा । **काशि**र्नाशितसम्पत्ति**र्मिथिला** शिथिलादरा ॥ ५७

त्रिपुरी विपरीतश्री**र्मथुरा** मन्थराकृतिः । **धारा**ऽप्यभून्निराधारा, यत्र जैत्रगुणे सति ॥ युग्मम् ॥ ५८

पुरान्तराणि निर्जित्य, जेतुं पौरन्दरं पुरम् । पत्रालम्बं करोतीव, यत् प्रासादध्वजांशुकैः ॥ ५९

यमुनेव मधूपघ्नं, साकेतं सरयूरिव । गजाह्वयं च गङ्गेव, सेवते यत् सरस्वती ॥ ६०

भान्ति देवालया यस्मिन्, **हिमालय**समश्रियः । भूतलं व्याप्य भूपानां, कीर्तिकूटा इवोद्गताः ॥ ६१

जातशैत्यश्चलच्चैत्यपताकापवनैः क्षणम् । अरुणस्तरुणेनापि, यत्र पूष्णा न पीड्यते ॥ ६२

यत्र नारीमनश्चौरान्, पौरान् सौराज्यराजिते । निगृह्णन्निषुभिः पौष्पैर्द्वैराज्यं कुरुते स्मरः ॥ ६३

कौरवेश्वरसैन्यस्य, यत्पौरस्त्रीजनस्य च । वल्गद्गाङ्गेय-कर्णस्य, न पश्याम्यहमन्तरम् ॥ ६४

यस्य राजपथे पांसुः, सिक्तः कुम्भिमदाम्बुभिः । ऊर्ध्वमभ्युद्धतोऽप्येति, न रङ्गद्भिस्तुरङ्गमैः ॥ ६५

गृहीतभूरिदण्डानां, विडम्बितमहीभुजाम् । यत्रत्यानां नरेन्द्राणां, प्रासादानां च नान्तरम् ॥ ६६

---

१ अङ्गिरसस्य बृहस्पतेरवज्ञा यस्याः ताम् **वा० टि०** ॥ २ **निगद्यते** वा० ॥ ३ प्रतोल्यः **वा० टि०** ॥ ४ °**व रूषि**°-प्र० ॥ ५ °**जतेनेव** मु० ॥ ६ °**द्धता** मु० ॥ ७ सहायस्य **वा० टि०** ॥ ८ **सकम्पा** मु० ॥ ९ **विदशा** प्र० । **विशदा कृ**° वा० ॥ १० मथुरानगरी **वा० टि०** ॥ ११ कोशलानगरी **वा० टि०** ॥ १२ सरयूर्नाम नदी **वा० टि०** ॥ १३ **भूतानां** प्र० मु० ॥ १४ **चलद्गा**° प्र० ॥ १५ **भ्युद्धता** मु० ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भाति यत्र कपोलान्तःसङ्क्रान्तेन्दुर्वधूजनः । राजमुद्राङ्कितः कोशः, कन्दर्पनृपतेरिव ॥ ६७

यत्र यत्र प्रसर्पन्ति, सलीलं यन्मृगीदृशः । दासीव दृष्टिरन्वेति, तत्र तत्र विलासिनाम् ॥ ६८

वीक्षिता वलितग्रीवं, तन्वीभिर्यत्र केऽपि[1] ये । मन्ये व्यावर्तिताङ्गेन, तेऽनङ्गेनापि[2] ताडिताः ॥ ६९

रूपेणाप्रतिमाः कान्ता, यत्र धात्रा कृताः किल । तथापि प्रतिमास्तासां, सञ्जाता रत्नभित्तिषु ॥ ७०

स्नात्वा सरसि सौरभ्यं, लीलोद्यानादुपाहरन् । तमीसमीरणः स्त्रैणं, यत्र कामीव सेवते ॥ ७१

सिद्धसरोवर्णनम्

यस्मिन् सरो हरोपेन्द्रप्रासादैः परितश्रितम् । आमुक्तमौक्तिकं भूमेर्भात्येकमिव कुण्डलम् ॥ ७२

आभाति यस्य गम्भीरं, सरः स्मेरैः सरोरुहैः । खेलन्तीनां सुखं तोयदेवतानां मुखैरिव ॥ ७३

यस्यान्तर्गिरिशागारै[3]र्दीपकाः प्रतिबिम्बिताः । शोभन्ते निशि पातालव्यालमौलिमणिश्रियः ॥ ७४

यस्योच्चैः सरसस्तीरे, राजते रजतोज्ज्वलः । **कीर्तिस्तम्भो** नभोगङ्गाप्रवाहोऽवतरन्निव ॥ ७५

हरप्रासादसन्दोहमनोहरमिदं सरः । राजते नगरं तच्च, राजहंसैरलङ्कृतम् ॥ ७६

सशङ्ख-चक्र[4]ः प्रथितप्रभूताव[5]तारशाली कमलाभिरामः ।
स एष कासारशिरोवतंसः, कंसप्रहर्तुः प्र[6]तिमां बिभर्ति ॥ ७७

न **मानसे**[7] माद्यति मानसं मे, **पम्पा** न सम्पादयति प्रमोदम् ।
अच्छोदमच्छोदकमप्यसारं, **सरोवरे राजति सिद्धभर्तुः**[8] ॥ ७८

प्रतितटघटितोर्मिघातजातप्रसृमरफेनकदम्बकच्छलेन ।
[9]हरहसितसितद्युतिं स्वकीर्तिं, दिशि दिशि कन्दलयत्ययं तडागः ॥ ७९

अलवुलहरिलिप्तव्योमभागे तडागे, तरलतुहिनपिण्डापाण्डुडिण्डीरदम्भात् ।
तरुणतरणितापव्यापदापन्नमुच्चैरिह विहरति ताराचक्रवालं विशालम् ॥ ८०

एकत्र स्फुटदब्जराजिरजसा बभ्रूकृतः सुभ्रुवां, प्रभ्रश्यत्कुचकुम्भकुङ्कुमरसैरन्यत्र रक्तीकृतः ।
[10]अन्यत्र स्मितनीलनीरजलदलच्छा[11]येन नीलीकृतः, श्रेयःसिन्धुरवर्ण[12]कम्बलधुरां[13] धत्ते सरःशेखरः ॥ ८१

॥ इति श्रीगूर्जरेश्वरपुरोहितश्रीसोमेश्वरदेवविरचिते कीर्तिकौमुदीनाम्नि महाकाव्ये नगरवर्णनो नाम प्रथमः सर्गः ॥

१ °पि यत् प्र० मु० ॥ २ °पि पीडिताः वा० ॥ ३ °दीपिकाः मु० ॥ ४ °चक्रप्रथितः प्रभू° मु० ॥ ५ अवतारास्तीर्थाभिधाः पक्षे "मत्स्यः १ कूर्मो २ वराह ३ श्च" इत्यादि दशावताराः बा० टि० ॥ ६ प्रतिभां प्र० ॥ ७ °से मेद्य° मु० ॥ ८ देवसरोवरं श्रीसिद्धराजजयसिंहदेवस्य बा० टि० ॥ ९ हरिहरहसितद्युतिं मु० ॥ १० अप्यत्र प्र० वा० ॥ ११ "सेनाशालासुराच्छाया–", २ । ४ । २५ । इति न पुंस्त्वम् बा० टि० ॥ १२ °वर्ण्यक° प्र० ॥ १३ धुरं मु० ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

द्वितीयः सर्गः ।

चौलुक्यवंशवर्णनम्

अथ **चौलुक्य**भूपालः, पालयामास तत् पुरम् । जितराजसमाजः श्री**मूलराज** इति श्रुतः ॥ १

आवर्जिता जितारातेर्गुणैर्बाणरिपोरिव । गूर्जरेश्वरराज्यश्रीर्यस्य जज्ञे स्वयंवरा ॥ २

लाटेश्वरस्य सेनान्यमसामान्यपराक्रमः । दुर्वारं **बारपं** हत्वा, हास्तिकं यः समग्रहीत् ॥ ३

सपत्राकृतशत्रूणां, सम्पराये स्वपत्रिणाम् । महेच्छः **कच्छ**भूपालं लक्षं लक्षं चकार यः ॥ ४

दानोपद्रुतदारिद्र्यं, शौर्यनिर्जितदुर्जनम् । कीर्तिस्थगितकाकुत्स्थं, यो राज्यमकरोच्चिरम् ॥ ५

तस्मिन्नथ कथाशेषे, निःशेषितनिजद्विषि । राजा **चामुण्डराजो**ऽभून्महीमण्डलमण्डनम् ॥ ६

विरोधिवनिताचित्ततापाध्यापनपण्डिताः । यदीयाः कटकारम्भाः, कृतजम्भारिभीतयः ॥ ७

पाणिपङ्कजवर्तिन्या, स्फुरत्कोशविलासया । यस्यासिभ्रमरश्रेण्या, भिन्ना वंशाः क्षमाभृताम् ॥ ८

लोकत्रयोल्लसत्कीर्तिर्महीपतिमतल्लिका । राजा **वल्लभराजा**ख्यस्ततस्तत्तनुभूरभूत् ॥ ९

सम्भूतकम्पसम्पत्तेर्यदातङ्केन केनचित् । जगाल **मालवेश**स्य, करवालः करादपि ॥ १०

उपरुन्धन् विरुद्धानां, पुरीं पुरुषपौरुषः । **जगज्झम्पन** इत्येष, विशेषज्ञैरुदीरितः ॥ ११

बभूव भूपतिस्तस्यावरजो विरजस्तमाः । श्रीमान् **दुर्लभराजा**ख्यः, सुदुर्लभयशाः परैः ॥ १२

कालेन करवालेन, भोगिनेवाभिरक्षितम् । निधानमिव यद्राज्यमनाहार्यं परैरभूत् ॥ १३

सर्वथाऽनुपभोग्येषु, यस्य सौभाग्यभासिनः । न करः परदारेषु, द्विजसारेषु चापतत् ॥ १४

तस्य भ्रातृसुतः श्रीमान्, **भीमा**ख्यः पृथिवीपतिः । विष्टपत्रितयाभीष्टप्रवृत्तिप्रतिभूरभूत् ॥ १५

मण्डलाग्रेण यः शैत्यशालिना विस्मृतस्मितम् । चकार **भोज**मम्भोजमिव पीयूषदीधितिः ॥ १६

एकधारापतिर्यस्य, द्विधारेणासिना जितः । किं चित्रं ? यदसौ जेतुं, शतधारमपि क्षमः ॥ १७

असौ गुणीति मत्वेव, **भोजः** कण्ठमुपेयुषा । धनुषा गुणिना यस्य, नश्यन्नश्वान्न पातितः ॥ १८

सुपर्णकेतनाभ्यर्णं, तत्र क्षत्रपतौ गते । धात्रीं पोत्रीव तत्पुत्रः, श्री**कर्णः** सार्णवां दधे ॥ १९

गुरुणा विक्रमेणायं, बभूव पितृसन्निभः । आकारेण तु रम्येण, भूपोऽभूदात्मभूसदृक् ॥ २०

विना कर्णेन तेन स्त्रीनेत्राणां न रतिः क्वचित् । इतीव जज्ञिरे तेषामुपकर्णं प्रवृत्तयः ॥ २१

---

१ नारायणस्य **वा० टि०** ॥ २ अत्यन्तपीडिताः **वा० टि०** ॥ ३ संग्रामे **वा० टि०** ॥ ४ स्वधनुषाम् **वा० टि०** ॥ ५ **महेच्छकच्छभूपालं लक्षं लक्षीचकार** मु० ॥ ६ उदारः **वा० टि०** ॥ ७ लाषउ इति नामानम् **वा० टि०** ॥ ८ **लक्षीचकार** मु० । वेध्यम् **वा० टि०** ॥ ९ °**पद्दत**° मु० ॥ १० कोशः खड्गपिधानकम्, पक्षे कुड्मलम् **वा० टि०** ॥ ११ **लोकोत्तरलस**° प्र० ॥ १२ °**गत्कम्प**° मु० ॥ १३ ब्राह्मणधनेषु **वा० टि०** ॥ १४ खड्गेन, पक्षे प्रधानमण्डलेन **वा० टि०** ॥ १५ तीक्ष्णत्वम्, पक्षे शीतलत्वम् **वा० टि०** ॥ १६ हास्यं विकाशश्च **वा० टि०** ॥ १७ नारायणसमीपम्, स्वर्गमित्यर्थः **वा० टि०** ॥ १८ °**त्रीं धात्रीप्रपौत्रीं च श्री**° मु० ॥ १९ वराहः **वा० टि०** ॥ २० °**षामनुक**° मु० ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तत्कर्णा-ऽर्जुनयोर्वैरं, पूर्वं कर्णः स्मरन्निव । अर्जुनं गमयामास, यशो देशान्तराणि यः ॥ २२

अभिरामगुणग्रामो, रामो दशरथादिव । सूनुः श्री**जयसिंहो**ऽस्माज्जायते स्म जगज्जयी ॥ २३
शिशुनाऽपि शुनासीरवीरवृत्तिमतीयुषा । रुषा भुजिष्यतां नीताः, पिशुना येन भूभुजः ॥ २४
अपारपौरुषोद्गारं, **खङ्गारं** गुरुमत्सरः । **सौराष्ट्रं** पिष्टवानाजौ, करिणं केसरीव यः ॥ २५
असङ्ख्यहरिसैन्येन, प्रक्षिप्तानेकभूभृता । बद्धः **सिन्धुपति**र्येन, वैदेहीदयितेन वा ॥ २६
अमर्षणं मनः कुर्वन्, विपक्षोर्वीभृदुन्नतौ । अगस्त्य इव यस्तूर्ण**मर्णोराज**मशोषयत् ॥ २७
गृहीता दुहिता तूर्ण**मर्णोराज**स्य विष्णुना । दत्ताऽनेन पुनस्तस्मै, भेदोऽभूदुभयोरयम् ॥ २८
द्विषां शीर्षाणि लूनानि, दृष्ट्वा तत्पादयोः पुरः । चक्रे **शाकम्भरीशो**ऽपि, शङ्कितः प्रणतं शिरः ॥ २९
मालवस्वामिनः प्रौढलक्ष्मीपरिवृढः स्वयम् । समित्यपरमारो यः, **परमारा**नमारयत् ॥ ३०
क्षिप्त्वा **धारापतिं** राजशुकवत् काष्ठपञ्जरे । यः काष्ठापञ्जरे कीर्तिराजहंसीं न्यवीविशत् ॥ ३१
एकैव जगृहे **धारा**, नगरी **नरवर्मणः** । दत्ता येनाश्रुधारास्तु, तद्वधूनां सहस्रधा ॥ ३२
धाराभङ्गप्रसङ्गेन, यस्याऽऽसन्नस्य शङ्कितः । प्राघूर्णकमिषाद् दण्डं, **महोबकपति**र्ददौ ॥ ३३
सुधेव वसुधा लब्धुं, वाञ्छिता येन विद्विषा । यस्योल्लसदसिर्बाहुः, राहुश्चक्रे तमाहवे ॥ ३४
जनेन मेने यः स्वामी, कुमार इव शक्तिमान् । ताम्रचूडध्वजः सोऽभूत्, किन्तु केकिध्वजः परः ॥ ३५
येन विश्वैकवीरेण, न स राजा जितो न यः । काष्ठा काऽपि न सा यस्य, यशोभिः शोभिता न या ॥ ३६
गणेशस्येव यस्याग्र्यपुष्करस्य वृषस्थितेः । आज्यसारः करस्थोऽभूद्, **गौडो** मोदकवन्नृपः ॥ ३७
श्मशाने यातुधानेन्द्रं, बद्ध्वा **बर्बरका**भिधम् । **सिद्धराजे**ति राजेन्दुर्यो जज्ञे राजराजिषु ॥ ३८
रजोभिः समरोद्भूतैर्यत् पुरा मलिनीकृतम् । तत् पश्चात् कीर्तिकल्लोलैर्येन क्षालितमम्बरम् ॥ ३९

महीमण्डलमार्तण्डे, तत्र लोकान्तरं गते । श्रीमान् **कुमारपालो**ऽथ, राजा रञ्जितवान् प्रजाः ॥ ४०
पृथुप्रभृतिभिः पूर्वैर्गच्छद्भिः पार्थिवैर्दिवम् । स्वकीयगुणरत्नानां, यत्र न्यास इवार्पितः ॥ ४१
न केवलं महीपालाः, सायकैः समराङ्गणे । गुणैर्लोकम्पृणैर्येन, निर्जिताः पूर्वजा अपि ॥ ४२
सुकृतैकरतेर्यस्य, मृतवित्तानि मुञ्चतः । देवस्येव नृदेवस्य, युक्ताऽभूदमृतार्थिता ॥ ४३
करवालजलैः स्नातां, वीराणामेव योऽग्रहीत् । धौतां बाष्पाम्बुधाराभिर्निर्वीरीणां न तु श्रियम् ॥ ४४
शूराणां सम्मुखान्येव, पदानि समरे ददौ । यः पुनस्तत्कलत्रेषु, मुखं चक्रे पराङ्मुखम् ॥ ४५
हृदि प्रविष्टयद्बाणक्लिष्टेनाघूर्णितं शिरः । **जाङ्गल**क्षोणिपालेन, व्याचक्षाणैः परैरपि ॥ ४६
चूडारत्नप्रभाकम्रं, नम्रं गर्वादकुर्वतः । कणशः **कुङ्कणे**शस्य, यश्चकार शरैः शिरः ॥ ४७

---

१ इन्द्रः **वा० टि०** ॥ २ वा इवार्थे **वा० टि०** ॥ ३ °**राध्वंसप्र**° मु० ॥ ४ **यस्य सान्निध्यश**° मु० ॥ ५ **महोदयपति**° प्र० वा० ॥ ६ एतत्पद्यानन्तरमस्मत्पार्श्वस्थप्राचीनप्रतिद्वयेऽप्यनुपलभ्यमानं मुद्रितपुस्तके टिप्पण्यामधिकमेकं पद्यं निष्टङ्कितं वर्तते । तथाहि—

महोबकपुराधीशाज्जितान्मदनवर्मणः । कोटीः षण्णवतीर्हेम्नो, यस्तन्मानमिवाऽऽददे ॥
७ वृषः पुण्यम्, पक्षे मूषकः **वा० टि०** ॥ ८ **यत्र** वा० ॥ ९...........**रते**° प्र० । **वीतरागरते** मु० । मुद्रितपुस्तकगतोऽयं पाठः केनचिद् रिक्तस्थाने कल्पयित्वा पूरितः, न चासौ समीचीन इति ॥ १० °**राणां तु न श्रि**° प्र० वा० । निःपतिसुतानां **वा० टि०** ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

रागाद् भूपाल**बल्लाल-मल्लिकार्जुन**योर्मृधे । गृहीतौ येन मूर्धानौ, स्तनाविव जयश्रियः ॥ ४८
दक्षिणक्षितिपं जित्वा, यो जग्राह द्विपद्वयम् । तद्यशोभिः करिष्यामो, विश्वं नश्यद्विपद् वयम् ॥ ४९
विहारं कुर्वता वैरिवनिताकुचमण्डलम् । महीमण्डलमुद्दण्डविहारं येन निर्ममे ॥ ५०
पादलग्नैर्महीपालैः पशुभिश्च तृणाननैः । **यः मार्थित इवात्यर्थमहिंसाव्रतमग्रहीत्** ॥ ५१

भूपालोऽ**जयपालो**ऽभूत्, कल्पद्रुमसमस्ततः । चक्रे वसुन्धरा येन, काञ्चनैरनकिञ्चना ॥ ५२
दण्डे मण्डपिका हैमी, सह मत्तैर्मतङ्गजैः । दत्वा पादं गले येन, **जाङ्गलेशा**दगृह्यत ॥ ५३
जामदग्न्य इवोद्दामधामभर्त्सितभास्करः । क्षत्रास्रक्षालितां धात्रीं, श्रोत्रियत्राचकार यः ॥ ५४
दानानि ददतो नित्यं, नित्यं दण्डयतो नृपान् । नित्यमुद्वहतो नारीर्यस्याऽऽसीत् त्रिगणः समः ॥ ५५

धृतपार्थिवनेपथ्ये, निष्क्रान्तेऽत्र शतक्रतौ । जयन्ताभिनयं चक्रे, **मूलराज**स्तदङ्गजः ॥ ५६
चापलादिव बालेन, रिङ्गता समराङ्गणे । **तुरुष्काधिपते**र्येन, विप्रकीर्णा वरूथिनी ॥ ५७
यच्छिन्नम्लेच्छकङ्कालस्थलमुच्चैर्विलोकयन् । पितुः प्रालेयशैलस्य, न स्मरत्य**र्बुदाचलः** ॥ ५८
द्रुतमुन्मूलिते तत्र, धात्रा कल्पद्रुमाङ्कुरे । उज्जगामानुजन्माऽस्य, श्री**भीम** इति भूपतिः ॥ ५९
भीमसेनेन **भीमो**ऽयं, भूपतिर्न कदाचन । बकापकारिणा तुल्यो, राजहंसदमक्षमः ॥ ६०
मन्त्रिभिर्माण्डलीकैश्च, बलवद्भिः शनैः शनैः । बालस्य भूमिपालस्य, तस्य राज्यं व्यभज्यत ॥ ६१

वीरधवलवंशवर्णनम्

अथ तत्रैव **चौलुक्यवंशे** शाखान्तरोद्गतः । **अर्णोराजः** स राजर्षिस्तं ममर्ष न विप्लवम् ॥ ६२
धवलस्य सुतेनापि, तेन कृष्णानुकारिणा । राष्ट्रं निष्कण्टकीकर्तुमारेभे **सुभटेन** तत् ॥ ६३
विस्फुरत्तीव्रहेतीनां दवानामिव सर्वतः । दुष्टानां व्यधितानिष्टं, यत्कृपाणपयोधरः ॥ ६४
विर्चिन्वता रुचिं हैमीं, द्विषदुद्वेगदायिना । व्याप्तं यस्य प्रतापेन, यशसा च जगत्त्रयम् ॥ ६५
आ सम्भवादुदूढस्य, निर्व्यूढस्य च सङ्गरे । प्राणैरुद्यापनं चक्रे, निजशौर्यव्रतस्य यः ॥ ६६

तत्पुत्रः प्रसरत्कीर्तिपताकाचुम्बिताम्बरः । श्री**लावण्यप्रसादो**ऽस्ति, प्रासादः शौर्यसम्पदः ॥ ६७
आकाशमिव चन्द्रेण, पारीन्द्रेणेव काननम् । रम्यं तथाऽनतिक्रम्यं, कुलं येन बभूव तत् ॥ ६८
जघ्ने येनासिदण्डेन, गाढं, **नड्डूलनायकः** । निर्घातेनैव तेनामी, कम्पन्तेऽद्यापि भूभृतः ॥ ६९
न चौरास्तस्य सौराज्ये, दौरात्म्यं कुर्वते क्वचित् । स्वयमेव पुनः कीर्तिं, हरति प्रतिभूभुजाम् ॥ ७०
तेजस्तदिह दान्तारि, दशमस्तक-लङ्कयोः । बभूव भुजयोर्यस्य, राम-लक्ष्मणयोरिव ॥ ७१
पुण्डरीकं दधत्येकं, राजहंसाननेकशः । आकृष्टारियशःफेना, प्रतस्थे यस्य वाहिनी ॥ ७२
समन्ततोऽपि सामन्तगोष्ठ्यैर्निष्ठुरोक्तिभिः । नाऽऽसीन्नृपतिनागस्य यस्य लीलागतिक्षतिः ॥ ७३
पुरो मन्दरवद् वीक्ष्य यं निष्कम्पतया स्थितम् । विनिवृत्तमुपेत्यापि, **धाराधीश**पयोधिना ॥ ७४
दक्षिणः क्षोणिपालोऽपि, घनसैन्योऽल्पविक्रमः । येन तद्विपरीतेन, परित्यजति विग्रहम् ॥ ७५

१ श्रोत्रियस्य दत्ते श्रोत्रियत्राकरोति **वा० टि०** ॥ २ समुदायः **वा० टि०** ॥ ३ वेषः **वा० टि०** ॥ ४ °**र्णा विरू°** प्र० वा० ॥ ५ °**र्षिस्तं नामर्षत विप्ल°** मु० ॥ ६ **वितन्व°** वा० ॥ ७ °**षमुद्रे°** वा० ॥ ८ **नड्डूल°** वा० । **नड्डुल°** मु० ॥ ९ °**स्तत्र सौ°** मु० ॥ १० °**स्थे तस्य** मु० ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

श्रीवीरधवलस्तस्य, सूनुर्वीरशिरोमणिः । युद्धे जयश्रियं धन्व-ज्यारावैराजुहाव यः ॥ ७६

आत्मानमात्मजे तस्मिन्नशेषगुणभूषणम् । स पिता दर्पणप्राये, सङ्क्रान्तमिव पश्यति ॥ ७७

बाहुभ्यामिव विक्रान्तो, दन्ताभ्यामिव कुञ्जरः । अधृष्यः पितृ-पुत्राभ्यां, वंशस्ताभ्यां बभूव सः ॥ ७८

कृतविश्वमुदाऽनेन, दानेन प्रतिवासरम् । सुतेन जनता तेन, तातेन च समृध्यते ॥ ७९

अप्यरातिशराघातजातव्रणनतोन्नते । वीरलक्ष्मीश्चिरं यस्यै, वस्तुं वक्षसि वाञ्छति ॥ ८०

वीरः समरकासारे, शिरोभिः सह वैरिणाम् । करीव पुण्डरीकाणि, कन्दयुक्तानि योऽग्रहीत् ॥ ८१

अरातिराजन्यशराभिघातैः, प्रघातभूमौ पतितोत्थितो यः ।
गम्भीरवीरेन्द्रबलाम्बुराशेर्लब्ध्वैव गाधं पुनरुन्ममज्ज ॥ ८२

अथैकदा कन्दलितप्रतापसन्तापिताशेषविपक्षपक्षः ।
निशावसाने न निशातबुद्धिः, प्राबुध्यत श्रीलवणप्रसादः ॥ ८३

प्रबुद्धमात्रोऽपि कुमारपुत्रमाकारयामास नृपावतंसः ।
पुरोधसे तत् किल रात्रिदृष्टं, शिष्टाय तस्मै विनिवेदयिष्यन् ॥ ८४

समेत्य सोमेश्वरदेवनामा, नमस्य ते स्वस्ति निगद्य चास्मै ।
प्रसन्नमूर्तेः पुरतः स तस्य, दृष्टादरो विष्टरमाससाद ॥ ८५

पुरस्कृतस्यास्य पुरः पुरारिप्रसादलब्धं लवणप्रसादः ।
वीरेण तेनानुगतः सुतेन, तं स्वप्नमित्थं कथयाम्बभूव ॥ ८६

जानेऽद्य विद्याधरसुन्दरीभिर्दरीगृहद्वारविहारिणीभिः ।
शृङ्गारितं शृङ्गमहं महाद्रेरारूढवानूढवृषध्वजस्य ॥ ८७

कृतासनं तन्मणिवेदिकायां, जायाङ्कितामर्धतनुं दधानम् ।
प्रसन्नवक्त्राब्जमहं सिताब्जैर्जगत्पतिं पूजयितुं प्रवृत्तः ॥ ८८

विसृज्य पूजामथ मन्मथारेः, समाधिमुद्रां विदधामि यावत् ।
तावत् पुरः कामपि वामनेत्रां, राकामिवाऽऽकारवतीमपश्यम् ॥ ८९

श्वेतांशुतुल्यं वदनं वहन्तीं, श्वेतांशुकां श्वेतविलेपनां ताम् ।
श्वेतां कराग्रे दधतीं च मालामालोक्य बालामतिविस्मितोऽस्मि ॥ ९०

कस्यासि ? काऽसि ? त्वमिहासि कस्मादिति ब्रुवे यावदुपागतां ताम् ।
तावत् तयैवाभिहितोऽस्मि कान्तदन्तद्युता दत्तसितातपत्रः ॥ ९१

हे वीर ! वैरिध्वजिनीगजेन्द्रगण्डस्थलीखण्डनखड्गचण्ड ! ।
प्रत्यर्थिसार्थेन कदर्थ्यमानां, जानीहि मां गूर्जरराज्यलक्ष्मीम् ॥ ९२

---

१ सः मु० ॥ २ °स्य वासं वक्ष° मु० ॥ ३ प्रपात° प्र० ॥ ४ °लब्धावगा° प्र० । °लब्धैर-गाधं मु० ॥ ५ वा० आदर्शे पदच्छेददर्शनद्वारा नमस्यते इति एकं पदं दर्शितमस्ति ॥ ६ तुभ्यम् प्र० टि० ॥ ७ ईश्वर वा० टि० ॥ ८ कैलाश प्र० टि० ॥ ९ ध्यानम् प्र० टि० ॥ १० पुनः मु० ॥ ११ °लामिति° वा० ॥ १२ °लीमण्डनखण्डचण्ड वा० मु० ॥ १३ °राजल° मु० ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दिवं गतास्ते बत ! गूर्जरेन्द्रास्ते कुञ्जरेन्द्राश्च हताः सपत्नैः ।
येषां क्षमाभृद्दलनक्षमेषु, भुजेषु दन्तेषु च मे निवासः ॥ ९३

यो वर्तते सम्प्रति चक्रवर्तिपदेऽत्र बालः स बलान्यरीणाम् ।
क्षमः समग्राणि न निग्रहीतुं, दीपस्तमांसीव तटस्थितानि ॥ ९४

ये मन्त्रिणो येऽत्र च मण्डलीकास्तेषु क्रमो नास्ति पराक्रमोऽस्ति ।
प्रतिक्रिया काऽस्तु ततोऽस्ति येषां, कामो मयि स्वामिपरिग्रहेऽपि ॥ ९५

आस्ते सहस्तः स पुमान् न कोऽपि, यो मामिमामुद्धरते निमग्नाम् ।
ग्रहीतुमेते हि सतां विभूतिं, शतं वितन्वन्ति नराः कराणाम् ॥ ९६

सौवस्तिको नास्ति स आमशर्मा, वर्मायितं येन सुधर्मणा मे ।
गतः स मुञ्जालसुतश्च मन्त्रैर्यः क्षत्रसर्पानकरोद् विदर्पान् ॥ ९७

न राष्ट्रकूटान्वयकैटभारिः, प्रतापमल्लोऽस्ति मृधैकमल्लः ।
गन्धोऽपि मत्तारिमतङ्गजानां, गन्धद्विपेनेव न येन सेहे ॥ ९८

विना जगद्देवमिमामवस्थां, नीता निजैरेव परैरिवाहम् ।
यत्र स्थिते वेत्रिणि शङ्कितैर्न, द्विष्टैः प्रविष्टं पुरि गूर्जराणाम् ॥ ९९

अवाप्तवेदाम्बुधिरोधसा च, पुरोधसा तेन कुमारनाम्ना ।
विनाऽद्य वैद्यक्षितिपाललक्ष्मीं, को मे करिष्यत्यपरः सपत्नीम् ? ॥ १००

या मूलराजान्वयजातराजतेजोभिरासीद् विरमत्तमस्का ।
निशागमे साम्प्रतमुद्वसायां, तस्यां न दीपोऽपि नरेन्द्रपुर्याम् ॥ १०१

निरन्तरं सञ्चरतां गजानां, या डिण्डिमैरुड्डमरा ध्वनद्भिः ।
एकाकिनी रात्रिषु गूर्जराणां, सा पूत्करोतीव शिवारुतैः पूः ॥ १०२

क्रीडावतीनां नगराङ्गनानां, वक्त्रैः सदा यत्र सरोजसत्ता ।
सरस्तदश्रूणि किरत्यनाथं, वातास्तपाथःकणकैतवेन ॥ १०३

मुण्डेव खण्डितनिरन्तरवृक्षखण्डा, निष्कुण्डलेव दलितोज्ज्वलवृत्तवप्रा ।
दूरादपास्तविषया विधवेव दैन्यमभ्येति गूर्जरधराधिपराजधानी ॥ १०४

तन्मां स्वचक्र-परचक्रहतावशेषां, निःशेषिताखिलसपत्न ! समुद्धरस्व ।
यस्मादमानवचरित्रपवित्रितेन, सम्भावनाऽत्र भवता भुवनेऽर्जिताऽसौ ॥ १०५

एकेन केशिरिपुणा विधृतं यदुच्चैर्भारेण भङ्गुरमिवासुरभूपतीनाम् ।
तद्वीर ! वीरधवलेन सुतेन भूयः, सम्भूय भूवलयमुद्धर सम्प्रति त्वम् ॥ १०६

---

१ हताः प्र० वा० ॥ २ तु प्र० वा० ॥ ३ मुञ्जील° मु० ॥ ४ राठउड वा० टि० ॥ ५ °द्य वैद्य° वा० ॥ ६ °रजत्त° मु० ॥ ७ सा फूत्क° मु० ॥ ८ तस्मात् स्व° मु० ॥ ९ तद्वीर ! वा० ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

व्याहृत्य कृत्यमिति सा सहसा च कण्ठपीठे निवेश्य विशदामिह पुष्पमालाम् ।
कुत्रापि तत्रभवती सह निद्रया मे, याताऽथ यूयमिह जल्पत भोः किमेतत् ? ॥ १०७

इत्थं वदन्नथ हरिप्रतिहस्तकोऽसौ, सौवस्तिकेन जगदे जगदेकवीरः ।
स्वप्नोऽयमर्थमकदर्थनया ददानो, व्याख्यानमिच्छति भवान्निव नैव देव ! ॥ १०८

राजन्य ! धन्यतममन्यमहं न मन्ये, ग्रस्तारिवीरभुजवैभवतो भवन्तः ।
या न स्पृशत्युपनतानपरान् कदापि, यत् त्वामुपेन्द्रमिव सा वृणुते स्वयं श्रीः ॥ १०९

युष्मादृशामसदृशान्वयसम्भवानां, न श्लाघ्यते जगति केन कुलार्गलाऽसौ ? ।
अग्रेसरीभवति दुश्चरितप्रवृत्तौ, या सङ्गरव्यतिकरापसृतौ तु पश्चात् ॥ ११०

उद्गच्छतस्तव रवेरिव सम्पराये, छायेव सम्मुखमुपैति न शत्रुसेना ।
दीपाङ्कुरा इव दशान्तमुपेयिवांसस्तेजो निजं मुकुलयन्ति च मण्डलीकाः ॥ १११

आनीतवानसि गुणैर्गुरुभिः स्वकीयैर्बद्ध्वा नृपश्रियमिमां सुभटोपभोग्याम् ।
सन्मन्त्रिभिस्तदनुरञ्जय मञ्जुमूर्ते !, व्यावर्तते नहि यथा त्वदसौ स्थिताऽसौ ॥ ११२

दृप्यद्भुजाः क्षितिभुजः श्रियमर्जयन्ति, नीत्या समुन्नयति मन्त्रिजनः पुनस्ताम् ।
रत्नावलीं जलधयो जनयन्ति किन्तु, संस्कारमत्र मणिकारगणः करोति ॥ ११३

पित्रा विचित्रचरितानुकृताऽच्युतेन, तेनाथ **वीरधवलो** बलवान् नियुक्तः ।
युक्तश्च भूभरसमुद्धरणे विधात्रा, चिन्तां चकार सचिवेषु शुचिक्रियेषु ॥ ११४

अथ दशरथकल्पस्त्यक्ततल्पः प्रभाते, स च नृपतिरपत्यं तच्च रामोपमेयम् ।
स च परिचरणीयो **गूर्जराणां** विशिष्टप्रतिकृतिरुदतिष्ठत् कर्म साध्यं विधातुम् ॥ ११५

॥ इति गूर्जरेश्वरपुरोहितश्रीसोमेश्वरदेवविरचिते कीर्तिकौमुदीनाम्नि महाकाव्ये नरेन्द्रवंशवर्णनो नाम द्वितीयः सर्गः ॥ २ ॥

---

१ पूज्या **प्र० टि०** ॥ २ **ना** वा० ॥ ३ अकष्टेन **प्र० टि०** ॥ ४ °**र्थतया** मु० ॥ ५ °**रिवैरिभुजवैभवतो भवन्तः** वा० ॥ ६ **यदापि** वा० ॥ ७ **सन्मुख**° वा० ॥ ८ तथा **प्र० टि०** ॥ ९ °**दवस्थि**° मु० ॥ १० वर्द्धयति **प्र० टि०** ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तृतीयः सर्गः ।

वस्तुपालवंशवर्णनम्

रसालङ्करणे तस्मिन्नालवालानुकारिणि । प्रांशुः **प्राग्वाट**वंशोऽभूत्, **पुरे गूर्जरभूभुजाम्** ॥ १

त्वचि साराः परे वंशाः, सदा पत्राणि बिभ्रति । क्रियासारैश्च वंशोऽयं, धत्ते पात्रपरम्पराम् ॥ २

नररत्नैर्यदुत्पन्नैरुद्भूताद्भुतकान्तिभिः । विभूषिता विशेषेण, जगतीव सरस्वती ॥ ३

मन्त्रिमण्डलमार्तण्ड**श्चण्डपः** प्रथमः पुमान् । कुले तस्मिन्नुदेति स्म, तमसामवसानकृत् ॥ ४

चाणक्यादिव चातुर्यं, गिरमाङ्गिरसादिव । अम्भोधेरिव गाम्भीर्यं, यः शुभैकाग्रहोऽग्रहीत् ॥ ५

न च्छिद्रं क्षुद्रमप्यत्र, मन्त्रिरत्ने निवेशितम् । धात्रा केन प्रकारेण, सोऽनुस्यूतगुणः कृतः ? ॥ ६

मानी नामन्यत श्लाघ्यां, यः श्रियं सरसीरुहाम् । यैर्मनागपि न म्लानमिनपादावधीरितैः ॥ ७

तद्भू**श्चण्डप्रसादो**ऽभूद्, गङ्गाडिण्डीरपाण्डुभिः । यशोभिः ककुभां येन, चक्रे श्रीखण्डमण्डनम् ॥ ८

कदाचिदपि न त्यक्तः, पाणिपद्मगृहीतया । गेहिन्येव वदान्योऽयं, नृपव्यापारमुद्रया ॥ ९

मृदुर्वाणी मतिस्तीक्ष्णा, साधुः श्रीः कीर्तिरित्वरी । वीतरागं मनो यस्य, स्फीतरागं करद्वयम् ॥ १०

यः पराभूतकर्पूरैः, कीर्तिपूरैर्निरन्तरम् । चिरं विरचयामास, राकामाकालिकीमिह ॥ ११

सोमः समुद्गतस्तस्मादुज्जगाम मनोरमः । सवित्री जातमात्रेण, येन द्यौरिव दिद्युते ॥ १२

अपूर्वः कोऽपि सोमोऽयं, कलङ्कविकलाकृतिः । न हि मारपुरस्कारं, चक्रे भावं च नो भवे ॥ १३

निदधे गुणरत्नानां, यत्र कोशः स्वयम्भुवा । तत्र श्री**सिद्धराजो**ऽपि, रत्नकोशं न्यवीविशत् ॥ १४

स्वं मेने येन **सोमेन**, पूर्णेनाभ्यर्णवर्तिना । गृहीतानन्तभोगः [12]श्री**सिद्धेशो**ऽधिकमीश्वरात् ॥ १५

सावित्रं बिभ्रता तेजः, **सीतां** च सहचारिणीम् । काकुत्स्थेनेव येनापि, न दीनातिक्रमः कृतः ॥ १६

अमेयमहिमा श्रीमा**नश्वराज**स्ततोऽभवत् । येन दानार्द्रहस्तेन, हस्तिराजोऽप्यजीयत ॥ १७

तस्मान्निरन्तरत्यागस्थगिताश्रितदुःस्थितैः । [15]निर्जरैरिवन्द्रियैर्लब्धा, कामना न मनागपि ॥ १८

आनीतं न्यायतो वित्तं, व्ययितं धर्मकर्मसु । यशस्तु जगति स्तुत्यं, केवलं यस्य तिष्ठति ॥ १९

प्राकृतां रेणुकाबाधां, स्मरन्ननुशयादिव । मातुर्विशेषतश्चक्रे, भक्तिं यः पुरुषोत्तमः ॥ २०

जनन्या जठरे मासानध्युवास दशैव यः । हृदयाम्भोरुहे तस्य, यावज्जीवमियं पुनः ॥ २१

---

१ °**रस्थवं**° प्र० वा० ॥ २ इच्छा तेजश्च **प्र० टि०** ॥ ३ तमसां दुष्टानाम् **प्र० टि०** ॥ ४ अन्त **प्र० टि०** ॥ ५ **चाणिक्या**° वा० ॥ ६ °**त्ने न्यवेशयत् । धात्रा(ता) के**° मु० ॥ ७ तथापि **प्र० टि०** ॥ ८ इनः–सूर्यः, पाद–किरणाः, अवधीरित–अवगणित, अनस्वामीपादैः **प्र० टि०** ॥ ९ अकालभवाम् **प्र० टि०** ॥ १० मरणं कामश्च **प्र० टि०** ॥ ११ भवः–संसारः शिवश्च **प्र० टि०** ॥ १२ **श्रीसमिद्धः सोऽधिक**° वा० । **श्रीसमिद्धोऽधिक**° मु० ॥ १३ सवित्र्या इदं सवितुरिदम् **प्र० टि०** ॥ १४ **यस्मा**° प्र० ॥ १५ **निर्जरैरिवे**° मु० ॥ १६ °**गत स्तु**° प्र० ॥ १७ चक्रवर्ती **प्र० टि०** ॥ १८ **यस्य** प्र० ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सततं सचिवश्रेणिमाणिक्यस्याङ्गसङ्गिनी । कान्ता **कुमारदेवी**ति, तस्य कान्तिरिवाभवत् ॥ २२

स्वाभाविकेन शौचेन, मान्याः सुमनसामपि । प्रवाहा इव जाह्नव्यास्तया सूताः सुतास्त्रयः ॥ २३

मुख्यः श्री**मल्लदेवा**ख्यो, **वस्तुपाला**ह्वयस्ततः । **तेजःपाला**भिधः पश्चात्, त्रयी भाति त्रयीव सा ॥ २४

पुरुषाणामिमास्तेषां, परेषामिव मूर्तयः । त्रिधा विभिद्यमाना अप्येकैव परमार्थतः ॥ २५

स्वयं शुद्धेषु यत् तेषु, गुरुणा शौचशिक्षणम् । घनसारपरागेण, मार्जनं मौक्तिकेषु तत् ॥ २६

तैर्लब्धं **मल्लदेवे**न, यशः शुभ्रं विभाव्य यैत् । शिष्टैर्न विष्टपे दृष्टं, कैरवं कैरवश्रया ? ॥ २७

इयती **मल्लदेव**स्य, कौस्तुभेन विभिन्नता । जिनो हृदि यदेतस्य, जिनस्य त्वपरः सदा ॥ २८

वस्तुत्वं **वस्तुपाल**स्य, सैव वेत्ति सरस्वती । तदीयवदनाम्भोजे, या वसत्यनुवासरम् ॥ २९

स्थितं पुरुषयोर्मध्ये, पूर्वजानुजयोस्तयोः । मन्यते मध्यमं यः स्वमुत्तमं तं जनः पुनः ॥ ३०

किमस्तु **वस्तुपाल**स्य, मन्त्रीन्दोः साम्यमिन्दुना ? । यद् दत्ते वसुधामेष, सुधामेवापरः पुनः ॥ ३१

वृद्धिं न्यग्रोधशाखीव, स प्राप्नोति यथा यथा । क्षमालङ्करणः केषां, नाश्रयः स्यात् तथा तथा ? ॥ ३२

षड्भिरेव गुणैर्येन काऽपि कीर्तिपटी कृता । वसुन्धरा धराऽम्भोधिसहिता पिहिता यया ॥ ३३

मन्ये मनसि साधूनां, यो वसत्यनुवासरम् । यदनुक्तोऽपि जानीते, विधत्ते च तदीप्सितम् ॥ ३४

अहङ्करोति नात्मानं, त्वङ्करोति न सद्गुरून् । यः पुनः प्रधनारम्भे, हुङ्करोति विरोधिनः ॥ ३५

दयिता **ललितादेवी,** यस्य सर्वाङ्गहारिणी । अर्धाङ्गहारिणीं पत्युः, पार्वतीं हसतीव या ॥ ३६

तस्मादमात्यजीमूतात्, सुक्षेत्रेऽस्मिन् सुताङ्कुरः ।
जयसिंहाह्वयः सोऽयं, बालोऽपि फलितः सताम् ॥ ३७

पूर्वे सर्वेऽपि तार्यन्ते, निस्तार्यन्ते तथाऽर्थिनः । एतेन यस्य पोतेन, प्रतार्यन्ते न तु प्रजाः ॥ ३८

तेजःपालः पुनस्तेषु, सोदरेषु लघुः किल । निजप्रभुप्रसादेन, गुरुणाऽपि न लङ्घ्यते ॥ ३९

छन्दःशास्त्रे श्रुताऽस्माभिर्लघुताऽपि क्वचिद् गुरोः । तस्मिन् बन्धुजने दृष्टा गुरुताऽस्य लघोरपि ॥ ४०

अश्वराजात्मजावेतौ, नासत्यावमृतौषधैः । सम्प्रति प्रतिकुर्वाते, सर्वमप्यातुरं जगत् ॥ ४१

अमी सुमनसस्तेन, स्पर्धन्तामुद्धताः कथम् ? । सोऽपि सद्बुद्धिना येन, जितः सुमनसां गुरुः ॥ ४२

अपूर्वं तस्य वैदुष्यं, यद् दिक्पालैः स्वभूभुजा । समानैर्दशभिः सार्धं, मेने सन्ध्यक्षराणि यैः ॥ ४३

शुभस्वभावमालोके, लोकेऽस्मिन्नेकमेव तम् । यदुक्तं तत् करोत्येव, यत् कृतं तन्न वक्ति यः ॥ ४४

उपकृत्य कृती पुंसां, वित्ते तेषां न केवलम् । अपि यः स्तुतिलक्ष्मायां, सचिवेन्दुर्गतस्पृहः ॥ ४५

उपकर्ता सतामन्यैरुपकारयिता च यः । हरते हि मरुत् तापं, हारयत्यपि वारिदैः ॥ ४६

वात्ययेवोन्नतिं नीतः, श्रिया तृणसमः पुमान् । क्षमां त्यजति न त्वेष, शिखरीवोदयन्नपि ॥ ४७

अपूर्वं मन्त्रिमाणिक्यं, चाणक्यमिह मन्महे । वसुधावलये येन, सदानन्दोदयः कृतः ॥ ४८

यद्यप्य**नुपमा** नाम, प्रेयसी तस्य मन्त्रिणः । मूर्त्या तथापि मन्येऽहमेनां मेनाङ्गजामिव ॥ ४९

लावण्यसिंहनामानं, सा लावण्यवतंसिता । तनयं जनयामास, विनयावर्जितप्रजम् ॥ ५०

---

१ **शौर्येण, मा°** मु० ॥ २ **यह्ल°** मु० ॥ ३ **तत्** मु० ॥ ४ **यत्** मु० ॥ ५ **°कृत्यै** मु० ॥ ६ **°सचिवो दुर्गं°** मु० ॥ ७ **चाणिक्य°** वा० ॥ ८ **°सिनम्** मु० ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वस्तुपाल-तेजःपालयोः मन्त्रिमुद्रार्पणम्

भूमिभर्तुरथ कर्तुमिच्छतस्तस्य सत्पुरुषसङ्ग्रहं श्रिये ।
एकदा हृदयमागताविमौ, दीप्तशीतकरणाविवाम्बरम् ॥ ५१
तद्गुणान् निपुणया मनीषिणामग्रणीर्धिषणया विमृश्य सः ।
आजुहाव च समागतौ च तौ, कार्यसिद्धिरविलम्बिनी सताम् ॥ ५२
तत्र तौ ददृशतुः शतक्रतुप्रायमायतभुजं महीभुजम् ।
सानुजं च सचिवं स दृष्टवानर्थजुष्टमिव धर्ममग्रतः ॥ ५३
तावुपायनमुपायपण्डितौ, मण्डितौजसिकपद्धतेः पुरः ।
उद्रणय्य चरणद्वयं मुदा, तस्य वीरतरणेः प्रणेमतुः ॥ ५४
तेन वेनतनयानुकारिणा, कर्तुमात्मकरणाधिकारिणौ ।
सप्रसादवदनेन सादरं, सोदरौ समुपवेशिताविमौ ॥ ५५
तस्य निर्दलितभूरिभूभृतः, स्वर्पतिप्रतिकृतेः कृतासनौ ।
अश्वराजतनुजौ रराजतुस्तौ सुरा-ऽसुरगुरूपमौ पुरः ॥ ५६
एतयोर्विनयनम्रमस्तकन्यस्तसम्पुटितपाणिपद्मयोः ।
निर्ममे समदशत्रुदन्तिनामङ्कुशः स कुशलानुयोजनम् ॥ ५७
नीलनीरदरवानुवादिना, नादयन्नथ दिशः स्वरेण सः ।
तौ पुनश्चरितचातकव्रतौ, वक्तुमारभत मारसन्निभः ॥ ५८

आकृतिर्गुणसमृद्धिशंसिनी, नम्रता कुलविशुद्धिसूचिका ।
वाक्क्रमः कथितशास्त्रसङ्क्रमः, संयमश्च युवयोर्वयोऽधिकः ॥ ५९
श्लाघ्यतां कुलमुपैति पैतृकं, स्यान्मनोरथतरुः फलेग्रहिः ।
उन्नमन्ति यशसा सह श्रियः, स्वामिनां च पुरुषैर्भवादृशैः ॥ ६०
यौवनेऽपि मदनान्न विक्रिया, नो धनेऽपि विनयव्यतिक्रमः ।
दुर्जनेऽपि न मनागनार्जवं, केन वामिति नवाकृतिः कृता ? ॥ ६१
आवयोस्तु पितृ-पुत्रयोर्महानाहितः क्षितिभरः पुरद्रुहा ।
तद् युवां सचिवपुङ्गवावहं, योक्तुमत्र युगपत् समुत्सहे ॥ ६२
विद्युदञ्चलचलाचलां श्रियं, सन्निवेश्य सचिवेषु साधुषु ।
सम्प्रहारभरसम्भृतश्रमाः, शेरते सुखममी क्षमाभुजः ॥ ६३
येन केन च सुधर्मकर्मणा, भूतलेऽत्र सुलभा विभूतयः ।
दुर्लभानि सुकृतानि तानि यैर्लभ्यते पुरुषरत्नमुत्तमम् ॥ ६४
मत्पितुर्भुजयुगेन संयुगादाहृतां जितयुगश्रिया श्रियम् ।
अक्षरक्षणविचक्षणौ युवां, नित्यमेधयतमिद्धया धिया ॥ ६५

---

१ उद्गुणं° प्र० ॥ २ स्वःष्पति वा० । स्वःपति° मु० ॥ ३ °वयं, यो° मु० ॥ ४ °चलश्रि° वा० मु० ॥ ५ °केनचन धर्म° प्र० ॥ ६ व्यवहार प्र० दि० ॥

Jain Education International   For Private & Personal Use Only   www.jainelibrary.org

इत्युदीर्य भुजवीर्यशालिना, मुद्रिता दशनचन्द्रिकाऽमुना ।
वस्तुपालवदनारविन्दतः, स्यन्दते स्म मधु वाग्मयं ततः ॥ ६६

देव ! सेवकजनः स गण्यते, पुण्यवस्तु गुणवत्सु चाग्रणीः ।
यः प्रसन्नवदनाम्बुजन्मना, स्वामिना मधुरमेवमुच्यते ॥ ६७

सप्रसादवदनस्य भूपतेर्यत्र यत्र विलसन्ति दृष्टयः ।
तत्र तत्र शुचिता कुलीनता, दक्षता सुभगता च गच्छति ॥ ६८

जायते जलदवृन्दवृष्टिभिः, शाखिनां सफलता शनैः शनैः ।
तुष्यतां क्षितिभृतां नु दृष्टिभिस्तत्क्षणादपि नृणां फलोदयः ॥ ६९

नास्ति तीर्थमिह पार्थिवात् परं, यन्मुखाम्बुजविलोकनादपि ।
नश्यति द्रुतमपायपातकं, सम्पदेति च समीहिता सताम् ॥ ७०

जीवनाय मनुजन्मनामिह, भ्राम्यतामथ कदापि स प्रभुः ।
त्वादृशो भवति भाग्ययोगतो, वेत्ति यः सदसतां यदन्तरम् ॥ ७१

किन्तु विज्ञपयिताऽस्मि किञ्चन, स्वामिना तदवधार्यतां हृदा ।
न्यायनिष्ठुरतरा गिरः सतां, श्रोतुमप्यधिकृतिस्तवैव यत् ॥ ७२

सा गता शुभमयी युगत्रयी, देव ! सम्प्रति युगं कलिः पुनः ।
सेवकेषु न कृतं कृतज्ञता, नापि भूपतिषु यत्र दृश्यते ॥ ७३

ते राजानः स्वर्गताश्चक्रिरे यैर्वी रैवैरिक्ष्मापतीनां प्रबन्धाः ।
तेऽपि प्राप्तास्तत्र सन्मन्त्रिणो ये, श्लोकांस्तेषां शोधयन्ति स्म शुद्धाः ॥ ७४

दृष्टिर्नष्टा भूपतीनां तमोभिस्ते लोभान्धान् साम्प्रतं कुर्वतेऽग्रे ।
यैर्नीयन्ते वर्त्मना तेन यत्र, भ्रश्यन्त्याशु व्याकुलास्तेऽपि तेऽपि ॥ ७५

न सर्वथा कश्चन लोभवर्जितैः, करोति सेवामनुवासरं विभोः ।
तथापि कार्यः स तथा मनीषिभिः, परत्र बाधा न यथाऽत्र वाच्यता ॥ ७६

पुरस्कृत्य न्यायं खलजनमनादृत्य सहजानरीन् निर्जित्य श्रीपतिचरितमाश्रित्य च यदि ।
समुद्धर्तुं धात्रीमभिलषसि तत् सैव शिरसा, धृतो देवादेशः स्फुटमपरथा स्वस्ति भवते ॥ ७७

सचिववचनमेतच्चेतसा सोत्सवेन, क्षितितलतिलकोऽयं कर्ण्यमाकर्ण्य सम्यक् ।
अकृत कनकमुद्राकान्तिकिञ्जल्कसान्द्रं, करसरसिजयुग्मं मन्त्रियुग्मस्य तस्य ॥ ७८

अवनिपतिरनेन भूरिधाम्ना, सचिवयुगेन चिराद् विराजमानः ।
पतगपतिरिवारिनागनाशं, जनयति पक्षयुगेन संयुगे सः ॥ ७९

॥ इति श्रीगूर्जरेश्वरपुरोहितश्रीसोमेश्वरदेवविरचिते कीर्तिकौमुदीनाम्नि
महाकाव्ये मन्त्रप्रतिष्ठा नाम तृतीयः सर्गः ॥

---

१ वाङ्मयं वा० मु० ॥ २ °नां फललता प्र० ॥ ३ °रैर्वोरक्ष्मा° वा० मु० ॥ ४ °र्जितं वा० ॥ ५ धात्रीं समभिलषसि तच्छैष वा० ॥ ६ °ऽयं कृत्स्नमा° मु० ॥ ७ मन्त्रिस्थापना नाम वा० । मन्त्रिस्थापनो नाम मु० ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

चतुर्थः सर्गः ।

वस्तुपालस्य मन्त्रित्वावदातः

श्री**वीरस्य** धरोद्धारधुरीणस्योपधारणम् । चक्रतुः सचिवावेतौ, पादौ सुरगिरेरिव ॥ १

ताभ्यां कल्याणरूपाभ्यां मन्त्रिभ्यामधिकाधिकम् । नृपाखण्डलराज्यश्रीः, कुण्डलाभ्यामिव व्यभात् ॥ २

न्यायं निवेशयन्नुर्व्यां, निर्व्याजः स्वजनः सताम् । **स्तम्भतीर्थं** जगाम श्री**वस्तुपालो** विलोकितुम् ॥ ३

स्तम्भतीर्थे स्थितस्तीर्थप्रभाव इव मूर्तिमान् । केषां मुमोष नो दोषमीप्सितानि ददौ च यः ॥ ४

तमन्यमिव सश्रीकं, समुद्रमवलोकयन् । ईर्ष्ययेव पयोभङ्गैर्भ्रूभङ्गं विदधेऽम्बुधिः ॥ ५

कोऽप्यपूर्वः समुद्रोऽयमपापः पृथिवीतले । यस्मात् प्रसरति स्वादुरसपूरा सरस्वती ॥ ६

प्रविवेश पुरे तत्र, स पश्चान्मन्त्रिसत्तमः । तस्याऽऽगमे तु पौराणां, प्रमोदः प्रथमं हृदि ॥ ७

हट्टे हट्टे पटोत्तम्भस्तोरणं च गृहे गृहे । पुरुषे पुरुषे प्रीतिः, सम्प्राप्ते तत्र मन्त्रिणि ॥ ८

धान्यैर्धन्यमिव क्षेत्रं, फलैरिव घनं वनम् । सरः पूर्णमिवार्गोभिस्तेनाऽभूच्चारु तत् पुरम् ॥ ९

क्रूरैर्ग्रहैरिवाऽऽक्रम्य, मुक्तमन्यैर्नियोगिभिः । प्रीणात्येष पुरं मन्त्री, नक्षत्रमिव चन्द्रमाः ॥ १०

पुरं रोगैरिव ग्रस्तमपरैरधिकारिभिः । सद्वैद्य इव तन्त्रज्ञो, मन्त्री प्रतिकरोति यः ॥ ११

केनाऽप्यन्येन या चक्रे, सतां पीडाऽधिकारिणाम् । वार्यते **वस्तुपालेन**, सा सम्प्रत्यधिकारिणा ॥ १२

प्रत्यावृत्तिः कृतस्येव, कलेरिव गलग्रहः । बलेः पुनरिवोत्थानं, स मेने सुमनःशतैः ॥ १३

निशासु नीचसम्भोगसम्भूतधनकामना । सत्यत्र मन्त्रिमाणिक्ये, गाणिक्येनापि तत्यजे ॥ १४

सर्वत्रोच्छ्वसितं सद्भिः, खलानां म्लानमाननैः । निराकृतदुराचारं, व्यापारं तत्र तन्वति ॥ १५

सांयात्रिकजनो येन, कुर्वाणो हरणं नृणाम् । निषिद्धस्तदभूदेष, धर्मोदाहरणं भुवि ॥ १६

स्पृष्टा-ऽस्पृष्टनिषेधाय, विधायावधिवेदिकाम् । पुरेऽस्मिन् वारितस्तेन, तक्रविक्रयविप्लवः ॥ १७

धात्रा स्थानेषु भग्नेषु, ताम्यतामाश्रयः सताम् । सद्वंशः सद्गुणश्चायं, पटावास इवाभवत् ॥ १८

स्वामिना संप्रसादेन, पाणिर्यद्यपि मुद्रितः । तथाऽप्युन्मुद्रितस्तस्य, वित्तविश्राणनक्षणे ॥ १९

स्निग्धैः सम्भाषणैरेव, यस्य द्रविणवर्षिणः । अर्थिनामुपशाम्यन्ति, दौःस्थ्यनिःश्वासवायवः ॥ २०

स्थानभ्रष्टस्य यः साधोराधारः सारवत्तया । जटाजूटः सुरतःस्रोप्रवाहस्येव शाम्भवः ॥ २१

लोकेऽस्मिन्नवमन्वाने, जाने वैराग्यमागताः । सरस्वत्यास्पदं तीर्थमिव यं शिश्रियुर्गुणाः ॥ २२

महतां वर्त्तमानानां वित्तेनोपकरोति यः । स्वर्गतानां जरत्पूर्तकीर्तनोद्धरणेन तु ॥ २३

प्रासादास्तेन देवानामुद्धृताः कारिताश्च ये । नवत्वमेव विख्यातमसङ्ख्येष्वपि तेष्वभूत् ॥ २४

---

१ °**रूपिभ्यां** मु० ॥ २ **व्यधात्** मु० ॥ ३ °जः **सुमनः** वा० । °जः **सुजनः** प्र० ॥ ४ **तद्वैद्य** प्र० वा० ॥ ५ °**रिण** प्र० मु० ॥ ६ **सत्प्रसा**° मु० ॥ ७ °**तां विद्यमाना**° मु० ॥ ८ °**रत्कीर्तिकी**° वा० ॥ ९ **ते**° प्र० वा० ॥ १० **येष्व**° प्र० ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यन्न्यूनं यत्र यन्नष्टं, यस्तत्र तदचीकरत् । उत्पत्तिरुत्तमानां हि, रिक्तपूरणहेतवे ।। २५
अकल्पयदनल्पानि, देवेभ्यः काननानि यः । हरनेत्राग्नितापस्य, यत्र न स्मरति स्मरः ।। २६
रम्भासम्भावितैर्यस्य, वनैर्वृषनिषेवितैः । मनोज्ञसुमनोवर्गैः, स्वर्गसौन्दर्यमाददे ।। २७
सङ्गृहीतानि हारीत-शुक-चित्रशिखण्डिभिः । धर्मशास्त्रसधर्माणि, यस्योद्यानानि रेजिरे ।। २८
दर्शयन् सुमनोभावं, श्रीमत्तामतुलामयम् । काननानां स्वबन्धूनां, स्वबन्धूनामिवाऽकरोत् ।। २९
सरांसि राजहंसालीशालीन्ययमचीखनत् । तेनैव तुल्यता येषां, स्यादस्ताघतया तया ।। ३०
आददानाः पयःपूरं, यत्कासारेषु कासराः । विराजन्तेतरां पारावारेष्विव पयोधराः ।। ३१
अकारयदयं वापीरपापीयःक्रियारतः । सुधाया अपि माधुर्यं, यज्जलैर्गलहस्तितम् ।। ३२
ताः प्रपाः कारितास्तेन, यदीयं पिबतां पयः । तृप्यन्त्यास्यानि पान्थानां, न रूपं पश्यतां दृशः ।। ३३
भवार्णवतरी **ब्रह्मपुरी** येनात्र निर्ममे । यस्यां गायन्ति सामानि, नरा नार्यस्तु तद्यशः ।। ३४
स्फुटं वेष्टयता शुभ्रैः, कीर्तिकूटैः पटैरिव । दशाऽपि ग्राहिता येन, दिशः श्वेताम्बरव्रतम् ।। ३५
येन पौषधशालास्ताः, कारितास्तारितात्मना । मध्ये श्वेताम्बरैर्यासां, विशुद्धिः सुधया बहिः ।। ३६
यस्य पौषधशालासु, यतयः संवसन्ति ते । सदा येषामदाराणामात्मभूसम्भवैः कुतः ? ।। ३७
ज्ञानाख्यं यस्य तच्चक्षुर्वाचांदेवी ददे मुदा । नित्यं येनैष धर्मस्य, गतिं सूक्ष्मामपीक्षते ।। ३८
अयं जगति मध्यस्थः, स्पष्टं सृष्टिकृता कृतः । धर्माध्वानस्तदेतस्य, स्थिताः सर्वेऽपि तावति ।। ३९
नानर्च भक्तिमान् **नेमौ**, नेमौ शङ्कर-केशवौ । जैनोऽपि यः सवेदानां, दानाम्भः कुरुते करे ।। ४०
लभन्ते लोभतः पापाः, शापानन्ये नियोगिनः । अधिकारमधिकारममात्यः पात्यसौ पुनः ।। ४१

सिंहनराजस्य गूर्जरदेशोपरि अभियोगः

अथ **गूर्जरराज**राज्यलक्ष्मीं, रमणीयां चरचक्षुषा निरीक्ष्य ।
पृतनां द्रुतमादिदेश दूतीमिव तत्सङ्ग्रहणाय **दक्षिणेन्द्रः** ।। ४२

श्रीतसिङ्घनसैन्यसिंहनादप्रसरा **गूर्जरराज**राजधानी ।
हरिणीव हरिन्मुखावलोकं, चकितान्तःकरणा मुहुश्चकार ।। ४३

गृहमारभते न कोऽपि कर्तुं, कुरुते कोऽपि न सङ्ग्रहं कणानाम् ।
स्थिरतां क्वचनापि नैति चेतः, परचक्रागमशङ्कया प्रजानाम् ।। ४४

अवधीरितधान्यसञ्चयानां, बहुमानः शकटेषु मानवानाम् ।
विपदामुदये हि दुर्निवारे, शरणं चक्रभृदेव देहभाजाम् ।। ४५

समुपैति यथा यथा समीपं, रिपुराजध्वजिनी मदात् तदानीम् ।
परतः परतस्तथा तथाऽसौ, जनता जातभयोच्छ्रया प्रयाति ।। ४६

तदवेत्य जवेन **यादवेन्दो**र्बलमागच्छदतुच्छवीरवर्गम् ।
भृकुटीकुटिलं चकार कोपादलिकं श्री**लवणप्रसाददेवः** ।। ४७

१ °**दनेकानि** मु० ।। २ **यद्यशः** वा० ।। ३ °**वः कथम्** ? प्र० । अत्र **कथं**पदोपरि **प्र०** आदर्शे **कुतः** इति टिप्पणी कृता वर्त्तते ।। ४ **लोभतः** वा० मु० ।। ५ **श्रीसिङ्घन**° प्र० ।। ६ °**राद् गू**° प्र० ।। ७ °**रगर्वम्** मु० ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उपकण्ठमकुण्ठविक्रमस्य, स्फुरदुस्रप्रसरा हरिण्मयी स्रक् ।
शुशुभेऽस्य चुलुक्यभूपलक्ष्म्या, भयवत्या निहितेव बाहुवल्ली ॥ ४८

परिपन्थिवैरूथिनीं प्रभूतां, स नृपस्तुच्छपरिच्छपरिच्छदोऽप्यगच्छत् ।
बलिनाऽप्यरिणा रणप्रवृत्तौ, सुभटानां हि पदानि सम्मुखानि ॥ ४९

बलवारिधिराजगाम शत्रोरुपतापीतटमुर्वरोपतापी ।
रभसादभिधावति स्म वीरः, स महीतीरमहीनबाहुशक्तिः ॥ ५०

प्रचुरं तदरातिराजचक्रं, तदजय्यं च बलं चुलुक्यभर्तुः ।
विमृशन् बहुशोऽपि सन्दिहानो, न जनो निश्चिनुते स्थितिं गतिं वा ॥ ५१

रिपुसैन्यनिवेशभूः प्रजानां, विदिताऽभूदनिवेदिताऽपि दूतैः ।
गगनाङ्गणगाहनोल्बणैस्तज्ज्वलितग्रामसमूहधूमकूटैः ॥ ५२

भृगुकच्छमहीमहीनसरयां, चरतस्तानचिरेण वृष्णिवर्गान् ।
न बहूनपि दुर्जयानजय्यः, समरेऽमन्यत वीरकेसरी सः ॥ ५३

प्रसरत्यथ मत्सरप्रबन्धे, द्रुतमेकेन रणोल्बणं कृपाणम् ।
अपरेण सुतं करेण वीरं, सहसा संयति यान्तमेष दध्रे ॥ ५४

चतुर्णां मरुभूपानां लाट-गोद्रहनृपयोश्च गूर्जरत्रोपर्यभियोगः

क्षितिपान्तरविग्रहप्रसक्तौ, पितृ-पुत्रावथ विग्रहीतुमेतौ ।
विदितावसरैश्चिराच्चतुर्भिर्मरुभूपैः सहसोपचक्रमाते ॥ ५५

उभयोरनयोश्चतुर्भिरेभिर्विगृहीतिर्विहिताऽथ साऽपि पृष्ठे ।
इयतैव बुधैर्विभवनीयं, सुभटत्वं मृधमूर्ध्नि यस्य यावत् ॥ ५६

अथ गोद्रह-लाटदेशनाथौ, मरुनाथैर्निभृतं निबद्धसन्धी ।
विधुरे परिहृत्य तत्र मित्रद्वितयं तत्कटकादुपेयतुस्तान् ॥ ५७

असतोरबलं तयोः सतोर्वा, सबलं स्वं मनुते स्म नैष वीरः ।
जलधिर्विगतैरुपागतैः स्यान्नहि भिद्योद्धयजलैः क्षयी चयी वा ॥ ५८

पुरतो यदि सिङ्घनस्य सैन्यं, यदि पृष्ठे मरुभूभुजश्च तौ च ।
न बभूव तयोरचिन्त्यशक्त्योर्मुखरागस्य विपर्ययस्तथाऽपि ॥ ५९

पुरतः सरतो यदुप्रवीराननुगच्छन् समरे करीव मत्तः ।
व्यथितः प्रतिपार्थिवैः स पश्चात्, सपदि व्याववृते नृपः सकोपः ॥ ६०

जगति ज्वलिताखिलप्रदेशः, प्रचुरीभूतमलिम्लुचप्रचारः ।
सु परस्परविग्रहो ग्रहणामिव तेषामभवन्नरेश्वराणाम् ॥ ६१

१ °रा. हिरण्म° मु० ॥ २ क्ष्म्या, वलयत्या वा० ॥ ३ °विरू° प्र० वा० ॥ ४ सन्मुखा° प्र० वा० ॥ ५. °विबोधनी° मु० ॥ ६ यत्क° मु० ॥ ७ °हि नद्योधजलैः प्र० । भिद्य उद्धय इति एतन्नामानौ द्वौ महानदौ ॥ ८ °व सत्तमः । व्य° वा० ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अवलोक्य **चुलुक्यपार्थिवौ** तौ, विपरीतैर्बहुभिर्नृपैः परीतौ ।
खर-शीतकराविवाम्बुवाहैर्जनतेयं मनुते स्म दुर्दिनं तत् ॥ ६२

वलितेऽपि **चुलुक्यपार्थिवे**ऽस्मिन्, न कृतं तैर्यदुभिः पुरः प्रयाणम् ।
हरिणैरनुगम्यते न मार्गो, हरिणा तत्क्षणमाश्रितोज्झितोऽपि ॥ ६३

हरितं परिहृत्य चन्दनाद्रेरथ गन्तुं हिमभूभृतः प्रवृत्तः ।
अभवल्लवणप्रसादशूरः, प्रसरत्तीव्रतरप्रतापरौद्रः ॥ ६४

सहजा इति येषु बन्धुबुद्धिः, प्रथमाऽभूदथ तान् विकारकर्तॄन् ।
षडपि द्विषतो विमृश्य जेतुं, नृपवीरः स पुरश्चकार योगम् ॥ ६५

वस्तुपालस्य भेदनार्थं शङ्खराजेन दूतस्य प्रेषणम्

प्रसृतेऽथ महीक्षितां विरोधे, क्षयसिन्धाविव **सिन्धुराजसूनुः** ।
प्रणिधिं प्रणिधाय मन्त्रिणेऽस्मै, तृणवद् विश्वमपि स्मयेन पश्यन् ॥ ६६

चुलुकोद्भवभूपतेरमात्यं, भयकालेऽपि निराकुलं तमेत्य ।
प्रणिधिः प्रणिपत्य च प्रवीणो, विनयैच्छन्नमदामुवाच वाचम् ॥ ६७

सुभटैरपरैर्विमुक्तमस्त्रं, समरोर्वीषु य एक एव धत्ते ।
अथवा भुवने निराश्रयाणां, शरणं किन्नु तथाविधैर्विनाऽस्तु ? ॥ ६८

दलितेऽपि दले स्थितः समित्यां, **यदुभि**र्यो बहुभिर्धृतः कथञ्चित् ।
हृदयेषु गुणार्जितेषु तेषामपरेषामपि विश्रमं जगाम ॥ ६९

विधृतेऽपि सुतेऽत्र तत्सवित्री, न सपत्राकृतमानसा तथाऽभूत् ।
समरे हि भयङ्करेऽपि व्यक्तः, समसत्त्वेन न येन लज्जिताऽसौ ॥ ७०

अवलोकितमात्र एव गुप्तेर्यदुसिंहेन विमोच्य **सिंहनेन** ।
निदधे भुजपञ्जरे स्वयं यः, क लभन्ते गुणिनो हि न प्रतिष्ठाम् ? ॥ ७१

विधुरेऽपि न मुञ्चते निजं यः, कुलधर्मं च कुलान्वयप्रदीपः ।
स यदाह मदाननेन **शङ्खः**, शृणु तन्मन्त्रिशिरोमणे ! स्वपथ्यम् ॥ कुलकम् ॥ ७२

विषमेऽपि कथं स कृत्यमार्गे, स्खलतु श्री**लवणप्रसादपुत्रः** ? ।
प्रददाति पदे पदे प्रबुद्धः, सचिवो यस्य भवान् करावलम्बम् ॥ ७३

निपुणोऽसि गुणेषु षट्सु जाने, पुनरेषा तव धीरता कुतस्त्या ? ।
व्यसने समुपस्थितेऽपि भर्तुर्यदशङ्कः कुरुषेऽधिकारमेवम् ॥ ७४

अयि ! वेत्ति भवानपीदृशं यत्, पितृभुक्तिर्मम **पत्तनं** यदेतत् ।
स्वधनग्रहणार्थमागतोऽहं, समयज्ञोऽसि तदर्प्यतामिदं मे ॥ ७५

---

१ **पुनश्च**° मु० ॥ २ **महीभृतां** मु० ॥ ३ °**यच्छिन्न**° वा० ॥ ४ **तेष्वऽप**° वा० ॥ ५ °**रेऽपि भ**° वा० मु० ॥ ६ °**पि वक्तः** वा० । °**पि वक्तुः** मु० ॥ ७ **सिंहने**° वा० ॥ ८ °**लिष्ठाः** वा० ॥ ९ **स सत्य**° मु० ॥ १० °**ङ्कः पुरुषाधिकारमेकः** मु० ॥ ११ **अपि** मु० ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यदि सम्प्रतिपत्तिरस्ति चित्ते, नगरस्यास्य नियोगवासना च ।
प्रणम द्रुतमेत्य तत् प्रसन्ने, मयि दूरे न तवाधिकारमुद्रा ॥ ७६

अपरोऽपि विधास्यतेऽधिकारी, नगरे कश्चन पैतृके मयाऽस्मिन् ।
भजसे यदि मां ततः स्थिरैव, त्वयि मुद्राऽस्तु गुणाः प्रियाः प्रभूणाम् ॥ ७७

अथ चेतसि किञ्चिदन्यथा ते, स्थितमास्ते तदपि प्रियङ्करं नः ।
यदसाध्यविरोधिसाधनाय, प्रतिभूरेष ममास्ति खड्गदण्डः ॥ ७८

अवलेपमलीकमाश्रितो यः, प्रभुमल्पार्थिनमन्यथा करोति ।
कुपितेन स तेन दण्ड्यमानः, सह जीवेन ददाति वित्तजातम् ॥ ७९

सिन्धुराजदूतं प्रति वस्तुपालस्य प्रतिवचः

अथ स व्यथितोऽपि तद्वचोभिर्न विकारं प्रकटीचकार मन्त्री ।
मलिनत्वमुपैति वातनुन्नैर्न रजोभिः सुरवाहिनीप्रवाहः ॥ ८०

जगदे जगदेकबन्धुनैवं, सचिवेनाऽपसरद्वचाः स चारः ।
भवताऽभिहितं यदात्मभर्तुश्चरितं तन्न चमत्करोति कस्य ? ॥ ८१

तरणेरिव **सिन्धुराजसूनो**र्महसा दुष्प्रसहेन शुष्कदेहम् ।
दहति स्म सुखेन **लक्ष्मदेव**द्रुममुच्चैरपि **यादवेन्द्र**दावः ॥ ८२

समरैकरतेरमुष्य सत्त्वस्तुतिकोलाहलकाहलानिनादैः ।
श्रुतिमार्गमुपैति मर्त्यलोके, सुभटानामभिधाऽपि नापरेषाम् ॥ ८३

विपरीतमतित्वमस्य मन्ये, यदसावर्थयते पुरं तदेतत् ।
हयसैन्यसहायतोऽपि **सिंहा**न्नृपसिंहेन विगृह्य यद् गृहीतम् ॥ ८४

बहुभिः सह योद्धुमक्षमं मे, मनुते स्वामिनमेष तन्मृषैव ।
ननु निश्चलनिश्चयस्य पुंसस्त्रिदशा यान्ति सहायतां क्रियासु ॥ ८५

बकपाटकचेष्टितं न दृष्टं, न च **सिद्धेश्वर**सन्निधानयुद्धम् ।
किमनेन मनस्विनो यदस्य, क्षितिमाकाङ्क्षति लीलयैव लब्धुम् ? ॥ ८६

तनयः पितृवित्तमर्हतीति, व्यवहारः पुरुषान्तरेषु युक्तः ।
परसम्पदपेक्षिणां नृपाणां, स कृपाणे न कृतः पुनः प्रमाणम् ॥ ८७

तदुपेहि पतिं स्वमेवमस्मद्वचसा ब्रूहि च देव ! वेत्सि सर्वम् ।
अवलेपमिमं विमुञ्च नो चेदयमस्मि त्वमितो विचार्य कुर्याः ॥ ८८

---

१ °ग्रेप्सा° वा० मु० ॥ २ °भूरस्ति ममैष स्व° मु० ॥ ३ °मभ्यर्थि° मु० ॥ ४ °नापि सर° मु० ॥ ५ °देहः वा० ॥ ६ °धायिनां परे° मु० ॥ ७ यदेत° वा० ॥ ८ सिंहनादान्नृ° वा० ॥ ९ °नु निश्चयनिश्चलस्य वा० मु० ॥ १० °स्विना यदीशश्क्षिति° प्र० ॥ ११ °पममुं वि° मु० ॥ १२ त्वमितो मु० ॥

Jain Education International   For Private & Personal Use Only   www.jainelibrary.org

श्रुत्वा वचः सचिवचक्रशतक्रतोस्तद्, भूयोऽप्यभाषत रुषा परुषाक्षरं सः ।
आः ! किं ब्रवीषि मदमन्दमतिस्त्वमेवं ?, देवस्य तस्य नियतं नहि वेदिताऽसि ॥ ८९

कुर्वाणस्त्वयि शस्त्रधारणमसावस्मत्पतिर्लज्जते,
येनैकेन रणाङ्गणेऽवगणितः सेनाघनः **सिङ्घनः** ।
तत् ते चेतसि चेद् विचारकणिका काऽप्यस्ति तन्मुच्यतां,
मानोऽयं नयवेदिनाऽथ भवता वर्त्मेदमामुच्यताम् ॥ ९०

अथ सचिवमवश्यमाह्वाय, प्रवणमतिं मतिमानयं विदित्वा ।
पवन इव वनोन्मुखं कृशानुं, विभुमभिषेगनवाञ्छमभ्यगच्छत् ॥ ९१

॥ इति श्रीगूर्जरेश्वरपुरोहितश्रीसोमेश्वरदेवविरचिते कीर्तिकौमुदी-नाम्नि महाकाव्ये दूतसमागमनो नाम चतुर्थः सर्गः ॥ ४ ॥

१ **वर्मेदमा**° वा० मु० ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पञ्चमः सर्गः ।

सिन्धुराजेन साकं गूर्जरेश्वरस्य संग्रामः

कथितारिविचारेण, चारेण प्रेरितस्ततः । **सिन्धुराजात्मजः** सिन्धुर्वायुनेवोदजृम्भत ॥ १

कुपितः करवालेन, **सिन्धुराजाङ्गभू**र्बभौ । कल्पान्तविप्लुतः शम्भुः, कृतान्तेनेव सङ्गतः ॥ २

भृकुटीघटना भाले, तस्य भाति स्म भीषणा । त्र्यक्षचक्षुर्यया जिग्ये, युगान्तोद्भ्रान्तपावकम् ॥ ३

रुषा स्मितमुखः **शङ्खः**, शङ्खपाणिसमच्छविः । नाभवद् भीतये कस्य सितविद्युदिवाम्बुदः ? ॥ ४

स प्रतस्थे हयोद्धूतैः परागपटलैर्घनैः । प्रावृषं राजहंसानामकाले कल्पयन्निव ॥ ५

केकिपैत्रभयच्छत्रच्छन्ना तस्य पताकिनी । जङ्गमोद्यानलेखेव, दोःस्थितायां जयश्रियः ॥ ६

झटित्यागत्य साटोपो, **वटकूप**सरस्तटे । व्याचष्ट पटहोद्घोषैर्द्विषामेष स्वमागतम् ॥ ७

निस्वाननिस्वनानस्य, स्वकर्णाभ्यर्णमागतान् । उदस्तभृकुटीभङ्ग्या, मन्त्री प्रत्युदगादिव ॥ ८

मन्त्री यद्यपि गाम्भीर्याद्, भावं नाऽऽविश्चकार तम् । तथाप्येष कृतोत्थानैर्व्यक्तीभूतः शिरोरुहैः ॥ ९

सन्नद्धसैनिकः **शङ्खो**, भिन्नशङ्ख इव द्विपः । सङ्गरावेशदुर्वारः, सञ्चचार शनैः शनैः ॥ १०

[आविष्ट इव राधेयवधोग्रेण किरीटिना । स तदा सचिवश्चापमाममर्श मुहुर्मुहुः ॥]

स **चौलुक्यनृपा**मात्यः, सञ्चरत्यरिसञ्चये । सैन्यमारचयामास, त्रासमुक्तेन चेतसा ॥ ११

चन्दना-ऽगुरु-कर्पूर-कस्तूरीकुसुमस्रजः । स्वःस्त्रीसम्भोगमिच्छद्भिरिव धीरैर्विदध्रिरे ॥ १२

सन्नाहः सङ्गरारम्भसम्भवत्सत्त्वसम्पदः । उच्छ्वसत्यामममात्यस्य, न मात्यस्य तनौ तदा ॥ १३

दक्षिणेनांह्रिणा क्षोणिक्षोदनाज्जयशंसिनम् । आरुरोह जवादश्व**मश्वराजाङ्गसम्भवः** ॥ १४

श्री**वीरनृपमुद्रां** यः, सदा धारयते करे । वीरशूद्रकमुद्राऽपि, धृता तेन तदा हृदि ॥ १५

भटा **भुवनपाला**द्या, यद्यप्यग्रे तदाऽभवन् । तथापि स पुरस्तेषां पौरैः शूरतया मतः ॥ १६

अग्रे शङ्खचमूचक्रं, मध्ये प्रहरणाङ्गणम् । पारेरत्नाकरं वीरशिरोरत्नमसौ स्थितः ॥ १७

समासन्नेऽपि सङ्ग्रामे, शौर्योद्भेदं न भाषितैः । स चक्रे सचिवोत्तंसः, क्रियासारा हि तादृशाः ॥ १८

स्थितं सङ्ख्यमुखे शङ्खस्तं वीक्ष्य विकसन्मुखम् । पाणौ रणरसोत्तालः, करवालमलालयत् ॥ १९

स्थितेऽत्र सम्मुखे **शङ्खः**, प्रवेष्टुं नाशकत् पुरीम् । रोहिणीं रोषरौद्रोऽपि[6], यथा दशरथे शनिः ॥ २०

चलन्मन्त्रिबलोत्क्षिप्तः, क्षोणिरेणुगणोऽनणुः । उदैष्यतः प्रतापाग्नेर्धूमराशिरिवोत्थितः ॥ २१

धूलिध्वान्तोदये तस्मिन्, मुखोद्द्योतेन मन्त्रिणः । प्रतापः प्रकटीचक्रे, श्री**वीरधवल**प्रभोः ॥ २२

प्रभूतमपि तत् सैन्यं, क्षोभायाभून्न मन्त्रिणः । तेऽल्पेऽपि बहवो येषां, रणारम्भे स्थितं मनः ॥ २३

स्थितेन तेन धीरेण, कर्तुमद्वैतमात्मनः । गोष्ठीसमः समित्यां स, स्याद्वादी सचिवो यदि ॥ २४

---

१ **केतुप**° मु० ॥ २ **उदजृम्भ**° मु० ॥ ३ पद्यमिदमधिकं वर्त्तते **प्र०** आदर्शे ॥ ४ °**त्या अमा**° मु० ॥ ५ **क्षोणीक्षो**° प्र० ॥ ६ °**पि, व्यथादशरथो** मु० ॥ ७ **क्षोणीरेणुगणो ननु** मु० ॥ ८ °**त्वां यः, स्या**° मु० ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वाहिन्योस्तत्र सम्भेदे, स कोऽपि तुमुलोऽभवत् । यस्याग्रे मन्द्रतामेति, सामुद्रोऽपि महाध्वनिः ॥ २५
अवाञ्चितानि चापानि, भ्रुवोर्युग्ममुदञ्चितम् । सुभटैः कोपसाटोपैः, सेनयोरुभयोरपि ॥ २६
काण्डानां सह कोदण्डगुणैः सन्धिरजायत । तेषां वीरप्रकाण्डानां, विग्रहस्तु परस्परम् ॥ २७
कर्णे लगद्भिरन्येषामन्येषां जीवितव्ययम् । कुर्वाणैर्विदधे बाणैः, स्पष्टं दुर्जनचेष्टितम् ॥ २८
तत्राऽऽहवमहातीर्थे, विशिखैर्गुणनिर्गतैः । भित्त्वा विकर्तनं चक्रे, परस्मिन् पुरुषे लयः ॥ २९
विहाय शरधिं वेगाच्चापमापुः शिलीमुखाः । चिह्नमेतत् सपक्षाणां, विधुरे यत् पुरः स्थितिः ॥ ३०
वक्षो विक्षिप्य वैपक्षं, पत्रिणः परतो गताः । न चिरं निर्गुणैर्लभ्या, धीराणां हृदयवस्थितिः ॥ ३१
खड्गिनः खड्गिभिः कुन्तपाणयः कुन्तपाणिभिः । योधा योधैर्हयारूढा, हयारूढैश्च सङ्गताः ॥ ३२
मन्त्रीशकरसंसर्गादिव दानार्थमुद्यतः । असिरुत्सृष्टवान् कोशं, बद्धमुष्टिरपि क्षणात् ॥ ३३
वीराणां पाणि-पादाब्जैः, पूजितेवाऽऽहवक्षितिः । दत्तार्थेव च दूर्वाभकेशमिश्रैः शिरःफलैः ॥ ३४
अहिंसाव्रतभङ्गेन, का स्यात् तस्यात्र वाच्यता ? । पुरुषव्रतनिर्वाहो, येन तादृक् कृतस्तदा ॥ ३५
अहिंसाभङ्गसम्भूतां, मन्त्री मार्ष्टुं मनःखिदम् । चक्रे दिव्यमिव स्नानं, स शूरः शरवृष्टिभिः ॥ ३६
प्रभुप्रोत्साहनं पृष्ठे, मागधोत्तेजनं पुरः । विक्रान्तानां विशेषेण, जातं विक्रमवृद्धये ॥ ३७
उद्दिश्यापि द्विषा मुक्तैर्न मन्त्री बिभिदे शरैः । अदृष्टः कोऽपि शिष्टानां, बद्धकक्षो हि रक्षणे ॥ ३८
सुभटासृक्सरित्पूरः पुरस्ताद् दुस्तरो यदि । तथापि न विशश्राम, मन्त्री शत्रूनभि व्रजन् ॥ ३९
विभाव्य तमसम्भाव्यमवष्टम्भं रणे रिपोः । स्वचमूचरैः संहारमारब्धं च परैः पुरः ॥ ४०
वीरः **सङ्ग्रामसिंहो**ऽथ, सङ्ख्ये **शङ्ख**पराह्वयः । आविर्भावितवानुच्चैर्निजसंरम्भसौरभम् ॥ ४१
युग्मम् ॥
अपि भ्रूपल्लवोल्लासः, परैर्यस्य सुदुःसहः । तस्य **सङ्ग्रामसिंह**स्य, खड्गोल्लासं सहेत कः ? ॥ ४२
तमन्तकमिवाऽऽयान्तमनपेक्षितजीवितः । भटो **भुवनपाला**ख्यः, शङ्खे प्रत्यभिजग्मिवान् ॥ ४३
सखा **शङ्ख**स्य **सामन्तः**, सेनां सीमन्तयन्नरैः । बलाद् **गुलकुलो**त्तंसमभ्ययुङ्क्त तमन्तरा ॥ ४४
शास्त्रैः शस्त्रेषु भग्नेषु, तयोरप्रतिमल्लयोः । मल्लयोरिव सञ्जज्ञे, केशाकेशि भुजाभुजि ॥ ४५
वियति प्रेक्षमाणाभिरप्सरोभिर्मृधं तयोः । बहु मेने स्वकीयानां, चक्षुषामनिमेषता ॥ ४६
सामन्तमन्तकस्यान्तं, स नीत्वा सत्वरं पुनः । समं **सङ्ग्रामसिंहेन**, सङ्ग्रामं कर्तुमभ्यगात् ॥ ४७
शङ्खेन खड्गघातैस्तैः, खण्डं खण्डं कृतं वपुः । सङ्ख्ये **भुवनपाल**स्य, पौरुषं न तु खण्डितम् ॥ ४८
स वीरो मन्त्रिवीरस्य, **शङ्खा**सिन्यस्तमस्तकः । तस्य प्रभुप्रसादस्य, प्राणैरुच्छ्रूवणोऽभवत् ॥ ४९
श्रुत्वा **भुवनपाल**स्य, निधनं मृधमूर्धनि । मन्त्री तेनैव वैरेण, रणाय प्रवणोऽधिकम् ॥ ५०
प्रियं विक्रामतां क्रेतुमसुभिः सुलभं यशः । धृतासिः प्राविशद् वीरो **वीरमः** समरापणम् ॥ ५१
शङ्खपत्तिर्जयन्तश्च, मन्त्रिपत्तिश्च **वीरमः** । उभौ शम्भुसभां यातौ, सविवादौ जयश्रिये ॥ ५२
वैरिणामपि वीरेण, रणान्तर्व्ययितात्मना । वाचि **चाचिगदेवेन**, स्वबाहुस्तुतिराहिता ॥ ५३

१ **तुमलो** प्र० वा० ॥ २ **हृदयस्थितिः** प्र० ॥ ३ °**रसङ्घार**° वा० ॥ ४ **मङ्क्षुमिवमाया**° मु० ॥ ५ °**कृपाते**° मु० ॥ ६ **रुच्छ्राव**° प्र० वा० ॥ ७ **शम्भू समां या**° मु० ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्थित्वा विपद्यमानेन, भग्नेऽपि स्वचमूजने । पदे पदे कृतः स्तोमः, **सोमसिंहेन** सङ्गरे ॥ ५४
स्वामिशत्रुमहत्वाऽपि, मृतोऽस्मीति ह्रिया किल । **विजयेन** तथा यातं, नेहाऽऽयातं यथा पुनः ॥ ५५
क्ष्मातलक्षेपबुद्ध्येव, **शङ्खेन** दृढमाहतः । भटो **भुवनसिंहस्तु**, सपदि त्रिदिवं गतः ॥ ५६
प्राणेभ्योऽपि प्रियं शस्त्रं, क्षत्राणामिति निश्चयः । तथाऽ**भ्युदयसिंहेन**, त्यक्तास्ते नोज्झितं तु तत् ॥ ५७
स्वखड्गखण्डितैर्वीरशिरोभिर्विषमीकृते । पेते **विक्रमसिंहेन**, क्रोधान्धेन मृधाध्वनि ॥ ५८
विम्भ्यमः **कुलसिंहेन**..........दर्शनात् । वक्रा च विस्फुरत्कुन्ते, युद्धे वै कुण्ठबुद्धिना ॥ ५९
भित्वा भल्लीभिरङ्गेभ्यो, निर्गताननपङ्क्तिभिः । उद्दलन् शुशुभे तत्र, सोऽयं द्रुम इवोद्दलः ॥ ६०

पश्यतः सचिवं धीरं, तथैव स्थितमग्रतः । **शङ्खस्यापि** चमत्कारः, प्रससार तदा हृदि ॥ ६१
विकारवर्जितं वीक्ष्य, साक्षात् तं पुरुषं परम् । प्रबुद्धमिव **शङ्खेन**, विरमत्कोपसम्पदा ॥ ६२

चौलुक्यचन्द्रसचिवेन्द्रमवार्यशक्तिं, मत्वा स्थितं स्थगयताऽथ रजोभिराशाः ।
आकम्पितप्रचुरपत्रनृपांह्रिपेण, **शङ्खेन** यातमपसृत्य महाबलेन ॥ ६३
मन्त्रीश्वरोऽयमनुभूतभटोपमर्दः, सौवर्णपिण्ड इव सोढहुताशतापः ।
आनन्दकन्दलितबाष्पविलोचनेन, लोकेन पूजितमतीव बभाज तेजः ॥ ६४
सङ्ग्रामसिंहं स महानियोगी, योगी यथा योगबलेन कालम् ।
संहर्तुमायान्तमतीत्य चक्रे, कुशाग्रबुद्धिः कुशलं पुरस्य ॥ ६५
संवीक्ष्य वीररसरोपितरोमराजिराजिक्षितिं क्षतभटामिषगर्द्धिगृद्ध्राम् ।
मन्त्री न्यवर्तत ततः प्रेमदाश्रुपूतैः, सूतैः पुरः प्रतिपदोदितदोर्विभूतिः ॥ ६६
सन्धाय बन्धुनताजनितोपरोधाद्, दूरे विरुद्धहृदयोऽपि समं नृपस्तैः ।
पुत्रेण तेन सह दुःसहपौरुषेण, सोऽथाऽऽससाद नगरीं **लवणप्रसादः** ॥ ६७

प्रतिनृपतिभिर्भग्नोत्साहैर्निमग्नमिव क्वचित्,
स च नरपतिर्वीरस्तीरं जगाम मृधाम्बुधेः ।
दिशि दिशि यशःस्तोमान् **सोमान्वयी** समचारय-
च्चतुरकुरलीचाणेक्योऽयं प्रियङ्करणैर्गुणैः ॥ ६८

॥ इति गूर्जरेश्वरपुरोहितश्रीसोमेश्वरदेवविरचिते कीर्तिकौमुदीनाम्नि महाकाव्ये युद्धवर्णनो नाम पञ्चमः सर्गः ॥ ५ ॥

१ **विमभ्यः** मु० ॥ २ प्र० आदर्शे पद्यस्यास्य स्थानं रिक्तं वर्तते ॥ ३ °**रङ्गिभ्यो** वा० मु० ॥ ४ °**न् सो शुभे** वा० ॥ ५ **तत्रेशोऽयं** वा० मु० ॥ ६ °**वं हीरं** वा० मु० ॥ ७ **यानम**° वा० मु० ॥ ८ °**षमर्द्धिग्रद्धा** वा० । °**षमार्धगृध्नाम्** मु० ॥ ९ **प्रमदोपपूतैः** वा० । **प्रमदोपहूतैः** मु० ॥ १० °**धाद्, वीरैर्विरु**° मु० ॥ ११ °**ण स्वार्थां स**° वा० मु० ॥ १२ **चतुरतुरली**° मु० ॥ १३ °**क्योऽसौ प्रि**° प्र० ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

षष्ठः सर्गः ।

श्रीवस्तुपालेन बलान्निरस्तां, तां दुस्तरामापदमाकलय्य
महोत्सवानामकृत प्रवृत्तिं, वीतोपसर्गः पुरवासिवर्गः ॥ १
गृहे गृहे धातुरसानुलेपाः, समन्ततः स्वस्तिकपङ्क्तिमन्तः ।
विरेजिरे तूर्यरवानुकूलाः, कुलाङ्गनामङ्गलगीतयश्च ॥ २
बभूव देवेषु विशेषपूजा, राजन्यमार्गेषु विशेषशोभा ।
विशेषहर्षः पुरपूरुषेषु, विशेषवेषश्च वधूजनेषु ॥ ३
येषां निमेषार्द्धमपि क्षपायामायान्न निद्रा रिपुविद्रवेण ।
सुस्थीकृतानां सचिवोत्तमेन, तेषां च हर्षान्तरितेयमासीत् ॥ ४
पुरप्रजानां प्रमदामृतेन, तेनातिमात्रं शिशिरीकृतानाम् ।
निःशेषिताशेषसरःसमृद्धिर्ग्रीष्मो न भीष्मोऽप्यभवद् भयाय ॥ ५
शिरीषपुष्पप्रचयच्छलेन, शुचिर्दधानो हृदयं म्रदीयः ।
आषाढवान् बाढमपास्तकामः, कर्मन्दिकल्पस्तमुपाजगाम ॥ ६
आमात्यमालोक्य चुलुक्यभर्तुः, कर्तुं स्थितं शस्त्रभृतो निरस्त्रान
मन्ये मनोभूरपि मन्दमन्दं, चापक्रियाचापलमाचचार ॥ ७
दिङ्मण्डली पाटलिपुष्पगन्धसम्बन्धसोन्मेषमरुन्मिषेण ।
शान्तोपतापा सचिवेन तेन, सन्तोषतः श्वासमिव व्यमुञ्चत् ॥ ८
अस्मान् सुखेनोत्तरतु भ्रमन्ती, कीर्तिस्तदीयेति कृशास्तटिन्यः ।
बभूवुरासामसदेतदन्तः, सा हि क्षमा सागरलङ्घनेऽपि ॥ ९
प्रतापिनः पल्लवितप्रतापः, शुचिः शुचित्वाधिगतप्रसिद्धेः ।
कविप्रियोऽसौ प्रथयाञ्चकार, निन्दां निदाघस्य जडप्रियस्य ॥ १०
पीयूषबिन्दुप्रसवं स्रवन्ती, गुणावलिर्यस्य गलन्तिकेव ।
स्थितोपरिष्टादपि विष्टपस्य, प्रीतिं प्रतप्तस्य तदा ददाति ॥ ११
ऋतुर्दिगन्ताक्रमणोद्यतस्य नयन्नयं बुद्धिमिनस्य तेजः ।
तेनाभविष्यत् सचिवेन तुल्यः, प्रजोपतापं यदि नाकरिष्यत् ॥ १२
संशोषिताशेषनदे निदाघे, मन्त्रीशदृष्टिः कमलाभिरामा ।
तृष्णापहारं न चकार कस्य, प्रपेव सन्मार्गमुपागतस्य ? ॥ १३
पुण्ड्रेक्षवः क्षीणरसाः सरस्यः, शुष्का विशुष्काश्च गवां समूहाः ।
चूतद्रुमो वा सचिवोत्तमो वा, तदाऽर्थिसार्थं सफलीचकार ॥ १४

---

१ **स्वस्थी** प्र० ॥ २ **प्रदीपः** मु० ॥ ३ **जलप्रि°** वा० ॥ ४ **ऋतु°** मु० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्वरक्षितस्याथ पुरस्य तस्य, वैशेषिकीं वीक्षितुमेष शोभाम् ।
इष्टां नमस्कर्तुमनाश्च देवीं, श्रीवस्तुपालः सचिवश्चचाल ॥ १५

प्रसर्पतः प्रोषितगर्वभावात्, परिच्छदो यद्यपि तस्य तुच्छः ।
स्त्रीभिः कृताः प्रेक्षणकाङ्क्षिणीभिस्ते सङ्कटा राजपथास्तथापि ॥ १६

तं राजवीथ्यामथ सञ्चरन्तमालोकयन्त्यः पुरलोककान्ताः ।
दातेति पातेति जेयीत्ययीति, क्षमीति वाग्मीति भृशं शशंसुः ॥ १७

मनोरमाकारममात्यमेतमिवोपगन्तुं हृदयानि तासाम् ।
चक्रुः पुरस्तादुपढौकनाय, फलद्वयं चारुकुचद्वयेन ॥ १८

तमन्तिके यान्तमवेत्य बन्दिशब्दैरथ द्रष्टुमगारगर्भात् ।
द्रुतं प्रयान्ती रसनानिनादैराकारयत् काऽपि सखीरिवान्याः ॥ १९

जवेन यान्त्यास्तदवेक्षणाय, कस्याश्चिदम्भोजनिभेक्षणायाः ।
काञ्ची सखीभिर्विधृता गलन्ती, नितम्बतो न स्थिरता तु चित्तात् ॥ २०

तदा तदालोकनलोलदृष्टिः, संवृण्वती स्वाङ्कमंशुकेन ।
हृत्कोटरान्तर्निहितस्फुलिङ्गमनङ्गमन्या प्रकटीचकार ॥ २१

तेनाङ्गना प्रत्यवलोकिताऽन्या, त्रपातिभारेण भृशं नमन्ती ।
रराज कन्दर्पकिरातमुक्तसमापतन्मार्गणवञ्चिनीव ॥ २२

परा स्मरावेशनिवेशिताश्रुः, प्रयुक्तनेत्रद्वितयाञ्जनाऽपि ।
सुधानिधानं सचिवप्रधानं, नालोकितुं सम्यगलम्बभूव ॥ २३

न पुष्पचापादपरोऽस्ति चापी, यस्मादमात्यप्रणयोन्मुखीनाम् ।
न कञ्चुके किञ्चन वेधचिह्नं, भिन्नं मनस्तेन घनस्तनीनाम् ॥ २४

लज्जावती तं प्रति काऽपि बाला, जालान्तरालेन दृशं मुमोच ।
इषुर्ययाऽजीयत वप्रमारमार्गागतः कामचमूचरस्य ॥ २५

तद्दर्शिनीनां हृदि सुन्दरीणां, मनोभवक्ष्माधवकेलिसौधे ।
प्रभूतदुर्वारपरिच्छदोऽपि, लेभे प्रवेशं सचिवेन्दुरेकः ॥ २६

मन्त्रीशमालोक्य सुलोचनानां, स्वभावलोलान्यपि लोचनानि ।
नान्यत्र कुत्रापि गतिं वितेनुर्गुणैस्तदीयैरिव सन्दितानि ॥ २७

श्रीखण्डमत्युत्सुकया कयाचिद्, देहैकदेशे निहितं ततोऽपि ।
घर्माम्भसा मृष्टममात्यदृष्टाविष्टापिरल्पाऽपि जडादपैति ॥ २८

समीपमाजग्मुषि तत्र मन्त्रिमधौ दधाने सुमनःसमृद्धिम् ।
रोमोद्गमोद्यन्नवमञ्जरिश्रीर्माकन्दमालेव परा व्यराजत् ॥ २९

---

१ °यी॰नयी° मु० ॥ २ °याती वा० ॥ ३ °णबन्दिनी° वा० ॥ ४ °न्तरेण[स्व]दृ° वा० ॥ ५ °र्गाङ्गतः वा० ॥ ६ °व बन्दि° मु० ॥ ७ °मोद्यमो° वा० मु० ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उद्दामकामक्षितिपाज्ञयेव, क्रियान्तराण्यर्द्धकृतानि मुक्त्वा ।
स्त्रीणां गणः श्रीकरणप्रधानममुं समालोकत सावधानः ॥ ३०
खिन्नाऽध्वनि श्रोणिभरेण तावदेथ व्रजन्तं सचिवं विलोक्य ।
काऽपि प्रयातुं पदमप्यशक्ता, सहामुना स्वं प्रजिघाय चेतः ॥ ३१
ग्रहैः शुभैः सत्यममात्यशम्भुर्दृष्टः स दृष्ट्या परिपूर्णयैव ।
पुराङ्गनानामनुरागिणीनां नेत्रत्रिभागेन निभालितो यत् ॥ ३२
तत्कालमुन्मीलितमीनकेतुज्वरातुराणां पुरसुन्दरीणाम् ॥
अदत्त चित्तं न स दान्तचित्तस्तद्धर्मपत्न्याः प्रथमं हि दत्तम् ॥ ३३
रेमे न रम्येऽपि वधूजनेऽत्र नेत्रद्वयं मन्त्रिमतल्लिकायाः ।
न तादृशास्तादृशसंयमेषु, प्रलोभनाय प्रभवन्ति भावाः ॥ ३४
अथाऽऽशिषः सैष नतेन मूर्ध्ना गृह्णन् वितीर्णाः कुलबालिकाभिः ।
विभूषितस्तम्भपुरोपशल्यामेकल्लवीरां प्रददर्श देवीम् ॥ ३५
तां सप्तलोकप्रणतां प्रणन्तुं, जगाम दूरे स दुरापकीर्तिः ।
न वेत्ति विद्वानपि संवसन्तीं, वाणीस्वरूपेण निजे मुखाब्जे ॥ ३६
दुग्धेन दध्ना मधुना घृतेन, खण्डेन तोयेन च शुद्धमूर्तिम् ॥
आनर्च देवीं सचिवः प्रसून-कर्पूर-कृष्णागुरु-चन्दनाद्यैः ॥ ३७
चकार देवीवदनारविन्दे, स दन्तपङ्क्तिं घनसारखण्डैः ।
हर्षं वहन्ती हृदि सप्रकर्षं, साक्षात् सहासेव बभौ यया सा ॥ ३८
नैवेद्यवृन्दैरनवद्यवृत्तैः, शिष्टानुकूलश्च दुकूलकूटैः ।
धूपैरयं भूपसभानुरूपः, प्रसादयामास दयाश्रयस्ताम् ॥ ३९
नुत्या च नत्या च विशेषवत्या, देवीं समानीय मुदं स मानी ।
श्रीवीरभूपालकृपाणदण्डे, स्थितिं ययाचे हृदि च स्वकीये ॥ ४०
अथोष्मणि ग्रीष्मसमुत्थितेऽन्तर्देहं स्मास्कन्दति देहभाजाम् ।
शङ्के समग्रोऽपि रसः सशङ्कः, स्वेदाम्बुदम्भेन बहिर्बभूव ॥ ४१
चण्डद्युतौ मण्डयति द्युमध्यं, मध्यन्दिनोद्दीपितदीप्तिदप्ते ।
समं स मन्त्री गुणिनां गणेन, क्रीडावनं प्राप सनीडवर्ति ॥ ४२
मन्त्री तदासाद्य वनं ननन्द, ग्रीष्मे महीं शोषयितुं स्थिते यत् ।
भ्रमद्घटीसङ्घटितारघट्टखाट्कारशब्दैः प्रतिगर्जतीव ॥ ४३
दीर्घैर्निदाघस्य दिनैर्मनोभूरलब्धसिद्धिर्भजति स्म सम्यक् ।
वनस्य तस्यातिघनद्रुमस्य, च्छायातमीं तारकितां प्रसूनैः ॥ ४४

---

१ °दध ब्र° मु० ॥ २ °र्णयेव मु० ॥ ३ °न विलोकितो वा० मु० ॥ ४ °पत्न्या प्र° वा० ॥ ५ °लकामिनीभिः प्र० ॥ ६ हास्येव वा० मु० ॥ ७ °डकीर्त्ति वा० ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अमात्यमत्यर्थमपास्तदौस्थ्यं, पिकाङ्गनाकूजितकैतवेन ।
उल्लासिमल्लीमुकुलाग्रदंत्यः, सत्यं स्तुवन्ति स्म वनाधिदेव्यः ॥ ४५
हिमासहोऽयं समयस्तमित्रहिंस्रः सहस्रांशुरिमौ समेतौ ।
मत्वेव ते भीति-रती प्रविष्टे, छायाविशिष्टं वनदुर्गमेतत् ॥ ४६
लीलावनेऽस्मिन् नवमेघलीलामरन्दबिन्दुप्रकरं किरन्तः ।
विनाऽपि वर्षासमयेन हर्षं, शिखण्डिनां ताण्डवयन्ति वृक्षाः ॥ ४७
स एव घर्मांशुकरानुषङ्गादङ्गानि पुंसां पवनो दुनोति ।
धिनोति सद्वृक्षवनोपसेवी, सङ्गः कुलीनैरत एव युक्तः ॥ ४८
प्रकल्पितायां क्षितिकल्पवृक्षो, द्राक्षालतामण्डपवेदिकायाम् ।
कृतोपवेशः स चकार गोष्ठीमनिष्ठुरोक्तिप्रसरैः कवीन्द्रैः ॥ ४९
केचित् कुलं भीतिनिराकुलस्य, कृतावदानस्य परे च दानम् ।
मान्यत्वमन्ये विनिवृत्तमन्योर्व्याचख्युराख्येयगुणस्य तस्य ॥ ५०
कवीन्द्रशैलेन्द्रविनिर्गतानां, सरस्वतीनां प्रसृतान् प्रवाहान् ।
आरुह्य भूमण्डलमासमुद्रमियर्ति मन्त्रीश्वरकीर्तिहंसी ॥ ५१
कवीश्वराणां प्रगति स्म वाणी, कर्णद्वयं कर्णसमस्य तस्य ।
सोऽपि प्रमोदं हृदयेषु तेषामुदारपाणी रचयाञ्चकार ॥ ५२
दत्ते स्म तेभ्यः सचिवः कविभ्यः, प्रभूतमत्यद्भुतकीर्तिरर्थम् ।
आदत्त चिद्रूपतया निगूढमप्यर्थलेशं तु तदुक्तसूक्तात् ॥ ५३
मनीषिणां मानसमन्दिरेषु, श्रीमानमात्यो निवसन्नजस्रम् ।
तेभ्यः स कल्पं वितरत्यगण्यहिरण्यविश्राणनकैतवेन ॥ ५४
तस्मिन् वने सत्कविवक्त्रयन्त्रविनिर्गतेन श्रवणामृतेन ।
संसिच्यमानः सचिवः प्रधानमह्नाय मध्याह्नमयं निनाय ॥ ५५
आशायामशिशिरधाम्नि पश्चिमायामायाते सुकृतवतामपश्चिमोऽसौ ।
तान् कृत्वा धनकनकैः कवीन् कृतार्थानावासं स्वमभि चचाल वस्तुपालः ॥ ५६

॥ इति श्रीगूर्जरेश्वरपुरोहितश्रीसोमेश्वरदेवविरचिते कीर्तिकौमुदीनाम्नि महाकाव्ये पुरप्रमोदवर्णनो नाम षष्ठः सर्गः ॥ ६ ॥

---

१ °दन्त्यः वा० मु० ॥ २ तदीयस्य° मु० ॥ ३ °मोदो नाम प्र० ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सप्तमः सर्गः ।

अथोदयति निर्दोषे, सचिवेन्दौ नवे रवौ । कोक-कोकनदानन्दि, मन्दिमानमगान्महः ॥ १
गम्यः सोऽपि जगच्चक्षुश्चक्षुषां समपद्यत । कः कालवलनेनात्र, निस्तेजा नहि जायते ? ॥ २
लौहित्यं विद्रुमालीषु, द्रुमालीपल्लवेषु च । अधिकं निदधे ब्रध्नः, किरणैः कुङ्कुमारुणैः ॥ ३
शुशुभे दिक्षु सर्वासु, प्रज्वलत्तपनोपलः । शिरस्थरविरस्ताद्रिः, पञ्चाग्निव्रतवानिव ॥ ४
वियोगव्यथया वीक्ष्य, साक्रन्दां चक्रकामिनीम् । प्रम्लाना सहसंवासस्नेहेनेव सरोजिनी ॥ ५
मित्रेऽस्तमागते दुःखादब्जैः प्रागान् जिहासुभिः । शालिग्रामशिलेवालिव्याजादारोपिता हृदि ॥ ६
न मित्रमन्तरेणापि, क्षणमभ्यासवासरः । भवत्यव्यभिचार्येव, सङ्गतं गतदोषयोः ॥ ७
प्रतापः प्राप मन्दत्वं, वारुणीसेवया रवेः । भवेत् प्रभावभङ्गाय, महतोऽपि हि दुष्कृतम् ॥ ८
निश्चला कस्य वाऽन्यस्य, भुवने श्रीर्भविष्यति ? । आसीद् वसुविहीनोऽसौ, यदह्नामपि नायकः ॥ ९
अपि तादृशमस्ताद्रिर्दिनेशं निरकाशयत् । चिरं न ह्याश्रयः क्वापि, प्राप्यते दिवसात्यये ॥ १०
कुलायमाकुलाः सर्वे, पक्षिणस्तत्क्षणादयुः । कस्त्यजत्यथवा पस्त्यं, सत्यां सवितुरापदि ? ॥ ११
वनान्ताद् वलमानेन, कुलेनोद्गमितैर्गवाम् । पांसुभिर्मलीभूतं, कुतोऽप्याविरभूत् तमः ॥ १२
समन्ततोऽपि काष्ठानां, प्लुष्टानां चित्रभानुना । धूमेनेव तमिस्रेण, प्रसस्रे गगनाङ्गणे ॥ १३
मुक्त्वा निःश्रीकमप्यब्जं मराली न गताऽन्यतः । भ्रमराली त्वगाद् वेगादिदं सदसदन्तरम् ॥ १४
त्रैलोक्यदीपके देवे, लोकान्तरमुपेयुषि । तमस्तान्तमभूद् विश्वं, कः सुखी महदापदि ? ॥ १५
गते भानौ स्थिते ध्वान्ते, पद्मिन्या साधु मीलितम् । दुरीक्षा महतामापदसतामुन्नतिश्च यत् ॥ १६
स्थित्वाऽथ प्रस्थिता सन्ध्या, व्रजद्वाजिव्रजाकुला । आक्रामतः परं लोकं, रवेः पश्चाच्चमूरिव ॥ १७
ससन्ध्या-वासरं सूर्यं, मत्वा देशान्तरं गतम् । जाया-ऽनुजान्वितं राममिव म्लानमभूज्जगत् ॥ १८
क गतः सविता ? ध्वान्तमेतदप्यागतं कुतः ? । एवं सविस्मयेव द्यौः, स्फारतारमवैक्षत ॥ १९
दीपकां अपि दीप्यन्तां, स्फुरन्तु तिमिराण्यपि । तद् गतं हि सजातीय-विजातीयासहं महः ॥ २०
स्रष्टुः सृष्टिर्विचित्रेयं, यस्मात् सङ्केतवर्त्मना । पियानभिसरन्तीनां, प्रकाशकमभूत् तमः ॥ २१
प्रदोषानन्तरं चन्द्रोदयादर्वाग् मृगीदृशाम् । मुहूर्तमभिसाराय, मारमौहूर्तिकोऽब्रवीत् ॥ २२
सुरतव्रतचर्यायै, पर्यङ्कादपि सज्जितात् । पांशुलानामभूत् पांशुतल्पतीर्थं यथाधिकम् ॥ २३
नीरन्ध्रेणान्धकारेण, रोदसी सम्पुटीकृते । अद्योद्घाटयितुं कोऽपि प्रवृत्त इव पूर्वतः ॥ २४
रचितोपक्रमे राज्ञि, चक्रमाक्रमितुं दिशाम् । प्रभादम्भेन नासीरमाविरासीत् पुरः स्फुरत् ॥ २५
रोहिणीरमणं वीक्ष्य, रागादागतमन्तिके । सस्मितेव तदुद्योतदम्भादभवदिन्द्रदिक् ॥ २६
अथोज्जगाम सामन्तः, कुसुमास्त्रमहीपतेः । शृङ्गारस्य जयोद्गारबन्दी कुमुदबान्धवः ॥ २७

---

१ °णात्र, क्ष° प्र० ॥ २ °वा यस्य, स° वा० । °वा यन्नं, °ज° प्र० ॥ ३ °स्तरे ग° प्र० ॥ ४ दीपिका मु० ॥ ५ यथाधि° प्र० ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आविर्बभूव पूर्वस्माद्द्रेश्चन्द्रः शनैः शनैः । तदीयैस्तटमाणिक्यकिरणौघैरिवारुणः ॥ २८
चकार तारिकारोचिरङ्कुरोत्करकैतवात् । करस्पर्शेन रागिण्याः, सोमो रोमोद्गमं दिवः ॥ २९
पुंश्चलीनां तपश्छिद्रं, समुद्रस्य महोत्सवः । रससिद्धिरनङ्गस्य, दिवमिन्दुरगादगात् ॥ ३०
मालिन्यं मार्जयामास, चन्द्रमास्तिमिरैः कृतम् । खलैर्दत्तं मृषादोषमिव सत्पुरुषः सताम् ॥ ३१
व्योमाङ्गणविकीर्णानि, तमांसि तुहिनद्युतिः । ममार्ज रुचिमार्जन्या, कुलटाकुलकण्टकः ॥ ३२
न मृगाङ्के कलङ्कोऽयं, कस्तूरीतिलकाकृतिः । निर्दग्धो नीलकण्ठेन, तिष्ठत्येष झषध्वजः ॥ ३३
दिवि स्वर्वाहिनी हंसैर्दिक्षु दन्तैश्च दन्तिनाम् । मेदुराऽजनि मेदिन्यां, कौमुदी कौमुदैर्वनैः ॥ ३४
कणेहत्य चकोरीणां गणः पीत्वा सुधासवम् । अजायत मदेनेव, गुञ्जापुञ्जारुणेक्षणः ॥ ३५
मरीचिनिचये चान्द्रे, सति सान्द्रे समन्ततः । घटितं विष्टपं दन्तसन्तत्या दन्तिनामिव ॥ ३६
शान्तध्वान्त-घनस्तोमे, कौमुदी-शरदागमे । हृदि श्यामोऽन्यतः श्वेतश्चकाशे चन्द्रखञ्जनः ॥ ३७
चन्दनैश्चर्चितेव द्यौर्दिशः काशैरिव श्रिताः । क्षीरेण क्षालितेवोर्वी, शर्वरीशे विराजति ॥ ३८
पीयूषपायसैः प्रीतं, चकोरद्विजसञ्चयम् । श्रेयोऽर्थं मन्मथस्येव, चकार शिशिरद्युतिः ॥ ३९
सन्दोहैरिन्दुकान्तानां, तदा सम्भवदम्भसाम् । प्रीतये चैत्रमित्रस्य, चन्द्रश्चक्रे प्रपा इव ॥ ४०
तरुणे तारकाध्यक्षे, वृक्षच्छाया विरेजिरे । तमसः खण्ड्यमानस्य, प्रतीकाः पतिता इव ॥ ४१
रमयत्यखिलामुर्वीमचण्डद्युतिमण्डले । कन्दर्पनृपते राज्यमेकच्छत्रमिवाभवत् ॥ ४२
सान्द्रे चन्द्रातपे तत्र, स्फुरद्भिः कैरवाकरैः । क्षीरनीरधिडिण्डीरपिण्डानां पाण्डिमा जितः ॥ ४३
नीलाब्जमधुमत्तालिकुलकोलाहलैरिव । मानसे मदिराक्षीणां, प्रबुद्धः कुसुमायुधः ॥ ४४
अनल्पाक्षीभिराकल्पास्तेनिरे तदनन्तरम् । विजिगीषोरनङ्गस्य, सन्नाहाः सुभटैरिव ॥ ४५
ज्योत्स्नाजलनिमग्नायाः, कस्याश्चित् कुञ्चितभ्रुवः । शरीरे चन्दनं गौरे, सौरभ्यादन्वमीयत ॥ ४६
सर्वत्र व्यक्तशक्तीनां, तुषारद्युतिरोचिषाम् । जगाम वामनेत्राणां, केशपक्षो विपक्षताम् ॥ ४७
विधृता विश्ववन्द्येन, या शिवेनापि मूर्धनि । सा ज्योत्स्ना सुदृशां केशहस्तेन गलहस्तिता ॥ ४८
लग्नः पादेषु कान्तानां, नखान्तः प्रतिमामिषात् । याचितुं वक्त्रलावण्यकणिकामिव चन्द्रमाः ॥ ४९
कबरी कैरवाक्षीणां, कबरा केतकीदलैः । हसन्तीव व्यभादाभां, विलक्षामेणलक्ष्मणः ॥ ५०
यामिन्यामिन्दुशुक्लायां शुक्लवस्त्रावगुण्ठनाः । धम्मिल्लोद्भावितं विघ्नं, विजघ्नुरभिसारिकाः ॥ ५१
वधूनां वक्त्रमाविद्धं, रत्नकुण्डलकान्तिभिः । प्रियेषु सविलम्बेषु, रोषारुणमिव व्यभात् ॥ ५२
ताडपत्रश्रिया न्यस्तनीलाश्मगणवर्णया । पुस्तिकेव चकास्ति स्म, काचित् कामविपश्चितः ॥ ५३

कुचौ सुवृत्तौ धृतहारयष्टी, सकञ्चुकौ रेजतुरम्बुजाक्ष्याः ।
रतेः स्थितायाः हृदि रक्षणाय, स्मरप्रयुक्ताविव सौविदल्लौ ॥ ५४

आकल्पिता शोभितकेलिशय्या, नियुद्धभूमीव वधूवरस्य ।
तत्रोपधानच्छलतो बभूव, निवेशवेदी स्मरपार्थिवस्य ॥ ५५

---

१ तदीयतट° वा० ॥ २ तारका° प्र० ॥ ३ धारसम् मु० ॥ ४ °रिवाश्रि° वा० ॥ ५ इति वा० मु० ॥ ६ सुनाहाः वा० ॥ ७ °नं पौरैः, सौ° मु० ॥ ८ °न, श्रीशि° मु० ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एकावली वक्षसि विस्फुरन्ती, रराज राजीवविलोचनायाः ।
चेतःशरव्यावेधिबोधहेतुर्लेखा खटिन्येव कृता स्मरेण ॥ ५६

दीपप्रभापिञ्जरितानि रेजुरल्पोदरीणां रतमन्दिराणि ।
आपूर्य चित्तान्यतिरिच्यमानैः, प्रियानुरागैरिव पूरितानि ॥ ५७

कुरङ्गनाभीकृतपत्रभङ्गी, कुचद्वयी चारुदृशश्चकाशे ।
सुप्तोत्थितस्य स्मरकुञ्जरस्य, मदाम्बुसिक्ता शयनस्थलीव ॥ ५८

माणिक्य-मुक्ताफल-काञ्चनानां, काचिन्मरीचिप्रचयार्चिताङ्गी ।
खरांशु-शीतांशु-हुताशनानां, महःसमूहैः पिहितेव रेजे ॥ ५९

ताम्बूल-वस्त्रा-ऽऽभरण-प्रसून-श्रीखण्डसंस्कारसमाकुलाभिः ।
सुलोचनानां परिचारिकाभिरसूच्यत श्रीतनयोत्सवश्रीः ॥ ६०

नवं वयश्चित्तमपेतचिन्तमिन्द्रः सुधांशुर्मधुरा परिस्रुत् ।
सख्योऽनुकूलाश्च विलासिनीनां खिदे तदा कान्तविलम्ब एव । ६१

अनिच्छतीनां निजमानभङ्गं, सङ्गं प्रियैः सत्वरमिच्छतीनाम् ।
अथेङ्गितज्ञस्य मनस्विनीनां, दूतीजनस्यावसरो बभूव ॥ ६२

विद्वानपूर्वः सितरोचिरेषः, कृतव्यलीकैः सह कामुकैर्यः ।
लुप्ते प्रकोपेऽथ विसर्जनीये, सन्धिं विधत्ते स्म वधूजनस्य ॥ ६३

विभिन्नयोरह्नि रुषा रजन्यामुदञ्चदुच्चैरनुतापयोश्च ।
स्त्री-पुंसयोः सङ्गमनच्छलेन, प्रागप्रदा काऽपि बभूव भूयः ॥ ६४

मानार्गलां काऽपि विलङ्घ्य वेश्म, गन्तुं प्रवृत्ता दयितस्य यावत् ।
तावत् स एव स्वयमाजगाम, कामः किमिष्टं न करोति तुष्टः ॥ ६५

विलासवेश्माङ्गणभागतेषु, कृतापराधेष्वपि वल्लभेषु ।
मनस्विनीनामथ मानमुद्रां, भ्रूभङ्गशेषामकरोदनङ्गः ॥ ६६

निष्कास्य कामः प्रसभं प्रकोपं, पुनः प्रवेशं प्रतिषेद्धुमस्य ।
अङ्गानि सारङ्गविलोचनानां, चक्रे स्फुटं कण्टकवेष्टितानि ॥ ६७

किं नेत्रमार्गेण मनोज्ञरूपा, कर्णाध्वना वा मधुरं वदन्ती ।
नासापथेनाथ सपुष्पवासा, प्रियस्य चित्ते प्रविवेश काचित् ॥ ६८

अगस्तिभिः संव्यवहार्यतां गतैरनुज्ञयेव द्विजचक्रवर्तिनः ।
कान्तैः समं कान्तविलोचनाजनः, परिस्रुतं पातुमथोपचक्रमे ॥ ६९

कन्दर्पकेलिप्रथमप्रयोगसञ्जातलज्जामुकुलीकृतानि ।
तदा मदेन प्रकटीबभूवुर्भुग्नभ्रुवां विभ्रमचेष्टितानि ॥ ७०

---

१ °धिवेध° प्र० ॥ २ भङ्गः प्र० । भङ्गिं वा० ॥ ३ नदन्ती मु० ॥ ४ °मथ पचक्र° प्र० ॥
५ °वुर्वामभ्रुवां प्र० ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

असार्थं कन्दर्पगुरूपदेशा[1]मवं महानन्दमिवाङ्गनाभिः ।
व्याावृत्तवस्त्वन्तरवासनाभिः, कृता किरीटेऽपि पतत्युपेक्षा ॥ ७१
मेदाकुलानि प्रमदाकुलानि, विरेजुरापानगृहाङ्गणेषु ।
हृदि प्रविष्टस्मरचित्रपुङ्खदुःखादिवोद्घूर्णितमस्तकानि ॥ ७२
अधरैरधरीकृतं वधूनां, मधुमाधुर्यमवैमि विद्रुमाभैः ।
दयितैरत एव तेषु पानप्रतिपत्तिर्विहिता विहाय हालाम् ॥ ७३
परिजनैः प्रथमं गतमन्तिकादपसृतं वसनैर्जघनादथ ।
तदनु यातमथ त्रपया हृदः, स्थितमिहात्मभुवैव नतभ्रुवाम् ॥ ७४
आलिङ्गितायाः सुभगेन गाढमुद्गूढरम्भादलमार्दवेभ्यः ।
स्वेदोदबिन्दुच्छ[2]लतोऽपरस्याः[3], सुस्राव लावण्यमिवाङ्गकेभ्यः ॥ ७५
सकलमपि वपुर्विभिद्यमानं, मदनशरैरवलोक्य कामिनीनाम् ।
शरणमिव रदच्छदः प्रपेदे, प्रियवदनं यदलं प्रसह्य पातुम् ॥ ७६
मैरेयपानच्युतचेतनानां, तासामसाधारणविभ्रमाणाम् ।
नखाङ्कुशैरप्यनवाप्तसंज्ञो, गम्भीरवेदी मदनद्विपोऽभूत् ॥ ७७
आह्वातुं विषमशरं[4] पुरोऽनुवाको, दोर्वल्लीवलयरवोऽभवद् वधूनाम् ।
तद्यज्वा मणितमभूच्च[5] मोहनाग्निष्टोमेऽस्मिन् मधुमधुराधरौष्ठसोमे ॥ ७८
निगदितुं विधिनाऽपि न शक्यते, सुभटता कुचयोः कुटिलभ्रुवाम् ।
सुरतसंयति यौ प्रियपीडितावपि नतिं न गतौ च्युतकञ्चुकौ ॥ ७९
उपरतसुरतश्रमक्रियामासमयविराममनोरमैर्मरुद्भिः ।
सरसनखपदे हृदि प्रियाणामथ शयितः कृशमध्यमासमाजः ॥ ८०
अवनमदमृतांशुबिम्बमौलिर्गलितवया इव शर्वरी व्यराजत् ।
अभजत ककुभं च जम्भजेतुर्जतुरसरक्त इव प्रभाप्रवाहः ॥ ८१
यातः शीतरुचिः प्रतीचिजलधौ डिण्डीरपिण्डच्छवि–र्जृम्भारम्भमनोरमा कमलिनी सुप्तोत्थितेवाभवत् ।
वक्रत्वं च विधिर्विधूय सदयं चक्रेषु चक्रे मनः, सौरेणाजनि कुङ्कुमारुणमिव प्राचीमुखं रोचिषा ॥ ८२
देवोऽयं भुवनत्रयैकनयनं प्राप्तः प्रभाणां प्रभुः, कर्ता यः कमलोदयं जगदिदं मोहाम्बुधेरुद्धरन् ।
प्रातस्त्यः समयो वयोविरुतिभिर्व्योमेति वर्धापय–न्नाचिच्छेद तदीयमन्धतमसव्याजेन संव्यानकम् ॥ ८३

॥ इति श्रीगूर्जरेश्वरपुरोहितश्रीसोमेश्वरदेवविरचिते कीर्तिकौमुदीनाम्नि महाकाव्ये चन्द्रोदयवर्णनो नाम सप्तमः सर्गः ॥ ७ ॥

१ महांकु° मु० ॥ २ °बिम्बच्छ° वा० ॥ ३ °लतः पर° प्र० ॥ ४ कुसुमशरं मु० ॥ ५ वाक्या,°को°.वा० मु० ॥ ६ तद्याज्या मणि° वा० मु० ॥

अष्टमः सर्गः ।

अथ पाथोजिनीनाथे, चुम्बत्याशां बिडौजसः । प्रबुद्धं पङ्कजेनेव, श्रियः पात्रेण मन्त्रिणा ॥ १
कोकद्वन्द्वं तदाऽऽलोक्य, सङ्गतं सम्ममाद सः । परकष्टे विनष्टे हि, सतां प्रीतिः प्रचीयते ॥ २
उन्मादं वीक्ष्य पद्मानां, कुमुदानां च मन्दताम् । क्षणिकत्वं विभूतीनां, चेतसा निश्चिकाय सः ॥ ३
कदाप्युदयति ध्वान्तं, कदाप्यर्कश्च धिग् विधिम् । तुल्यं नीचेऽप्यनीचेऽपि, स तदेति व्यतर्कयत् ॥ ४
करं चिक्षेप तीक्ष्णांशुर्दुस्तरे तिमिराम्बुधौ । प्रदातुमिव मग्नस्य, भुवनस्यावलम्बनम् ॥ ५
विच्छायास्तिमिरे तुच्छे, रेजुर्दीपाश्चलच्छिखाः । पङ्क्तीभूते पयःशेषे, स्फुरन्तः शफरा इव ॥ ६
तीक्ष्णैः सपदि भिन्दानः, कराग्रैस्तिमिरासुरम् । रोषेणेवारुणः पूषा, प्रादुरासीन्नृसिंहवत् ॥ ७
अथोज्जगाम वामत्वं, कुमुदेषु प्रदर्शयन् । विष्टपव्यवहारैकप्राड्विवाको दिवाकरः ॥ ८
मलिनीभवदाशान्ते, शान्ते ध्वान्तघनोदये । अब्जावतंसितं हंसो, नभःकासारमासदत् ॥ ९
न्यासीकृताः परं देशं, गच्छता भास्करेण याः । स्फुटं स्फटिकभूर्वह्निः, प्रतिदत्ते स्म तां विभाः ॥ १०
विवृतिर्विश्वसूत्रस्य, दृशां निस्तिमिरौषधी । इष्टवार्ता च पद्मानां, दिद्युते द्युमणिद्युतिः ॥ ११
चकोरचक्रवालस्य, पीतशीतज्वरोदयाः । तमश्चक्रमधश्चक्रुश्चण्डरोचिर्मरीचयः ॥ १२
प्रसारितकरे सूरसिन्धुरेन्द्रेऽनुधावति । सुमेरुं परिबभ्राम, तमस्तोमः पुरःसरः ॥ १३
कुर्वाणः किरणाङ्कूरैरवतंसश्रियं दिशाम् । नभस्त्रिभागमागच्छदब्जिनीजीवितं विभुः ॥ १४
विलोललोचनाः प्रातर्मौलिमाल्यानि तत्यजुः । लोके हि कारणेनैव, गौरवं गुणिनामपि ॥ १५
हृदि प्रियवियुक्तानां, साञ्जना बाष्पबिन्दवः । मग्नानां मारबाणानां, पुङ्खा इव विरेजिरे ॥ १६
बभ्राजे भुजगाभासं, त्रासयंस्तिमिरोत्करम् । सुवर्णरुचिराकारः, सुपर्ण इव भास्करः ॥ १७
अथ धर्मैकनिष्णातो, निस्नातः शुचिभिर्जलैः । **वस्तुपाल**स्त्रिकालज्ञं, जगत्पूज्यमपूजयत् ॥ १८
वलक्षेणोत्तरीयेण, स बभौ बुद्धिमत्तरः । तुरीययुगभीतेन, सुकृतेनेव संश्रितः ॥ १९
मत्सरज्वरसन्तप्तं, मन्ये मुक्त्वाऽन्यमानसम् । **आदिनाथः** स्थितस्तस्य, हृदि सौहार्दशीतले ॥ २०
भाले तस्य विभाति स्म, चान्दनी तिलकाकृतिः । कृता सुकृतिनां मध्ये, रेखा मुख्येव वेधसा ॥ २१
अलिङ्गितः शमेनेव, पृथग्भूतः कलेरिव । सद्वृत्तेनेव निर्वृत्तः, स तदा शुशुभे भृशम् ॥ २२
देवेन्द्रं स्तुवतस्तस्य, रेजुर्दशनदीप्तयः । तत्कालोन्मीलितानन्दसुधांशुकिरणश्रियः ॥ २३
दत्त्वा दानानि पात्रेभ्यो, नत्वा गुरुजनं च सः । सत्त्वाश्रितेन चित्तेन, भवं भावितवानिति ॥ २४
अहो ! संसारकारान्तर्मायानिगडितात्मनाम् । जायते जातु जन्तूनां, न कथञ्चन निर्वृतिः ॥ २५
केचिद् द्युम्नाय धावन्ति, प्रद्युम्नाय च केचन । नोद्युङ्क्ते कोऽपि धर्माय, सर्वाभिप्रेतहेतवे ॥ २६
मोदमानोऽन्तरात्मैव, साक्षी यत्कर्म शर्मणे । तमप्युपेक्षते धर्ममहो ! मूढमना जनः ॥ २७
यस्मिन् सन्निहिते वह्नि-विषाद्याः प्रभवन्ति न । धर्मादप्यपरस्तस्मात्, कः शरण्यः शरीरिणाम् ? ॥ २८
धर्मसिद्धौ ध्रुवा सिद्धिर्द्युम्न-प्रद्युम्नयोरपि । दुग्धोपलम्भे सुलभा, सम्पत्तिर्दधि-सर्पिषोः ॥ २९

---

१ प्रनष्टे मु० ॥ २ एकीभू० प्र० वा० ॥ ३ ताः प्रभाः प्र० ॥ ४ मानान्त० वा० ॥ ५ नो प्र० ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उच्चैर्गर्वे समारोप्य, नरं श्रीराशु नश्यति । दौःस्थ्यदत्तावलम्बोऽथ, स तस्मादवरोहति ॥ ३०
जितं लक्ष्मि ! त्वया यस्यै, जनस्तमपि सेवते । धनं निकारपूर्वं यत्, प्रदत्ते प्रेतनाथवत् ॥ ३१
धनस्याधर्मलब्धस्य, मुग्धो लाभेन तुष्यति । सुकृतस्य दुरापस्य, न तु हानिमवेक्षते ॥ ३२
असाद्यते यया स्वर्गः, श्रिया सन्मार्गदत्तया । त्यक्त्वा तामप्यधर्मेण, मूर्खाः क्रीणन्ति दुष्कृतिम् ॥ ३३
स्वयमुत्पादितां लक्ष्मीं, पुत्रीमिव मनीषिणः । दत्त्वा पात्राय तद्दानफलमेवोपभुञ्जते ॥ ३४
पित्राद्यैरुपभुक्ता या, पुत्राद्यैरपि भोक्ष्यते । कामयन्ते न तां सन्तो, ग्रामवेश्यामिव श्रियम् ॥ ३५
तस्करैर्वा दुरीशैर्वा, हृतं संसहते धनम् । कदर्यो नैव सत्कार्ये, कल्पयत्यल्पमप्यदः ॥ ३६
अन्धा एव धनान्धाः स्युरिति तथ्यं तथाहि ये । अन्योक्तेनाध्वना गच्छन्त्यन्यहस्तावलम्बिनः ॥ ३७
धनी धनात्यये जाते, दूरं दुःखेन दूयते । दीपहस्तः प्रदीपेऽस्ते, तमसा बाध्यतेऽधिकम् ॥ ३८
आदावेव विकारं यः, प्रदर्शयति देहिनाम् । भवोच्छेदैकभावेभ्यो, विभवः स्वाद्यते स किम् ? ॥ ३९
न संसारस्य वैरस्यमिदं वेत्ति जडो जनः । यत् सुखं स सुखाभासो, यद् दुःखं दुःखमेव तत् ॥ ४०
रमयन्ति मनस्तावद्, भावाः संसारसम्भवाः । यावन्न श्रूयते साश्रुलोकैफूत्कारकाहला ॥ ४१
अहो ! देहभृतां मोहः, प्ररोहति महानयम् । यदेते सुखमिच्छन्ति, विषयैर्दुःखहेतुभिः ॥ ४२
छत्रच्छायाच्छलेनामी, धात्रा चक्रे निवेशिताः । भ्रमन्तोपि स्वमात्मानं, मन्वते स्थिरमीश्वराः ॥ ४३
मदान्धास्ते परं लोकं, कथं, पश्यन्तु भूभुजः ? । तमोमण्डलमध्यस्थाश्छत्रच्छायाच्छलेन ये ॥ ४४
सुखं विषयसेवेति, सक्तास्तत्रैव जन्तवः । यः प्रमोदस्तु तत्त्यागात्, तदास्वादः क्वचिद् यदि ॥ ४५
अवश्यं नश्वरे देहे, दुर्दमे, च यमे द्विषि । हास्यमास्याद् विनिर्याति, यत् पुंसामिदमद्भुतम् ॥ ४६
कालेन शौनिकेनेव, नीयमानो जनः पशुः । क्षिपत्येष विगासन्ने, मुखं विषयशाद्वले ॥ ४७
कायः कर्मकरोऽयं तन्मात्र कार्याऽतिलालना । भृतिमात्रोचितो ह्येष, प्रपुष्टो विचिकीर्षते ॥ ४८
प्रयोजकान्यकार्येषु, नश्यन्त्याशु महापदि । दुर्मित्राणीव खान्येव, बन्धुबुद्धिरधीमताम् ॥ ४९
योऽयं जीवितभूतेषु, स्नेहग्रन्थिः सुतादिषु । विभागावसरे पुंसां, व्यक्तः सोऽपि भविष्यति ॥ ५०
दुःखाग्निर्वा स्मराग्निर्वा, क्रोधाग्निर्वा हृदि ज्वलन् । न हन्त ! शान्तिमायाति, देहिनामविवेकिनाम् ॥ ५१
अविद्यामेव सेवन्ते, हन्त ! विद्यां व्युदस्य ये । ते दूत्यामनुरज्यन्ते, वरारोहाविहायिनः ॥ ५२
तटस्थः प्रेक्षते योगी, जगदस्मिन् भवार्णवे । मज्जनोन्मज्जने कुर्वद्, दुष्कृतैः सुकृतैर्निजैः ॥ ५३
विषयामिषमुत्सृज्य, दण्डमादाय ये स्थिताः । संसारसारमेयोऽसौ, बिभ्यत् तेभ्यः पलायते ॥ ५४
सत्यं संसृतिगर्तेयं, दुःखैः पूर्णा निरन्तरम् । यतस्तद्व्यतिरेकेण, नान्यत् किञ्चिदिहाप्यते ॥ ५५
विधौ विध्यति सक्रोधे, वर्म धर्मः शरीरिणाम् । स एव केवलं तस्मादस्माकं जायतां गतिः ॥ ५६

सुचिरमिति विचार्य पुण्यचर्यः, विदुषि चिकीर्षति तत्र तीर्थयात्राम् ।
विदधदथ पथैः प्रशान्तपङ्कान्, ऋतुरपनृत्तमयूरमण्डलोऽभूत् ॥ ५७

---

१ °म्बोऽधः, स मु० ॥ २ निकारः पूर्वो यस्मिन् निधनमिति भावः, तच्च मरणम् प्र० टि० ॥ ३ °मपेक्ष° वा० मु० ॥ ४ क्रीडन्ति वा० मु० ॥ ५ °धैरुपभो° प्र० ॥ ६ दुराशै° मु० ॥ ७ °ति सत्यं त° मु० ॥ ८ गाढम् प्र० टि० ॥ ९ स्वदते प्र० ॥ १० °कफूत्कारकाहलः मु० ॥ ११ हास्यं नास्या° वा० मु० ॥ १२ विभवाव° वा० मु० ॥ १३ °चर्यां मु० ॥ १४ पयःप्रशान्तपङ्कमृतुर° मु० ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भवमवरमिमं विमृश्य सम्यग्, गलितरसैर्विषयेषु वारिवाहैः ।
मुनिभिरिव निबद्धमौनमुद्रैर्गगनवनं विमलात्मभिश्च भेजे ॥ ५८
पतिरतितपति स्म वासराणामतिशुभेति स्म विभावरीभुजङ्गः ।
जलमतिभजति स्म निर्मलत्वं, मधुरमतिध्वनति स्म राजहंसी ॥ ५९
पुलिनपरिसरे सरस्वतीनामजनि समागमनं सुखञ्जनानाम् ।
भवति यदवलोकनादनाविष्कृतहसितारिमुखं सुखं जनानाम् ॥ ६०
क्षितिवलयजयोज्जिहानवीरा, क्रमविरमज्जलपूरसिन्धुतीरा ।
शरदवतरति स्म मत्तहंसा, दिशि दिशि काशकदम्बकावतंसा ॥ ६१
कुटजविटपिनः प्रसूनशून्यानलिपटलं परिहृत्य सप्तपर्णैः ।
सममरमत दन्तिदानगन्धैर्जगति समृद्धमुपैति सर्व एव ॥ ६२
विदलितजगदापदः पयोदाः, परिगलिताम्बुविभूतयो बभूवुः ।
अहह ! न सहते महीयसामभ्युदयमिमं नियतिश्चिरायवैरा ॥ ६३
घनमयसमयात्यये विनिद्रः, ऋतुपुरुषो भवतीति तथ्यमेव ।
दधतुरपरथा कथं विकाशं, दिनपति-रात्रिपती तदीयनेत्रे ? ॥ ६४
सरसिसुरभिः सरःसमीरः, कलमसमृद्धिसमुद्धता धरित्री ।
कलमपि कलहंसकामिनीनां, रसितमथ व्यथयाञ्चकार पान्थान् ॥ ६५
कलयति कलशोद्भवे प्रवेशं, मलयनगस्थगिते नभोविभागे ।
जगदगदमभूत् पयश्च पेयं, ननु महतामुदयो मुदे न कस्य ? ॥ ६६
स्तनितमुपरतं पयोधराणां, ध्वनिरजनिष्ट ककुद्मतां विशिष्टः ।
परिहृतमवनीतलं शिलिन्ध्रैर्जलमलमक्रियतारविन्दवृन्दैः ॥ ६७
गवलकुवलयप्रभैः पयोदैर्वियति वृते व्यथित व्ययं न यस्य ।
अधिपतिरतिमात्रमुष्णमह्नां, तदिव सुसञ्चितमुत्ससर्ज तेजः ॥ ६८
भासः सेव्याः श्वेतभासः प्रदोषे, लोकाह्लादोद्दीपिका दीपकाली ।
दुग्धैर्दिग्धा शर्करा यत्र पथ्यं, दिष्ट्या दिष्टः स प्रविष्टः पृथिव्याम् ॥ ६९
हंसानां नवनलिनीवनोत्सुकानामालापैरिव मुरजिन्मुमोच निद्राम् ।
जम्भारिस्त्रिभुवनभारमुत्थितेऽस्मिन्नारोप्य स्वधनुरथोपसञ्जहार ॥ ७०

स्वच्छं वारि निवारितामरधनुर्व्योम व्यपेताम्भसः, पाथोदाः समदा सितच्छदवधूराशाः सकाशाः पुरः ।
भाति स्म प्रथयन्नहम्प्रथमिकां तेजस्विषूत्तेजितः, श्यामाम्भोधरभस्मनेव शशभृद् दिक्कामिनीदर्पणः ॥ ७१

॥ इति श्रीगूर्जरेश्वरपुरोहितश्रीसोमेश्वरदेवविरचते कीर्तिकौमुदीनाम्नि महाकाव्ये परमार्थविचारो नामाष्टमः सर्गः ॥ ८ ॥

---

१ **विगलित°** वा० मु० ॥ २ **कमलस°** वा० मु० ॥ ३ **व्यथिते व्ययेन यस्य** मु० ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नवमः सर्गः ।

चिकीर्षिता श्रीसचिवेन तीर्थयात्राऽथ सोऽयं[1] समयः समेतः ।
महात्मनामीहितकार्यसिद्धौ, विधिर्विधत्ते हि सदाऽऽनुकूल्यम् ॥ १
धर्मैकमित्रोपनिमन्त्रणार्थं[2], तेनार्थिमित्रेण चराः प्रयुक्ताः ।
न केवलं स्वेन कृतार्थितेन, परैः कृतार्थैः कृतिनः कृतार्थाः ॥ २
रथानथाऽऽनन्दविसंस्थुलोऽयं, लोकः प्रयाणप्रवणांश्चकार ।
उपक्रमे पुण्यकृतां क्रियाणां, राभस्यमभ्यस्यति को न साधुः ? ॥ ३
पाथेयवन्तः पथि योग्ययुग्याः, सोपानहः सोदकभाजनाश्च ।
श्रीवस्तुपालेन समं जनौघाः, प्रयाणकाय प्रवणा बभूवुः ॥ ४
आकारितस्तेन कृतादरेण, दूरादपि श्राद्धजनः समेतः ।
ययुस्तदीयानि पुनर्यशांसि, दिगन्तरेभ्योऽपि दिगन्तराणि ॥ ५
समं समग्रैरपि बन्धुवर्गैर्निसर्गबन्धुर्विबुधव्रजस्य ।
शुभे मुहूर्तेऽथ शुभैर्निमित्तैर्मन्त्री स्वनाथानुमतः प्रतस्थे ॥ ६
पुरः प्रशस्तां फल-पुष्पहस्तां, प्रमोदमानः प्रमदां विलोक्य ।
निरन्तरायां पथि तीर्थयात्रां, मन्त्रीश्वरश्चेतसि निश्चिकाय ॥ ७
स्थितः क्षणं क्षीरतरोरधस्तात्, कृतानुवृत्तीन्[3] सुजनान् निवर्त्य ।
खरस्य वामं स्वरमध्वगामी, शुश्राव सुश्रावकचक्रशक्रः[4] ॥ ८
अक्षेषु नित्यं कृतनिग्रहोऽपि, जग्राह तांस्तान् नियमानमात्यः ।
स्वभावशुद्धाः सुधियो हि तेषां, पावित्र्यलाभाय तथापि लोभः ॥ ९
रथैस्तुरङ्गैः करभैर्महोक्षैर्जग्मुस्तदा केऽपि कथञ्चनापि ।
मन्त्रीश्वरे धर्मधराधुरीणे, तस्मिन् विशश्राम भरस्तु तेषाम् ॥ १०
न वाहनं यस्य स तस्य यानं, नासीद् धनं यस्य स तस्य वित्तम् ।
न चीवरं यस्य स तस्य वस्त्रं, कल्पद्रुकल्पः प्रददौ[5] पदव्याम् ॥ ११
भुङ्क्ते स्म सर्वेष्वपि भुक्तवत्सु, शेते स्म सुप्तेषु स यात्रिकेषु ।
प्रबुध्यते स्म प्रथमं तदित्थं, सङ्घप्रभुत्वव्रतमाचचार ॥ १२
प्रभूतभोज्यानि बहूदकानि, सगोरसान्युन्मदमानवानि ।
तस्यातिदुर्गेऽपि पथि प्रयाणान्युद्यानलीलासदृशान्यभूवन् ॥ १३

---

१ °यं शारदा समे° मु० ॥ २ निबन्धनार्थं मु० ॥ ३ °न् स्वज° प्र० वा० ॥ ४ °शक्तः वा० कां० ॥ ५ °दौ पृथिव्याम् वा० मु० ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यात्राप्रसङ्गेन जगाम येषु, पुरेषु पौरोच्छ्रिततोरणेषु ।
तेषामधीशैः सविशेषमेष, सम्मान्यमानः सममानयत् तान् ॥ १४
अभ्यर्थ्यमानः पथिकैरनेकैर्वस्तून्यनेकान्यपि वस्तुपालः ।
तेभ्यः प्रभूतानि पथि प्रयच्छन्, नाहङ्करोति स्म न कुप्यति स्म ॥ १५
गीतानि जैनोन्युचितानि गातुं, जनो जगौ वर्त्मनि मध्यमध्ये ।
श्रीवीरधवलाधीशस्वान्तसन्तोषहेतवे । सोमेश्वरं तदानर्च मन्त्री नानाविधार्चनैः ॥ ५३५
नरेन्द्रादेशतो मन्त्री सोमनाथमहेशितुः । माणिक्यखचितां मुण्डमालामयमकारयत् ॥ ५३६

2 See *Ueber das Leben des Jaina-Mönches, Hemachandra,* S. 27 f.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

NOTES ON VASTUPĀLA'S WARLIKE DEEDS

While Arisiṁha, true to his plan, sings only of the *sukṛitas* — the pious deeds of Vastupāla, Amarapaṇḍita endeavours to acquaint posterity also with the heroic deeds of his patron. He evidently knows of only one, the victory of Vastupāla over *Saṁgrāmasiṁha*, the son of *Sindhurāja*, who seems to have been a petty vassal-prince or village chief in Vaṭakūpa near Cambay, and over his ally *Śaṅkha*. He says, I. 44 : "They call him a Jaina; but the illustrious minister Vastupāla is devoted also to Śiva. He washed the master who wears the form of air (*i.e.*, goes naked) with the water of shining fame which he took from *Śaṅkha*." Further, VIII. 46 : "Thy sword, illustrious Vastupāla, beautiful in rising and brandishing, valiant in deed, defeated in the world that *Saṁgrāmasiṁha*." And X. 45 : "Thy glory, O Vastupāla, which shines by the victory over *Sindhurāja*, is like the moon in the sky, since the spot in it is certainly the face of Sindhurāja, which was blackened by his deep shame."

Vastupāla's feud with *Saṁgrāmasiṁha* and *Śaṅkha* is related at length by Someśvara in the *Kīrtikaumudī*, IV–V, and Someśvara also is unable to report any other warlike deed of his friend. Since, then, we possess two eulogies, which, although otherwise independent of each other, mention only this one exploit, we may conclude that the accounts in the later *Prabandhas* of the numerous heroic deeds of Vastupāla and Tejaḥpāla, in the beginning of their career, deserve on great confidence.

In conclusion, it may be mentioned that Amarapaṇḍita twice addresses *Vastupāla* by the name of *Vasantapāla*. This was his poet-name, under which he wrote the *Naranārāyaṇānanda-kāvya*, which I found in Aṇhilvāḍ in 1875.[1]

---

1 A copy of the work is in the Deccan College Collection of 1875–77 No. 731.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

INTRODUCTION

of the Sukritasamkirtana text by late Muniraja Shri Chaaravijayaji Maharaja

साक्षाज्जिनाधिपतिधर्मनृपाङ्गरक्षो जागर्ति नर्त्तितमना मुदि वस्तुपालः ।

The Sukṛtasankīrtana is a historical Mahākāvya describing the good deeds of Vastupāla. It consists of eleven cantos. and at the end of each conto are appended five verses composed by a Amara Paṇdita. Three out of these are eulogistic, the fourth mentions Arisimha as the author of this work and praises his poetical skill, while the fifth rocords the fact that these four verses are composed by Amara.

The popularity Of the work. The Sukṛtasankīrtana does not seem to have been popular even among the Jains. Verses from Someśvara's Kīrtikaumudī are often found in the Prabandhakośa and Jinaharsha's Vastupālcharitra, but none from the Sukṛtasankīrtana. Bālachandra has also composed his Vaśantāvilas on the style of the Kīrtikaumudī.

Literature about Vastupāla — The main works about Vastupāla's history are as under:—

Contemporary

I	Sukṛtasankīrtana.	
II	Kīrtikaumudī.	
III	Dharmābhyudaya.	} Udayaprabha
IV	Sukṛtakīrtikallolinī.	
V	Hammīramadamardana.	} Jayasimha Sūri.
VI	Vastupāla-Tejahpāla Praśasti	
VII	Vasantavitāsa by Bālchandra.	

Later

VIII Vastupālaprabandha in the Prabandhachintāmaṇi.
IX Vastupālaprabandha in the Chaturvimśatiprabandha.
X Vastupālacharitra of Jinaharsha.

The author and his religion — The author of the Sukṛtasankīrtana is Arisimha, son of Lavaṇasimha. He was a protege of Vastupāla and we understand from the Upadeśatarangiṇī that like Someśvarsa, the author of the Kīrtikaumudī, he too got a *giras* and other gifts for this work[1]. It is not clear to what caste he beloṇged, whether he was a Bania or a bard. He has got the appellation Ṭhakura and this appellation was common among the Banias too. As to his religion, it is not quite certain whether he was a Jaina or a Shaiva. The fact of his bringing the spirit of Kumārapāla and making him to order Bhīma to revive the glory of Jainism speaks in favour of his being a Jaina, while his omission of salutation of Jina in the beginning of his poem and his telling us that Vastupāla's mother Kumāradevī, though a leader among those following Jainism, had faith in Śiva too, which is not mentioned by any other writer, mey lead one to believe that he was a Śaiva,

(1) स्वसङ्कीर्तनगुणकुलपूर्वजावदातप्रतिपादककीर्तिकौमुदीसुकृतसङ्कीर्तनकाव्यकृत्सोमेश्वरारिसिंहयोर्ग्रामग्रासाश्वदुकूलादि-दानं यावज्जीवार्हं दत्तम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

of course, not staunch. Jahlaṇa's Sūktimuktāvalī quotes four verses of Arasi Ṭhakkura,[3] who is most probably the same as our author.

Amarachandra and his relation with Arisinha — Amarachandra is an illustrious figure in Sanskṛta literature. The fame of his works was not only restricted among the Jainas, but also extended to the Brahmins among whom his works Bālabhārata and Kavikalpalatā were popular. His other available works are Chhandoratnāvalī, Syādiśabdasamuchchaya and Padmānanda Kāvya. The last work was composed at the request of Kosṭhāgārika Padma, a Vāyaḍa Bania of Pattan.[3] It is otherwise known as Jinendracharitra, as it gives the lives of Tirthankaras. The Prabandhakośa mentions two other works of his, Sūktāvalī and Kalākalāpa. He compared in one place in his Bālabhārata the braid (वेणी) to a sword and for this he was known as Veṇīkṛpāṇa Amara. Amara was the pupil of Jinadatta Śūri of Vāyaḍagachchha. the author of the Vivekavilāsa. Jinadatta Sūri's name is mentioned in this poem among the Ācharyas who accompanied in Vastupāl's pilgrimāge Śatruñjaya. The Prabandhakośa tells us that Amarachandra got the charm of Siddhasārasvata from Kavirāja Arisimha, pupil of Jinadatta Sūri and by his chanting this for twenty one days the Goddess of Learning appeared before him from the disc of the moon at the midnight of the twenty-first day and gave him the boon that he would be a Siddha Kavi, honoured by all kings. The same Prabandha describes his entry into the court of Vīsaladeva and through him of his teacher in fine arts, Arisimha. But the Prabandhachintāmaṇi tells us that Amarachandra had entered the court of Dholka in the time of Vastupāla and was recognised as a poet of power and note. Amarachandra does not mention in any of his published works that he was a pupil of Arisīmha in fine arts but it is only clear from the works that he held Arisimha and his poetry in high esteem. The story about Amara's getting Siddhasārasvata charm from Arisimha and also his introduction of Arisimha into the court of Vīsaladeva should be accepted with much reserve. One thing is, however, clear from this that both Amara and Arisimha occupied a remarkable position in the literary court of Visaladeva. Just as Amarachandra had composed four verses in the Sukṛtasankīrtana, so the Sūtras of Kavikalpalatā of Amarachandra were composed partly by Arisimha and partly by

---

(2) अतिविपुलं कुचयुगलं रहसि करैरामृशन्मुहुर्लक्ष्म्याः ।
तदपहृतं निजहृदयं जयति हरिर्मृगयमाण इव ॥
मध्येन तस्या विजितः कृशाङ्ग्याः पञ्चाननः काननबद्धवासः ।
तस्याः स्तनस्तम्भतटीधियैव कुम्भौ गजानां कुपितो भिनत्ति ॥
दधिमथनविलोलल्लोलदृग्वाणिदंभादमदयमनङ्गो विश्वविश्वैकजेता ।
भवपरिभवखेदत्यक्तबाणः कृपाणश्रममिव दिवसादौ व्यक्तशक्तिर्व्यनक्ति ॥
कान्ताऽस्मद्दैवगत्या कथमपि गमितान्यन्तरालोत्थभक्ष्या-
ण्युड्डीयोड्डीय भूयस्तरुशिखरशिखामेव तेभ्यः श्रयन्ते ।
इत्थं त्वद्वैरिनारी गिरिषु नरपते ! जंबुलुम्बीकदम्ब-
भ्रान्त्या भर्तुर्बुभुक्षोः कथयति पुरतश्चेष्टितं षट्पदानाम् ॥
Jahlaṇa's Sūktimuktāvalī.

(3) पद्मेनाभ्यर्थितः स श्रीजिनेन्द्रचरिताह्वयम् ।
वाक्सहायो महाकाव्यं निर्ममे निर्ममेश्वरः ॥ पद्मानन्द १–४३

Amara[1]. Amarachandra mentions in his Kavikalpalatā one more work of Arisimha, Kavītārahasya. Amarchandra calls Arisimha in the Sukṛtasankīrtana as an able disputant.

Analysis of the work — The *first* canto gives the genealogy of the Chāpotkaṭa kings. Of Vanarāja it is said that he founded the city of Anahilla Pattana and that he erected there the temple of Pānchāsara Pārśvanātha.

After him Yogarāja, Ratnāditya, Vairisimha, Kshemarāja, Chāmuṇda, Rāhaḍa & Bhūbhata successively ruled over Gujarat. This list of Chāvdā kings is identical with that given in the Sukṛtakīrtikallolinī of Udayaprabha. In view of the concurrence of these two authorities, the statement in Krishnāji's Ratnamālā, which is not so old as is believed, is unreliable.

The *second* canto describes the reigns of the Chaulukya kings. Mūlrāja's pilgrimage to Someśvara every Monday is also mentioned in Bālachandra's Vasantavilāsa. The fourth verse refers to his erection of Tripurusha Prāsāda in Anahillavāda. Mūlaraja defeated Bārapa, the general of the king of Kānyakubja, and Laksha, king of Cutch. Vallabharāja's victory over the king of Mālvā is celebrated in verse 13th. He had the *biruda* of Jagajzampana. This *biruḍa* is found in the Kumārapālapratibodha, Kīrtikaumudi, Sukṛtakīrtikallolinī and Vasanta-vilāsa. Durlabharāja was very modest and was ashamed when his court poets compared him to Krishna. Bhīma defeated Bhoja of Dhārā. Karṇa conquered the king of Mālvā and brought home from there an image of Nīlakaṇtha Śiva, Jayasimha conquered Barbaraka and took prisoner Yaśovarma, king of Dhārā. He had the tank called Siddhasaras dug and a high pillar of victory built. Jayasimha was very devotional towards his mother. Kumārapāla abolished the confiscation of the property of tradesmen dying without male heirs and caused Jaina temples to be built in every city. He conquered the king of Jāngla, Arṇorāja of Śākambharī, and his general Āmbaḍa who was a Bania, defeated and killed the Kadamba king Mallika Arjuna of the Konkaṇa. This victory of Āmbaḍa is coroborated by Bālchandra in his Vasantavilāsa. Ajayadeva generally called Ajayapāla got from the king of Śāmbhara a golden Maṇḍapikā. Mūlarāja II, though a child, defeated the Turushkas, Mahamad Sāhabuddin Ghori. Bhīmadeva II was very charitable and extravagant. His kingdom was being devoured by his powerful Maṇḍalesas, whom he was unable to control. Bhīma was thus filled with anxiety about the fate of his kingom. One night a glorious and splendid god, the spirit of his grand-father Kumārapāla, appeared to him in a dream and said that in order to restore order and to prevent dismemberment of the kingdom and to save the Jain faith, which was almost sinking, he should make Lavaṇaprasāda, son of Arṇorāja, son of Dhavala, to whom he had given the principality of Bhīmapalli, his Sarveśvara and make his son Vīradhavala his Yuvarāja. Vīradhavala then requested king Bhīma to give him good counsellors. Bhīma said that there served in this realm, Chanḍapa fiery in splendour, of the Porvāda lineage. His son was Chanḍaprasāda. His son Soma, who served under Jayasimha, acknowledged no master but king Siddharāja

(1) सारस्वतामृतमहार्णवपूर्णिमेन्दोर्मत्वाऽरिसिंहसुकवेः कवितारहस्यम् ।
किञ्चिच्च तद्रचितमात्मकृतं च किञ्चिद् व्याख्यास्यते त्वरितकाव्यकृत्रेऽत्र सूत्रम् ॥
काव्यकल्पलतावृत्ति I–I ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

Jayasimha, and no god but the lord of the Jinas. His son Aśvarāja who made the universe splendid with his glory made seven pilgrimages in order to escape seven hells. His wife Kumāradevi, though eminent in the Jaina religion, also had faith in Śiva. They had three sons–Malladeva, Vastupāla and Tejahpāla. Bhīma then gave Vastupāla and Tejahpāla as Vīrādhavala's counsellors, and said to him that his heroism, which will have sight with these two as eyes, may now trample down his enemies by searching them out. The two ministers should fulfil also the massage of Kumārapāla–the glorification of the Jaina faith. This account, though it materially differs from that given by Someśvara in this Kīrtikaumudī, agrees with that in the two other contemporary works:–(1) Jayasimha's Vastupāla-Tejahpālapraśasti and (2) Udayaprabha's Sukṛtakīrtikallolinī. Vastupala's own words should have, however, more weight in this respect. In the Naranārāyaṇānanda he calls himself as the high minister of the Gurjareśvara and in its last canto he says that he accepted the dependence of the high-ministership of Bhīma, the lord of Gujarat, for the incessant occurence of the festival of faith without any obstacle, which is sweet on account of its splendid power.[1] Bālchandra's account, however, agrees with that of Someśvara.

In the *fourth* canto Arisimha says that Vīradhavala with the help of his ministers conquered the earth and put down all wrong and violence. Tejahpāla then requested Vastupāla to keep in mind the king's command and support the Jaina religion. Both approached their spiritual family preceptor Vijayasena Sūri of the Nāgendragachchha. On this occasion the succession of the priest of this gachchha is given. (1) Mahendra Sūri (2) Shānti Sūri and Amara Sūri, who received from king Jayasimha the title–" Tiger Cubs " as they had overcome proud disputants even in their infancy (4) Haribhadra Sūri (5) Vijayasena Sūri. Vijayasena Sūri explained to them the religious merits of becoming a Sanghādhipati. Vastupāla resolved to do so.

In the *fifth* canto are described the preparations for the great pilgrimage. Narachandra Sūri of the Maladhāri gachchha and spiritual adviser of Vāstupāla on his mother's side, Jinadatta Sūri of the Vāyaḍa gachchha, Śānti Sūri of the Saṇḍeraka gachchha and Vardhamāna Sūri of the Gallaka people were among the notable Āchāryas who accompanied. Mention is made of a halt at Kāsahrada, modern Kāsandra, and of the institution of a great festival in the temple of Ṛshabha.

In the *sixth* canto we have a conventional description of the sun-rise.

In the *seventh* canto is described the ascent of the mountain and the devotional festivities. After paying his respects to Kaparadi Yaksha, the presiding deity of the Tirtha, Vastupāla entered the main temple of Ādinātha. The Sangha stayed on the mountain for eight days.

In the *eighth* the pilgrimage to Deva pattana and Mount Girnar is described. From Śantrunjaya the Sangha started to Devapattana for offering worship to Somanātha. Thence it proceeded to Girnar. A camp was pitched at the foot of the mountain and a festival was held. Then follows the description of the worship of Neminātha and the festivals. Having paid homage to Ambā, the presiding deity of the Jain temples on Mt. Girnar and Sāmba and Pradyumna who had obtained salvation here, the Sangha descended after a stay of eight days.

---

(1) भास्वत्प्रभावमधुराय निरन्तरायधर्मोत्सवव्यतिकराय निरन्तराय ।
या गूर्जरावनिमहीपतिभीमभूपमन्त्रीन्द्रतापरवशत्वमपि प्रपेदे ॥ XV 135

Jain Education International For Private & Personal Use Only www.jainelibrary.org

In the *ninth* is given a poetical description of the six seasons which the minister saw while descending.

In the *tenth* begins the return journey. The Sangha entered Vāmanasthalī—the modern Vanthali, in all magnificence. When the procession reached near Dholka, not only Tejahpāla but Vīradhavala came out with citizens to receive him. For a fuller description of the pilgrimage compare the last canto of the Dharmābhyudaya and the cantos eleven and twelve of the Vasantavilāsa.

In the *eleventh* canto the author describes the temples built and restored by Vastupāla.

In Anahilavāda Pattan:-

(1) The restoration of the temple of Panchāsara Pārśvanātha of Vanarāja.

In Cambay:-

(2) The erection of a golden staff and knob on the temple of Bhīmeśa.

(3) The erection of an Uttānpaṭṭa before Bhaṭṭāditya and of a golden wreath on his head.

(4) Excavation of a well in the temple grove called Vahaka of Bhaṭṭārka.

(5) The erection of a vestibule before the temple of the Sun-god Bakula.

(6) The restoration of the Maṇḍapa and of the temple of Vaidyanātha.

(7) The erection of high-walled enclosures for the sale of sour milk to avoid contamination.

(8) The erection of two Upāśrayas.

(9) The erection of a drinking hall with round windows on two sides.

In Dholka:-

(10) The Building of a temple of Ādinātha.

(11) The erection of two Upāśrayas.

(12) The restoration of the temple named Rāṇaka of Bhattārka.

(13) The construction of a Vāpī.

(14) The erection of a Prapā.

On the Śatruñjaya Hill:-

(15) The erection of an Indramaṇḍapa before the temple of Ādinātha.

(16) The erection of the temples of Neminātha and Stambhana Pārśvanātha.

(17) The erection of a statue of the Goddess of Sarasvatī.

(18) The erection of the statues of his ancestors.

(19) The setting up of three statues on elephants, his own, that of Tejahpāla and that of Vīradhavala.

(20) The erection of sculptures representing four summits of Mt. Girnar, Avalokana, Ambā, Sāmba, and Pradyumna.

(21) The preparation of a Toraṇa before the temple of Ādinātha.

(22) The erection of temples of Suvṛta of Broach and Mahāvira of Sāchor.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(23) The erection of a Pṛsṭhapaṭṭa of gold and precious stones below the image of Ādinātha.

(24) The raising of a golden Toraṇa.

In the vicinity of Pālitāṇā :-

(25) The excavation of a large tank.

(26) The erection of an Upāśraya.

(27) The erection of a Prapā.

In the village of Ānkevāliyā :-

(28) The digging of a tank.

On Mt. Girnar :-

(29) The erection of temples of Stambhana Pārśvanātha and Adīśvara of Śatruñjaya.

In Stambhana (Thāmna near Umreth) :-

(30) The restoration of the temple of Pārśvanātha.

(31) The erection of two Prapās near the temple of Pārśvanātha.

At Dabhoi :-

(32) The placing of golden capitals on the temple of Vaidyanātha, as the old ones were carried off by the king of Mālvā and also the erection of an image of the Sun-god.

On Mount Abu :-

(33) The building of a niche of Mallideva (in Samvat 1278) for the religious merits of the spirit of his elder brother Malladeva.

For fuller and more complete list of Vastupāla's temples and works of piety public utility, the reader is referred to Jinaharsha's Vastupālacharitra.

The date of the composition of the work — The Sukṛtasankīrtana was written before Samvat 1287, in which year the incriptions on Mt. Abu are dated., and after 1278 the date of building a niche of Mallinātha on Mt. Ābu, mentioned in the present work.

Dr. Bühler contributed a very valuable and exhaustive paper, *Das Sukrita-saṁkirtana,* in the *Sitzungberichte* of the Imperial Academy of Sciences of Vienna (Vol. CXIX, 1887) and an English traslation of the German paper was published in the Indian Antiquary Vol. XXXI (1902) pp. 477-495. For a complete and critical study of the career of this one of the greatest minister Gujarat has ever produced, one should read the introductions of the Naranārāyaṇānanda, Vasantavilāsa and Hammīramadamardana in the Gaekwad's Oriental Series. A photo of the statutes Vastupāla and his two wives will be found in the edition of the Naranārāyaṇānanda in the same series.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कीर्तिकौमुदी-सुकृतसंकीर्तनमहाकाव्ययोर्विशिष्टनामानुक्रमः ।

		पृष्ठ
अच्छोद (सरोवर)	की०	६
अजयदेव (अजयपाल चौलुक्यनृप)	सु०	१०३
अजयपाल (चौलुक्यनृप)	की०	९
अणहिलपाटक (गूर्जरराजधानी)	सु०	९६
अणहिल्लपुर (गूर्जरराजधानी)	की०	५
अणहिल्लपुरी (गुर्जरराजधानी)	सु०	१३३
अनुपमा (तेजःपालपत्नी)	की०	१४
अनूप (नृप)	सु०	१०३
अभिनन्द (कवि)	की०	४
अभ्युदयसिंह (भट)	की०	२५
अमरपण्डित (कवि)	सु०	९९, १०४, १०७, ११०, ११४, ११७, १२१, १२४, १२९, १३३, १३६
अमरसूरि (नागेन्द्रगच्छीय)	सु०	१०८
अम्बा (रैवतशिखर)	सु०	१३४
अरिसिंह (कवि)	सु०	९९, १०४, १०७, ११०, ११४, ११७, १२१, १२४, १२९, १३३, १३६
अर्कपालितक (ग्राम)	सु०	१३५
अर्णोराज (सपादलक्षनृप)	की०	८
,, (चौलुक्य)		९,१०४
अर्बुद (पर्वत)	सु०	१३५
अर्बुदाचल (पर्वत)	की०	९
अवलोकना (रैवतकशिखर)	सु०	१३४
अश्वराज (मन्त्री, वस्तुपालपिता)		१३,१४,१५, २३, १०६
आनन्दसूरि (नागेन्द्रगच्छीय)	सु०	१०८
आमशर्मा (गूर्जरराजपुरोहित)	की०	११
आहड (चापोत्कटनृप)	सु०	९९
इन्द्रमण्डप (स्थापत्यविशेष)	सु०	१३४
उज्जयन्त (रैवतक)		३९,१३४,१३५
कच्छ (जनपद)		७,१००
कपर्दी (यक्ष)		३८,११८,१३४
कर्ण (अङ्गराज)	की०	५
,, (कर्णदेव, चौलुक्यनृप)	की०	७
कर्णदेव (चौलुक्यनृप)	सु०	१०१
कादम्बरी (गद्यकाव्य)	की०	३
कान्यकुब्ज (जनपद)	सु०	१००
कालिका (देवी)	सु०	१०२
कालिदास (कवि)		३,४,१३३
काशि (काशीपुरी)	की०	५
कासहद (ग्राम)	सु०	११२
कुङ्कणेश (कोङ्कणनृप)	की०	८
कुमार (गूर्जरराजपुरोहित, सोमेश्वरदेवपिता)	की०	११
कुमारदेवी (वस्तुपालमाता)		१४,१०६
कुमारपाल (चौलुक्यनृप)		८,१०२,१०४,१०६
कुमारपुत्र (सोमेश्वरदेव)	की०	१०
कुलसिंह (भट)	की०	२५
कौङ्कण (जनपद)	सु०	१०३
कौरवेश्वर (दुर्योधन)	की०	५
क्षेमराज (चापोत्कटनृप)	सु०	९८
खङ्गार (सौराष्ट्रनृप)	की०	८
गङ्गा (नदी)	की०	५
गजाह्वय (हस्तिनापुर)	की०	५
गल्लक (गच्छविशेष)	सु०	१११
गाङ्गेय (भीष्मपितामह)	की०	५
गुलकुल (वंशविशेष)	की०	२४
गूर्जर (गूर्जरदेशवासी)	की०	११,१२
,, (जनपद)	सु०	१३१
गूर्जरधराधिपराजधानी (अणहिलपुर)	की०	११
गूर्जरपुर (अणहिलपुर)	की०	११,१३
गूर्जरराज (गूर्जरेश्वर, भीमदेव द्वि०)	की०	१८
गूर्जरराज्यलक्ष्मी (गूर्जरराज्याधिष्ठात्री देवी)	की०	१०
गूर्जरेन्द्र (गूर्जरदेशस्वामी)	की०	११
गूर्जरेश्वर (गूर्जरदेशस्वामी)	की०	७
गोद्रह (जनपद)	की०	१९
गौड (गौडदेशाधिप)	की०	८
चण्डप (मन्त्री, प्राग्वाट)		१३,३९,१०६,११७
चण्डप्रसाद (मन्त्री, चण्डपपुत्र)		१३,१०६
चम्पा (नगरी)	की०	५
चाणक्य (कौटिल्य)	की०	१३,१४,२५
चाचिगदेव (भट)	की०	२४

Jain Education International For Private & Personal Use Only www.jainelibrary.org

		पृष्ठ
चापोत्कट (राजवंश)	सु०	९६
चामुण्डराज (चौलुक्यनृप)		७,१००
,, (चापोत्कटनृप)	सु०	९८
चाहमान (राजवंश)	की०	४
चुलुक (राजवंश)	की०	२०
चुलुक्य (राजवंश)		१९,२०,१०४
चुलुक्यभर्त्ता (चौलुक्यनृप वीरधवल)	की०	२६
चैद्य (राजवंश)	की०	११
चौलुक्य (राजवंश)		७,४२,९९
चौलुक्यचन्द्र (वीरधवल)	की०	२५
चौलुक्यनृप (वीरधवल)	की०	२३
चौलुक्यवंश (राजवंश)	की०	९
जगज्झम्पन (वल्लभराज-बिरूद)		७,१००
जगद्देव (प्रतीहार)	की०	११
जयन्त (भट)	की०	२४
जयसिंह (चौलुक्यनृप, सिद्धराज)		८,१०८
,, (वस्तुपालपुत्र)	की०	१४
जाङ्गल (जनपद)	की०	८
जाङ्गलेश (जाङ्गलदेशनृपति)		९,१०३
जामदग्न्य (परशुराम)	की०	९
जिनदत्तसूरि (वायडगच्छीय)	सु०	१११
तापी (नदी)	की०	१९
तुरुष्क (जातिविशेष)	सु०	१०३
तुरुष्काधिपति (तुरुष्कजातीयनृप)	सु०	९
तेजःपाल (मन्त्री, वस्तुपालानुज)		१४,१०६, १३०,१३४
त्रिपुरी (नगरी)	की०	५
दक्षिण (जनपद)	की०	९
दक्षिणेन्द्र (दक्षिणदेशाधिप)	की०	१८
दर्पक (?)	की०	४
दर्भावती (नगरी)	सु०	१३५
दुर्लभराज (चौलुक्यनृप)		७,१०१
देवपत्तन (नगर)	सु०	१२१
धनपाल (कवि)	की०	३
धवल (चौलुक्यवंशीय, अर्णोराजपिता)		९,१०४
धवलकपुर (नगर)	सु०	१२९
धवलक्क (नगर)	सु०	१३०,१३४
धारा (नगरी)		५,८,१०१,१०२
धाराधीश (धारानृपति)	की०	९
नड्डूलनायक (नृपति)	की०	९
नरचन्द्र / **नरचन्द्रसूरि** } (कवि नागेन्द्रगच्छीय)	की०	४,१११
नरवर्मा (धाराधीश)	की०	८
नीलकण्ठ (कवि)	की०	४
नागेन्द्र (श्वेताम्बरगच्छविशेष)	सु०	११०
पञ्चासर (जिनमन्दिर)	सु०	९६,१३३
पत्तन (अणहिलपुर)		२०,१३२
पम्पा (सरोवर)	की०	६
परमार (राजवंश)	की०	८
पादलिप्तपुर (नगर)	सु०	१३५
प्रतापमल्ल (चौलुक्यसेनानायक)	की०	११
प्रद्युम्न (रैवतशिखर)	सु०	१३४
प्रभास (तीर्थविशेष)	की०	४१
प्रह्लादनदेव (कवि, नृपति)	की०	४
प्राग्वाट (वंशविशेष)		१३,१०६
बकपाटक (नगर)	की०	२१
बकुल (बकुलेश्वर-सूर्यमन्दिर)	सु०	१३३
बर्बर / **बर्बरक** } (राक्षस)		८,१०२
बल्लाल (नृप)	की०	९
बाण (कवि)	की०	३
बारप (सेनानायक)		७,१००
बिल्हण (कवि)	की०	४
भट्टादित्य (सूर्यमन्दिर)	सु०	१३३
भारवि (कवि)	की०	३
भीम (चौलुक्यनृप, प्रथम)		७,१०१
,, (चौलुक्यनृप, द्वितीय)		९,१०३
भीमदेव (,, ,,)	सु०	१०३
भीमपल्ली (ग्राम)	सु०	१०४
भीमेशवेश्म (शिवमन्दिर)	सु०	१३३
भुवनपाल (भट)	की०	२३,२४
भुवनसिंह (भट)	की०	२५
भूभट (चापोत्कटनृप)	सु०	९९
भृगुकच्छ (भृगुपुर)	की०	१९
भृगुपुर (भृगुकच्छ)	सु०	१३४
भोज (धारानृपति)		४,७,१०१
मथुरा (नगरी)	की०	५
मधूपघ्न (मथुरानगरी)	की०	५
मरु (जनपद)	की०	१९
मरुभूप (मरुजनपदनृपति)	की०	१९

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नाम			पृष्ठ
मल्लदेव	(मन्त्री, वस्तुपालाग्रज)		१४,१०६,१३५
मल्लिकार्जुन	(नृप)	की०	९
मही	(नदी)	की०	१९
महेन्द्रसूरि	(नागेन्द्रगच्छीय)	सु०	१०८
महोबकपति	(महोबकनगरनृप)	की०	८
माघ	(कवि)	की०	३,४
मानस	(सरोवर)	की०	६
मालव	(जनपद)		७,८,१००,१०१
मालवेश	(मालवनृपति)	सु०	१३५
मिथिला	(नगरी)	की०	५
मुञ्ज	(धाराधीश)	की०	४
मुञ्जालसुत	(मन्त्री)	की०	११
मूलराज	(चौलुक्यनृप, प्रथम)		७,११,९९
,,	(चौलुक्यनृप, द्वितीय)		९,१०३
यदु	(यदुवंशीय)	की०	१९,२०
यमुना	(नदी)	की०	५
यशोवर्मा	(धारानृपति)	सु०	१०२
यशोवीर	(कवि, मन्त्री)	की०	४
यादवेन्दु	(सिङ्घननृप)	की०	१८
यादवेन्द्र	(यदुवंशीयनृप)	की०	२१
योगराज	(चापोत्कटनृप)	सु०	९८
रत्नादित्य	(चापोत्कट)	सु०	९८
राष्ट्रकूट	(राजवंश)	की०	११
रैवतक	(पर्वत)		३९,१२२,१२३,१२९,१३५
लक्ष	(कच्छनृपति)		७,१००
लक्ष्मदेव	(नृप)	की०	२१
लङ्का	(नगरी)	की०	५
ललितादेवी	(वस्तुपालपत्नी)	की०	१४
लवणप्रसाद	(चौलुक्यवंशीय)		१०,१८,२०,२५
लवणप्रसादपुत्र	(वीरधवल)	की०	२०
लवणसिंह	(कवि अरिसिंहपिता)	सु०	१३३
लाट	(जनपद)	की०	१९
लाटेश्वर	(लाटजनपदनृपति)	की०	७
लावण्यप्रसाद	(लवणप्रसाद)		९,१०५
लावण्यसिंह	(तेजःपालपुत्र)	की०	१४
,,	(लवणप्रसाद)	सु०	१२४
वटकूप	(सरोवर)	की०	२३
वनराज	(चापोत्कटनृप)	सु०	९८,१३३
वनराजदेव	(,,)	सु०	९६
वर्द्धमान	(आचार्य, गल्लकगच्छीय)	सु०	१११
वल्लभराज	(चौलुक्यनृप)		७,१००
वसन्त	(वस्तुपाल)	सु०	११४,१२८,१३६
वसन्तपाल	(,,)	सु०	१०७
वस्तुपाल	(वीरधवल-महामन्त्री)		४,५,१४,१६,१७,२६,२७,३४,३७,३८,३९,४१,४२,९९,१०३,१०४,१०६,१०७,११०,११४,११७,१२१,१२४,१२८,१२९,१३०,१३१,१३३,१३५,१३६
वहक	(वन)	सु०	१३३
वामनस्थली	(स्थलविशेष)	सु०	१२९
वायटगच्छ	(श्वेताम्बरगच्छविशेष)	सु०	१११
वाल्मीकि	(आदिकवि)	की०	३
विक्रमसिंह	(भट)	की०	२५
विजय	(भट)	की०	२५
विजयसेन	(कवि, नागेन्द्रगच्छीयआचार्य)	सु०	१०८
विदिशा	(नगरी)	की०	५
विन्ध्याचल	(पर्वत)	सु०	१०२
विमल	(शत्रुञ्जयपर्वत)	सु०	१२०,१३५
विमलगिरि	(,,)	सु०	११७
वीर	(वीरधवल)	की०	१७,१९,२५
वीरधवल	(चौलुक्यवंशीयनृप, लवणप्रसादपुत्र)		१०,११,१२,२३,१०५,१०६,१०७,१३०,१३१,१३३,१३४
वीरनृप	(वीरधवल)	की०	२३
वीरभूपाल	(वीरधवल)	की०	२८
वीरम	(भट)	की०	२४
वैद्यनाथशिवसद्म	(शिवमन्दिर)	सु०	१३३
वैद्यनाथसदन	(,,)	सु०	१३५
वैरिसिंह	(चापोत्कटनृप)	सु०	९८
शङ्ख	(सिन्धुराज, सङ्ग्रामसिंह)		२०,२३,२४,२५,११०,११४,१२१,१३६
शत्रुञ्जय	(पर्वत)		३८,११२,११३,११७,१२०,१३४,१३५
शाकम्भरी	(जनपद)	की०	८
शान्तिसूरि	(नागेन्द्रगच्छीय)	सु०	१०८
,,	(सण्डेरकगच्छीय)	सु०	१११
शाम्ब	(रैवत-शिखरविशेष)	सु०	१३४

Jain Education International For Private & Personal Use Only www.jainelibrary.org

		पृष्ठ
सङ्ग्रामसिंह (शङ्ख, सिन्धुराज)		२४,२५,१०७, १२४, १२९
सण्डेरकगच्छ (श्वेताम्बरगच्छविशेष)	सु०	१११
सत्यपुर (नगर)	सु०	१३४
सपादलक्ष (जनपद)	सु०	१०३
सरयू (नदी)	की०	५
साकेत (अयोध्या)	की०	५
सामन्त (भट)	की०	२४
सिंह (नृप)	की०	२१
सिङ्घन (नृप)	की०	१८,१९,२०,२२
सिताम्बर (श्वेताम्बरजैनसंप्रदाय)	सु०	१०८
सिद्ध (सिद्धराज जयसिंह)	की०	६
सिद्धराज (जयसिंह)	की०	८,१३
सिद्धसर (सरोवर)	सु०	१०२
सिद्धेश (सिद्धराज जयसिंह)	की०	१३
सिद्धाधिपति (सिद्धराज जयसिंह)	सु०	१०६
सिद्धेश्वर (स्थलविशेष)	की०	२१
सिन्धुपति (सिन्धुजनपदनृप)	की०	८
सिन्धुराज (शङ्ख, संग्रामसिंह)	सु०	१३३
सिन्धुराजसूनु (शङ्ख, सङ्ग्रामसिंह)	की०	२०,२१
सिन्धुराजात्मज (शङ्ख, सङ्ग्रामसिंह)	की०	२३
सीता (मन्त्रिसोमपत्नी, अश्वराजमाता)	की०	१३
सुभट (कवि)	की०	४
,, (सेनानायक)	की०	९
सोम (मन्त्री, अश्वराजपिता)		१३, २५, ९९, १०६,११०,१३१
सोमनाथ (ज्योतिर्लिङ्ग)		४१,१००,१०२,१२१
सोमसिंह (भट)	की०	२५
सोमेश्वरदेव (गूर्जरराजपुरोहित)	की०	५,१०
सौराष्ट्र (जनपद)	की०	८,४१
स्तम्भतीर्थ (नगर)		१७,१३३,१३६
स्तम्भन (तीर्थ)	सु०	१३४,१३५
हिमालय (पर्वत)	की०	५
हरिभद्रसूरि (नागेन्द्रगच्छीय)	सु०	१०८
हरिहर (कवि)	की०	४
हेमसूरि (कविकालसर्वज्ञ सर्वतन्त्रस्वतन्त्र आचार्य)	की०	४

Jain Education International For Private & Personal Use Only www.jainelibrary.org

द्वितीय परिशिष्ट ।

श्रीअरिसिंहविरचितं

सुकृतसंकीर्त्तनमहाकाव्यम् ।

★

[पृष्ठाङ्क ९६–१३६]

Jain Education International For Private & Personal Use Only www.jainelibrary.org

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विषयानुक्रमः ।

१. चापोत्कटान्वयवर्णनो नाम प्रथमः सर्गः ।

२. चौलुक्यान्वयवर्णनो नाम द्वितीयः सर्गः ।

३. मन्त्रिप्रकाशो नाम तृतीयः सर्गः ।

४. धर्मदेशनो नाम चतुर्थः सर्गः ।

५. सङ्घप्रस्थानो नाम पञ्चमः सर्गः ।

६. सूर्योदयवर्णनो नाम षष्ठः सर्गः ।

७. शत्रुञ्जयदर्शनो नाम सप्तमः सर्गः ।

८. नेमिदर्शनो नाम अष्टमः सर्गः ।

९. षड्ऋतुवर्णनो नाम नवमः सर्गः ।

१०. पुरप्रवेशो नाम दशमः सर्गः ।

११. सकलकीर्त्तनकीर्त्तनो नामैकादशः सर्गः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रथमः सर्गः ।

वनराजः

श्रीवेस्मविस्मयमयप्रबलप्रतापश्चापोत्कटान्वयवनैकहरिर्नरेन्द्रः ।
आसीदसीमचरितः परितप्तशत्रुभालार्पिताङ्घ्रिनलिनो **वनराजदेवः** ॥ १ ॥

यत्खड्गखण्डितविरोधिशिरोऽधिरक्तस्रोतस्विनीभिरुदधिर्विदधे सरागः ।
येनाऽधुनाऽप्यरुणतां भजतस्तदङ्गसम्पर्कतोऽर्क-शशिनावुदयक्षणेषु ॥ २ ॥

निर्गत्य कोशकुहरादसिदन्दशूकः, श्यामो यथागतमगात् त्वरितं यदीयः ।
एतेषु मास्म विशदेष परैरितीव, रुद्धेषु वक्त्रविवरेषु कराङ्गुलीभिः ॥ ३ ॥

खट्वाङ्गसङ्गतकरस्तरवारिलग्नकृत्तारिमुण्डमिषतः समराङ्गणे यः ।
भालाधिरोपितहुताशनचण्डचक्षुराभादिभासुरविरोधिविभासुरश्रीः ॥ ४ ॥

तेने कृतान्तसमतां रसनासनाभि-धारोद्धुरो यदसिरञ्जनमञ्जुलश्रीः ।
अह्नाय यस्य युधि दर्शनसंज्ञयैव, भिन्दन्नरीनधित किङ्करतां कृतान्तः ॥ ५ ॥

स्तब्धप्रकम्पितविलीनविवर्णगात्रैः, खिन्नैर्विभङ्गुररवस्फुरदश्रुलेशम् ।
उन्मुच्य पौरुषमवाप्य च भीरुभावं, यः सेव्यते रिपुभिरुत्पुलकैः प्रसन्नः ॥ ६ ॥

आकर्ण्य तूर्णमुपकर्णयितुं च यस्य, कीर्तिं मुहुर्भुजगभीरुगणेन गीताम् ।
चक्षुःश्रवा रसवशेन दृशां निमेषोन्मेषक्रियामनिमिषोऽपि चकार शेषः ॥ ७ ॥

वक्रीकृते धनुषि मौक्तिकताडपत्रज्योत्स्नाम्बुभारभृति पल्वलतां दधाने ।
यस्याऽऽननं विकचवारिजकल्पमन्तर्भेजे विहाय परराजकरान् जयश्रीः ॥ ८ ॥

श्रीमत् पुरं भुवि पुरन्दरपत्तनाभं, तेनाऽऽदधेऽ**णहिल्लपाटक**नामधेयम् ।
स्त्रीणां मुखे स्मरतपस्विवनेऽजनीन्दुपद्मश्रियोरसुहृदोरपि यत्र योगः ॥ ९ ॥

अन्तर्वसद्घनजनाद्भुतभारतो भूर्मा भ्रश्यतादिति भृशं **वनराजदेवः** ।
पञ्चासराह्वनवपार्श्वजिनेशवेश्मव्याजादिह क्षितिधरं नवमाततान ॥ १० ॥

---

१ ग–"विशीर्ण" ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यस्मिन् सदैव निकृतानि निकेतनाग्र-जाग्रन्मणिद्युतिभरैर्नितमां तमांसि ।
आरम्भकालिममिषेण बहिःस्थितानि, तानि प्रसर्पदरघट्टरवै रटन्ति ॥ ११
जाड्यं जनेषु रजनीजनितं विभिन्द-न्नुद्दीपयन्नपि दिवाकरकान्तचुल्लीः ।
जालान्तरागतकरस्तरणिर्द्विधाऽपि, यस्मिन्नभूदनुगृहं ननु सूपकारः ॥ १२
यस्मिन् विलाससदनेषु विलासवत्यः, पत्युः करेऽपहृतवत्यधरोत्तरीयम् ।
रत्नप्रदीपविफलीकृतफूत्कृतस्त-न्नेत्रे निमील्य सुखतो दधतेऽन्धकारम् ॥ १३
पर्वक्षणे न खलु निश्चिनुते दिनेषु, सूर्यं सुवर्णसुरसद्मकिरीटकुम्भैः ।
यत्रोन्नतालयशिरःपुरयोषिदास्यै-र्नैव क्षिपापतिमपि क्षणदासु राहुः ॥ १४
सङ्कोचिताम्बुजकुलोऽपि हतार्ककान्त-क्रीडोऽपि पीडितरथाङ्गकुटुम्बकोऽपि ।
प्रातः प्रयाति विधुरुज्ज्वल एव यत्र, सौधावनिस्खलितधामनि धामनाथे ॥ १५
रुद्धेऽपि यत्र मरुदध्वनि वारिवाहै-र्लोकैः सदा नियमभानुविलोकभोजी ।
पूर्वाद्रिमौलिगतमेव गृहाधिरोहा-दर्कं विलोक्य लगति व्यवसायवीथ्याम् ॥ १६
यत्र प्रतिक्षणविवृद्धरसातिरेक-निष्कम्पदम्पतिकदम्बककैतवेन ।
रत्या सहाजनि निकाममनेकमूर्त्ति-रेकाङ्गमोहनरसैः स्मृतिभूरतृप्तः ॥ १७
यत्रोच्चसौधभुवि सव्यकारात्तपिण्डविश्रम्भिणां गगनसिन्धुजलद्विपानाम् ।
कुम्भान् विभूषयति भीरुगणः स्वभाल-सिन्दूरधूलिभिरसव्यकरोद्धृताभिः ॥ १८
यस्मिन्नुपर्युपरि गन्तुमशक्नुवन्तो, दूरेण सूरतुरगाः परितः स्फुरन्तः ।
उच्चैर्विशालमणिसालगतस्वबिम्ब-स्पर्द्धाप्लुतैर्दिनमितिं परिमाणयन्ति ॥ १९
चेद् योग्यताऽस्ति परिखां पिब मे त्वमेहि, विन्ध्योऽप्युदञ्चतु मयाऽपि हतोऽर्कमार्गः ।
यत्रेति केतुपटकिङ्किणिकारवैः खे, वप्रो वदत्युदधिपायिनमप्यगस्तिम् ॥ २०
मन्दाकिनी वियति तुङ्गविशालसाल-रोधद्विधाप्रसृमरा परितः स्फुरन्ती ।
शङ्के सुराधिपतिनिग्रहविग्रहाय, यत्रान्तरालपरिखाश्रियमादधाति ॥ २१
भुग्नानि भूमिधरभासुरसालभित्ति-भागेषु मारविवराण्यभितोऽपि यत्र ।
व्योमापगाजलगजप्रतिमानसीम-निर्मग्नदन्तहतिलक्ष्मनिभानि भान्ति ॥ २२
यद्रत्नवेश्मपरिमार्जनिकारजोभि-र्दूरोज्झितैरुपवनावनिदोषभीत्या ।
अभ्रंलिहो जगति यः पटुरत्नगर्भैः, कूटः किलाजनि जनेषु सुरत्नसानुः ॥ २३
यस्मिन् जनाय मणिवेश्मविभाविभिन्न-ध्वान्तोत्करेऽपि कथयन्ति विभातभावम् ।
लीलासरोवरसरोरुहिणीविकाश-सौरभ्यलुभ्यदलिनीकलकूजितानि ॥ २४

---

१ ग-क्षपाप ॥ २ ग-भग्नानि ॥

सत्यश्रमेण कृतकानि गृहेषु हत्वा, हन्तव्यरूपकशतानि विशीर्णदन्तः ।
सत्यान्यपि प्रतिभयेन न तानि हन्ति, सम्प्राप्तधर्म इव यत्र बिडालकोऽपि ॥ २५

यद्दानिदानमुदितेन वनीपकेन, लभ्यः प्रभूतसुकृतैः कथमप्यवाप्तः ।
छाया-विभूषण-पयोऽर्पणहेतुरेव, देवद्रु-रत्न-सुरभीविभवोऽपि भेजे ॥ २६

योगराजः

तत्रावनीविभुरभूद् **वनराज**राज्य-राजीवभानुररिवर्गवनीकृशानुः ।
श्री**योगराज** इति यस्य रराज पाणि-पद्मेऽब्धिपक्षसुभगा भ्रमरीव भूमिः ॥ २७

यस्यासिधेनुफलके नवनागवल्लि-पत्रोपमे मुखमुपेयुषि भूभुजङ्गैः ।
सद्यस्करक्तरसनैरभिवीरशय्या-माश्लिष्यते स्म जगती नवमोहनेन ॥ २८

रत्नादित्यः

भारं भुवो भुजभरेण बभार **रत्ना-दित्य**स्ततः क्षितिपमण्डलमौलिरत्नम् ।
चण्डासिदण्डदलितोरुतरावनीभृ-द्वंशालिविस्फुरितमौक्तिककल्पकीर्त्तिः ॥ २९

आदेशपत्रमिव यत्तरवारिदण्डं, वीक्ष्यैव दण्डधरचण्डधराधिपस्य ।
चक्रे प्रयाणकमरातिनरेन्द्रवर्गः, स्वर्गं प्रति त्वरितमद्भुतभीतिभावात् ॥ ३०

वैरिसिंहः

दुर्वारवारणघटोत्कटवैरिसिंहः, श्री**वैरिसिंह** इति भूदयितस्ततोऽभूत् ।
यत्कीर्तिकान्तिविशदेषु जगत्सु पाणि-स्पर्शेन चन्द्रमसमाकलयन्ति ताराः ॥ ३१

प्रत्यर्थिपार्थिवगणः समराङ्गणेषु, ग्रीष्मातिभीष्मतरणिद्युतिभारतुल्यैः ।
तप्तो महोभिरिव यस्य कृपाणवल्लि-धारागृहव्यतिकरव्यसनी बभूव ॥ ३२

क्षेमराजः

श्री**क्षेमराज**नृपतिर्वसुधां सुधांशु-ज्योत्स्नासमुज्ज्वलयशाः प्रशशास तस्मात् ।
यस्यासिवल्लिरिभकुम्भविभेदलग्न-मुक्ताफलैः कुसुमिता फलिता जयेन ॥ ३३

धूमीभवद्यदसिवल्लिरतीवतीव्रः, कोपानलः किमपि यस्य हृदि प्रदीप्तः ।
प्रत्यर्थिपार्थिवचमूरमणीसमूह-बाष्पाम्बुभिर्भृशमयं शमयाम्बभूवे ॥ ३४

चामुण्डराजः

विश्वप्रभुः कुतुककन्दुकितारिमुण्ड-**श्चामुण्डराज** इति राजयति स्म तस्मात् ।
पूरे प्रसर्पति यदीययशस्तटिन्या, दूरादमज्जदुडुपः सह तारकौघैः ॥ ३५

निर्यन् पयोमयपयोधिजलाद् घनान्ते, वीक्ष्याभितो जगति यस्य यशःप्रकाशम् ।
अद्यापि नापतति पारमिति प्रसर्पन्, लोकान्तशैलशिखरैः स्खलितो मुरारिः ॥ ३६

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आहडः

आसीदथ प्रबलशत्रुयशःशशाङ्क-श्रीराहुराहड इति क्षितिजीवितेशः ।
निर्लोठितोऽद्भुतयदीयकलाकलापै-र्मग्नः शशी किल तदीययशःसमुद्रे ॥ ३७
यत्कीर्त्तिमेव धवलामवलोक्य लोके, लोकोऽयमन्वहममन्यत पूर्णमासीम् ।
एतां पुनः सततमात्मनि चन्द्रचारं, पश्यन् कुहूतिथिवितर्कमवापदर्कः ॥ ३८

भूभटः

श्रीभूभटो रिपुभटोच्चयभेदरक्त-प्रोल्लासपल्लवितखड्गलतस्ततोऽभूत् ।
दिक्कुम्भिकुम्भमिषदिग्वनिताकुचाग्र-क्रीडाविशृङ्खलयशा जगतीभुजङ्गः ॥ ३९
दानच्छटासुरभिशीतलदिक्करेणु-लीलाचलश्रवणतालमरुत्तरङ्गैः ।
यत्कीर्त्तिमन्वहमिलाग्रविलासखिन्नां, दिग्योषितो जलधिसीमनि वीजयन्ति ॥ ४०
हरहसितसितानि तानि तन्व-न्नतनुतमानि जगत्त्रयीयशांसि ।
चिरमयमवनिं शशास भास्व-त्तरतरवारिनिवारितारिवर्गः ॥ ४१

किञ्च—

दीर्घायुर्भवतादिति द्विजवरैर्ब्रह्मायुरित्यन्वहं,
बन्दीन्द्रैरजरामरेति च कुलस्त्रीभिस्त्वमाशास्यसे ।
श्रीमन्त्रीश्वर वस्तुपाल ! किमपि ब्रूमस्तु विस्तारिणी,
कीर्तिर्नृत्यति यावदेव दिवि ते तावद् भवान् नन्दतात् ॥ १

उद्भ्रान्तैः सहसा पिनाकचलने क्षीरार्णवोल्लङ्घना-जङ्घालैः खरदूषणप्रशमनप्रारम्भसंरम्भितैः ।
उच्चै रावणनाशभासुरतरैरेभिर्यशोभिर्बभौ, श्रीसोमान्वयजोऽयमर्ककुलजक्षोणीधरस्पर्द्धया ॥ २
जैनं किलैनं जगदुः शिवेऽपि, श्रीवस्तुपालः सचिवस्तु भक्तः ।
शङ्काद् गृहीतैः शुचिकीर्त्तिनीरै-रसिस्नपद् योऽम्बरमूर्त्तिमीशम् ॥ ३
सदा प्रसादोन्मुखवस्तुपाल-दृक्पातपीयूषरसानुकारम् ।
अमुं प्रबन्धं प्रतिवादिदन्ति-सिंहोऽरिसिंहो रचयाञ्चकार ॥ ४
प्रतिसर्गं प्रबन्धेऽस्मि-न्नरिसिंहविनिर्मिते । इमान्यकृत चत्वारि, काव्यान्यमरपण्डितः ॥ ५

॥ इति श्रीसुकृतसङ्कीर्त्तननाम्नि महाकाव्ये चापोत्कटान्वयवर्णनो नाम प्रथमः सर्गः ॥ १ ॥

मूलराजः

पदेऽथ तस्याजनि भागिनेयः, चौलुक्यवंशार्णवपूर्णचन्द्रः ।
श्रीमूलराजः प्रतिकूलराज-समूलनिर्मूलनबद्धमूलः ॥ १

१ क-'निभानि भानि' इति पाठः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तथाऽस्य तेजोभिररातिजाति-रवाप तापव्यसनं वनान्ते ।
यथा हिमाम्भःकणसङ्गमङ्गे, दवस्फुलिङ्गेषु लगत्सु मेने ॥ २

सुव्यक्तभक्तिः प्रतिसोमवारं, यः **सोमनाथं** प्रणिपत्य वीरः ।
तद्भालनेत्रानलचन्द्रभाभि-र्बभार तेजश्च यशश्च पुष्टम् ॥ ३

सम्पूर्णशक्तित्रयसम्भवा यः, शम्भुत्रयीर्देवगृहच्छलेन ।
कीर्तिस्त्रिधा मूर्त्तिमतीः पताका-हस्तैर्नटन्तीर्घटयाञ्चकार ॥ ४

विजित्य यः संयति **कन्यकुब्ज**-महीभुजो **बारप**दण्डनाथम् ।
जहार हस्तिप्रकरं कराग्र-सूत्कारसंदीपितपौरुषाग्निम् ॥ ५

न भूभृतः केऽपि यदग्रभागे, भेजुर्गुरुत्वं किल साऽपि मग्ना ।
अदृश्यतां यत्तरवारिवारि-निधौ दधौ कच्छपलक्षसेना ॥ ६

स्वर्गं जिगीषुश्चरणाग्रलग्न-मग्निं विधूय प्रबलप्रतापः ।
महो महीयानसहिष्णुरन्यद्, बिभेद भानोरपि मण्डलं यः ॥ ७

चामुण्डराजः

क्ष्माखण्डमाखण्डलचण्डशक्ति-**श्चामुण्डराजः** प्रशशास तस्मात् ।
द्विषां मुखे क्रष्टुमसूनिवान्तः, कृतान्तबाहुर्यदसिर्विवेश ॥ ८

अजस्रमस्रैर्वनपादपानां, यस्यारिनारीभिरकारि सेकः ।
सान्द्रच्छदच्छायतया महान्त-स्ताभ्योऽपि ते प्रत्युपकुर्वते स्म ॥ ९

वल्लभराजः

तस्माद् भुजङ्गेन्द्रभुजो बभूव, भूवल्लभो **वल्लभराजदेवः** ।
यत्कीर्त्तिदासीकृतकौमुदीन्दु-मुखीमुखेन्दौ विशदोऽयमङ्कः ॥ १०

अटन्नटव्यां यदरातिवर्गो, दरातिरेकोज्झितराजलोकः ।
रीणोऽप्यतिक्रम्य पराक्रमेण, हरीन् दरीमन्दिरयाञ्चकार ॥ ११

जटालमौलिर्मृगचर्मवासा, निःस्वः फलाशी वनमध्यवासी ।
अध्यायदुग्रं हृदि यं तपस्वी, सदाऽपि रूपस्थमरातिभूपः ॥ १२

कच्चिन्न भङ्गोऽस्य भविष्यतीति, भाले लिपिं **मालवभूमिभर्तुः** ।
आरुह्य चूडामणिबिम्बदम्भा-ल्लुलोप कोपी यदसिर्जलाढ्यः ॥ १३

ऊर्ध्वस्थितारातिचमूसमूह-प्रच्छादनोच्छृङ्खलसैन्यरेणुः ।
यो धैर्यधुर्यो जगति द्वितीयां, दधौ जगज्झम्पन इत्यभिख्याम् ॥ १४

---

१ क-ख-°रको ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दुर्लभराजः

अभूच्च न्यायपरः परस्त्री-सुदुर्लभो **दुर्लभराज**राजः ।
यः कृष्णसाम्ये कथितैः कवीन्द्रै-र्विचिन्त्य गोपीचरितं ललज्जे ॥ १५
तमीदिने व्यत्ययतो वितेनु-र्यद्वैरिणः प्राप्य महीध्ररन्ध्रम् ।
तदौषधीदीपितमाप्रदोषात्, तमिस्रमिश्रं पुनराप्रभावात् ॥ १६

भीमराजः

अथावनीशोऽजनि शौर्यसीमा, **भीमा**भिधो येन युधि द्विषन्तः ।
श्रीभीम ! रक्षेति हरं स्मरन्तः, स्वध्यानबुद्ध्या मुदितेन मुक्ताः ॥ १७
वित्रस्यतो **मालव**भूमिभर्तु-र्श्रेष्ठेऽशुके गुप्तधृतत्रपस्य ।
यत्सैन्यधूलीभिरदृश्यवक्त्रा-म्भोजस्य **भोज**स्य हृदा न दीर्णम् ॥ १८
सर्वत्र सञ्चारिषु यच्चरेषु, चरन्नरण्येऽरिनरेन्द्रवर्गः ।
दरेण नश्यँल्लघुकन्दरेऽपि, गुणाय कार्श्यं गणयाम्बभूवे ॥ १९

कर्णदेवः

श्री**कर्णदेवो**ऽथ नृपस्त्रिलोक-विलोकनीयद्युतिराशिरासीत् ।
यं वीक्ष्य नारीहृदयैकवासो-धिकं ह्रियाऽभून्मदनोऽप्यनङ्गः ॥ २०
पूजासु पाणिस्थितपुष्पमाल-मालोकयन् यं पुरतः पुरारिः ।
क्रुद्धोऽपि पुष्पायुधयुद्धबुद्ध्या, भेजे भवानीहसितः प्रसत्तिम् ॥ २१
सम्पालयन्तो यदरीन् दरीषु, स्फुटं कुटुम्बित्वगता गिरीन्द्राः ।
अद्यापि दीप्तौषधिदीपदीप्ताः, क्षपां सशङ्काः क्षपयन्ति शङ्के ॥ २२
जित्वा बलै**र्मालव**भूमिपाल-मानीतवान् यः किल नीलकण्ठम् ।
तन्मूर्ध्नि सिन्धुप्रथिताध्वसंख्यं, प्रैषीद् यशः स्वं भुवनत्रयेऽपि ॥ २३

जयसिंहदेवः

बभार भूर्भारमथो जयश्री-निकेतनं श्री**जयसिंहदेवः** ।
भाले रराज प्रतिराजकस्य, राज्यप्रतिष्ठातिलको यदङ्कः ॥ २४
यत्र क्षितिं रक्षति काङ्क्षति स्म, **धारा** न धाराधरधोरणीनाम् ।
न वैरिदृग्वारिनदीकदम्बै-र्नदीनदीमातृक एव लोकः ॥ २५
उद्दामदानप्रसरस्य यस्य, लसद्यशोदुग्धपयोधिमध्ये ।
कल्पद्रु-चिन्तामणि-कामधेनु-यशोभिरासाद्यत मौक्तिकत्वम् ॥ २६

---

१ ख-कथिते ॥ २ ख-महीन्द्र° ॥ ३ ख-ग-मूर्द्धसि° ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सवार्द्धिमुर्वीमपि ये भुजेना-न्वहं वहन्तः क्षितिपा न खिन्नाः ।
क्ष्मालेशजैर्मूर्ध्नि घटैः क तेषां, खेदोऽस्तु यद्द्वारि सवारिलेशैः ? ॥ २७

युग्मेन यस्यासिलता प्रताप-कीर्त्ती प्रसूयाऽरमयत् कृतार्था ।
उच्चै रवीन्दुद्विककन्दुकश्री-शिल्पे बलान्दोलिनि विश्वतल्पे ॥ २८

धृता चिरं या हृदये निरस्ता, सा **कालिका** यज्जनितप्रसक्त्या ।
विलग्नहिञ्जीरकिणच्छलेन, स्थातुं पपात द्विषतां पदेषु ॥ २९

यस्य द्विषां कण्टककूटकोटि-क्षतानि कान्तारजुषां तनूषु ।
नव्यानि नित्यं भृशमापुराप-न्नवाङ्गनासङ्गनखाङ्कशोभाम् ॥ ३०

इष्टैः स्मृतैरप्यपरैः प्रकृष्टै-ररक्षिता यस्य युधि क्षतेभ्यः ।
त्रस्ताः श्वसन्तो रिपवः समस्ता, व्यस्तारयन् नास्तिकदृष्टिसृष्टिम् ॥ ३१

अपि द्विषः प्रागकृतप्रहारा-नभिन्दतामात्मचमूभटानाम् ।
स्पर्शेन पूतानपि यस्तुरङ्गान्, गङ्गाम्भसि क्षालयति स्म कीर्त्यै ॥ ३२

यः सञ्चरन् **बर्बर**खेचरस्य, स्कन्धाधिरूढो रचयाञ्चकार ।
मुखश्रिया सेन्दु दिवाऽपि देह-द्योतेन दोषाऽपि नभः सभानु ॥ ३३

यदीयकारागृहमाप्य **धारा**-पतिर्यशोवर्मनृपः सिषेवे ।
कम्पैः सदा बाष्पपयोभिरुष्ण-श्वासैश्च कालत्रयमेककालम् ॥ ३४

यत्कारितं **सिद्धसरः** सरस्वत्-पाताऽपि पातुं घटभूरशक्तः ।
न प्राग्यशोभङ्गभयादुपैति, च्छद्मैव **विन्ध्याचल**वृद्धिरक्षा ॥ ३५

श्री**सोमनाथो**ऽपि कृपैकपात्रं, यं मातृभक्त्यैकशुचिं विलोक्य ।
दक्षक्रतुब्रह्मशिरश्छिदादि-पापोर्मिनिर्मुक्तममन्यत स्वम् ॥ ३६

विश्वं जगद् येन विजित्य कीर्त्ति-स्तम्भस्तथा कोऽपि महानकारि ।
यथा हिमाद्रेरिव यस्य मूर्ध्नि, नभोनदी केतुपदं प्रपेदे ॥ ३७

लीलावलुप्तद्विजनायकस्य, यशःकुमारस्य कथाप्रथाभिः ।
विलज्जितो यः सततं द्विजेन्द्र-स्थानप्रदानव्यसनी नरेन्द्रः ॥ ३८

कुमारपालदेवः

तन्वत्यथाहर्गमनं सुधाभृद्-बुधालिगोष्ठीरसवञ्चितेऽस्मिन्[1] ।
कुमारपालः किल भूमिपालः, श्रियं मुमोष द्विषतां सरोषः ॥ ३९

हठाद्धरन्तं श्रियमब्जिनीनां, राजानमस्ते सति धामनाथे ।
यशो भटैर्यः प्रकटैर्न्यकार्षी-दमर्तृकस्त्रीधनमुक्तिधन्यः ॥ ४०

१ क-ख-°भिर्युधालि° ॥

भृगोः सुतेनेव जिनस्य धर्म-मुल्लास्य येन स्मितमार्गणेन ।
क्षतक्षमैरभ्रनववर्त्मनैव, हंसैरिवाशोभि जगद् यशोभिः ॥ ४१

सितांशुना कीर्त्तिविनिर्जितेन, ज्योत्स्नाततिढौंकनिकीकृतेव ।
न्यक्षेपि येनानुपुरं विहार-च्छलेन ढक्कैरवहर्षहेतुः ॥ ४२

युधि स्वयं यः किल **जाङ्गलेशं**, बली विजिग्ये किमु चित्रमत्र ? ।
अनूपभूपो वणिजाऽपि यस्य, यतो जितः **कौङ्कण**चक्रवर्त्ती ॥ ४३

अजयपालदेवः

अथोरुधामाऽ**जयदेव**नामा, ररक्ष दक्षः क्षितिमक्षतौजाः ।
न केऽपि कारकुहरेऽप्यरण्य-देशेऽपि नो यस्य ममुर्द्विषन्तः ॥ ४४

सपादलक्षप्रभुणा प्रदत्ता, रौक्मी बभौ मण्डपिका सभायाम् ।
सेवागतो मेरुरिव स्थिरत्व-जितो भृशं यस्य कृशप्रतापः ॥ ४५

बालमूलराजः

तदङ्गजो दिग्गजदन्तशय्या-विश्रान्तकीर्त्तिः किल **मूलराजः** ।
तुरुष्कशीर्षाणि शिशुर्जयश्री-लताफलानीव लसन्नगृह्णात् ॥ ४६

यस्मिन् सदोच्चैःशिरसि प्रतीची-महीभृति स्फारबलाम्बुराशौ ।
अस्तं समस्तारियशःशशाङ्क-प्रतापचण्डद्युतिमण्डलाभ्याम् ॥ ४७

भीमदेवः

श्री**भीमदेवो**ऽस्ति निरर्गलोग्र-भुजार्गलग्रस्तसमस्तशत्रुः ।
बिभ्रत् करे भूवलयं पयोधि-वेलामिलन्मौक्तिकमस्य बन्धुः ॥ ४८

आजन्म सद्म द्युसदां मदेक-क्षणप्रदानात् क्षयमेष मा गात् ।
इति स्मरन् यः कनकानि दातु-मुन्मूलयामास न हेमशैलम् ॥ ४९

यद्दानमश्रावि सदानुभूत-मेवार्थिभिर्गीतिषु खेचरीणाम् ।
विलासहेमाद्रिषु मेरुपाद-धियाऽऽगतानां स्वगृहोपकण्ठे ॥ ५०

सततविततदानक्षीणनिःशेषलक्ष्मी-रितसितरुचिकीर्ति**भीम**भूमीभुजङ्गः ।
बलकवलितभूमीमण्डलो मण्डलेशै-श्चिरमुपचितचिन्ताचान्तचिन्तान्तरोऽभूत् ॥ ५१

किञ्च—

स्वर्धेनु-शाखि-मणयः ! किमु यूयमेवं, लीनाः सुराचलशिलासु विसंस्थुलासु ? ।
भूमिं विभूषयत कोऽपि न याचते वः, श्री**वस्तुपाल**सचिवस्तु सनातनायुः ॥ १

Jain Education International For Private & Personal Use Only www.jainelibrary.org

श्रीवस्तुपालसचिवस्तुतिनित्यरक्तान्, पुंसस्तथाऽन्यजदकिञ्चनता विरक्ता ।
मन्दैव दैववचसाऽपि यथा प्रयाति, न प्रातिवेश्मिकनिकेतमुखेऽपि तेषाम् ॥ २

श्रीवस्तुपालाभिधमन्त्रिभर्तु-र्भूरब्दलेखेव तमालनीला ।
अभ्युल्लसन्ती जलराशिसीम्नि, रिपुप्रतापानलशान्तयेऽभूत् ॥ ३

एवं प्रबन्धमयमुद्धुरवादिवृन्द-वक्त्रारविन्दरजनीरमणोऽरिसिंहः ।
श्रीवस्तुपालचरितामृतसिन्धुवीचि-संवादवदूकमुचितं रचयाञ्चकार ॥ ४

प्रतिसर्गं प्रबन्धेऽस्मिन्नरिसिंहविनिर्मिते । इमान्यकृत चत्वारि काव्यान्यमरपण्डितः ॥ ५

॥ इति सुकृतसंकीर्त्तननाम्नि महाकाव्ये चौलुक्यान्वयवर्णनो नाम द्वितीयः सर्गः ॥ २ ॥

वीरधवलवंशवर्णनम्

अथादर्शि निशाशेषे, कृशाशेषविभूतिना । स्वप्ने कदापि भूपेन, कोऽपि श्रीभासुरः सुरः ॥ १
धात्र्या धर्त्तुं न शक्योऽय-मित्यङ्घ्रितलमीयुषः । वासुकेः फणवद् बिभ्र-न्नखरत्नजुषोऽङ्गुलीः ॥ २
हारान्तपद्मरागस्य, प्रभारागमिवाद्भुतम् । अधः परिदधद् वासः, कान्तादक्कोणशोणरुक् ॥ ३
कराग्ररोपणान्नीतै-रसमानैः समानताम् । लज्जितानूर्मिकारत्नै-र्नखान् दधदधोमुखान् ॥ ४
सेवकेषु दृढद्वेषिजये(यं) दातुमिवाऽऽवहन् । सुरचापचयं दोर्भ्यां, रत्नकङ्कणकान्तिजम् ॥ ५
प्रज्वलन्मणिकेयूर-प्रभापूरच्छलादयम् । भुजोष्मार्चिष्मदुत्तालज्वालाजालमुदञ्चयन् ॥ ६
लावण्यामृतपूर्णास्य-स्यन्दिबिन्दुकदम्बवत् । कलयन्नुरसि व्यक्तं, हारमुक्ताकलापकम् ॥ ७
हृद्वर्तिनः प्रसादस्य, प्रासादस्याद्भुतश्रियाम् । वैजयन्तीमिवाबिभ्र-दास्ये शुभ्रां स्मितद्युतिम् ॥ ८
कपोलयोरिवामान्तीः, कान्तीरावर्त्य पिण्डिताः । दधानः कर्णयोः स्वर्ण-कर्णिकायुगलच्छलात् ॥ ९
परितः स्फुरितज्योति-र्जटापटलपेशलम् । मौलौ नीलमणिं बिभ्रत्, केशवल्ल्यादिकन्दवत् ॥ १०
विहरच्चिकुरज्योति-र्झल्कारोर्मिकोमलाः । दधद्धम्मिल्लमाल्यान्त-र्भ्रान्तभ्रमरधोरणीः ॥ ११
अथ पृथ्वीपतिं प्रीति-लताकन्दमिवाऽऽत्मनः । वचनामृतवीचीभि-र्देवोऽसावित्यसिञ्चत ॥ १२
राजा कुमारपालो-ऽर्हद्धर्मासस्वर्गवैभवः । प्राप्तः पितामहस्तेऽहं, स्नेहं दुस्थे दधत् त्वयि ॥ १३
सदर्पमर्पयिष्यामि, तवाऽहं राज्यवाहकम् । वत्स ! विद्योत्स्यसे तेन, पवनेनेव पावकः ॥ १४
चुलुक्यकुलकान्तार-गजः श्रीधवलाङ्गजः । रिपुसर्पसुवर्णोऽभू-दर्णोराजमहीभुजः ॥ १५
यद्भयप्रभवस्वेद-पयःपरिचयैरिव । राज्यश्रीलिपयो लुप्ता, भालेषु प्रतिभूभृताम् ॥ १६
युधि व्यभासि यस्यासि-र्जयश्रीनाटिकानटः । पारिपार्श्वकवत् पार्श्व-वर्तिना समवर्तिना ॥ १७
मयाऽसौ विक्रमक्रीत-मनसा घनसाहसः । अकारि कारणं श्रीणां, भीमपल्लीपुरप्रभुः ॥ १८

दुष्टामात्यनिषिद्धस्य, येनाकल्पि बलीयसा । राज्यं ते मत्प्रसादाना-मनृणीकारकारणम् ॥ १९

सुतस्तस्याऽस्ति **लावण्य-प्रसादो** युधि यद्भुजः । असिं जिह्वामिवाकृष्य, रिपुग्रासाय सर्पति ॥ २०

युद्धमार्गेषु यस्याऽसिः, प्रतापप्रसरोष्मलः । अतीवारियशोवारि, पायं पायं न निर्ववौ ॥ २१

प्रतापतापिता यस्य, निमज्ज्यासिजले द्विषः । भीताः शीतादिवासेदुः, सद्यश्चण्डांशुमण्डलम् ॥ २२

सर्वेश्वरममुं कुर्व-न्नुर्वीमण्डलमण्डनम् । भविष्यसि श्रियो भर्त्ता, सुखाम्भोधिचतुर्भुजः ॥ २३

अस्याऽस्ति च सुतो **वीर-धवलः** प्रधनाय यः । भार्गवस्य पुनः क्षत्र-क्षयसन्धां समीहते ॥ २४

भ्रुवमारोपितां यस्य, युधि वीक्ष्याधिकश्रियम् । भुवि भ्रष्टं द्विषां चापैः, सज्जितैरपि लज्जितैः ॥ २५

यं विलोक्यातुलं विश्वे, दानेन च बलेन च । पश्यत्युपेन्द्रमिन्द्रोऽपि, श्वभ्रोत्थितबलिभ्रमात् ॥ २६

रिपुभूमिशिरोरत्नी-भूतक्रमनखत्विषे । दत्त्वाऽस्मै दोष्मते यौव-राज्यं राज्यं चिरं कुरु ॥ २७

किञ्च स्वःसीम्नि येनाह-मनाहतगतिः कृतः । तं कथञ्चित् कलौ जैनं, धर्मं मज्जन्तमुद्धर ॥ २८

इति श्रुत्वा नृपः स्मित्वा, लग्नस्तत्पादपद्मयोः । ग्रहीतुमिव पाणिभ्यां, पद्मवासामिव श्रियम् ॥ २९

प्रसादसादरस्तस्य, मूर्ध्नि देवोऽप्यधात् करम् । कमलं कमलागेह-मिव स्नेहवशंवदः ॥ ३०

प्रातस्तूर्यस्वने सूर्यो-दयशंसिनि भूभुजः । निद्रा नेत्राब्जमुद्राकृ-दथ रात्रिरिवाव्रजत् ॥ ३१

अथ विस्मितदृग्दृश्वा, महीपो दीपदीधितिः । साक्षाद् देवः किलास्तीति, मङ्क्षु पर्यङ्कमत्यजत् ॥ ३२

अथानणुमणिस्तम्भ-प्रभविष्णुप्रभां सभाम् । अभजद् भूभुजङ्गोऽयं कृतप्राभातिकक्रियः ॥ ३३

ततः क्षितिपतेरस्य, प्रतापेनेव निर्जितः । आगत्य प्रातरात्मानं, भानुर्भूशमदीदृशत् ॥ ३४

स्फुरन्तः स्वप्रतापाग्नि-स्फुलिङ्गा इव संसदि । मण्डलेशा व्यलोक्यन्त, सेवावन्तः क्षितिक्षितः ॥ ३५

राजा दृग्भ्यां सुधाकुम्भ-सदृग्भ्यामभ्यषिञ्चत । देवादिष्टौ पितृसुतौ, सर्वेश्वरपदे हृदा ॥ ३६

अभाषिष्ट सभाशिष्ट-समक्षमथ पार्थिवः । प्रसादसान्द्र**लावण्य-प्रसादा**य मुदा वचः ॥ ३७

अस्मिन् कृतोऽस्मि राज्ये त्व-त्पित्रा वित्रासितद्विषा ।
विध्यायन्तीमिमां भूति-मुद्भावयतु तद् भवान् ॥ ३८

गृहाण विग्रहोदग्र-सर्वेश्वरपदं मम । युवराजोऽस्तु मे **वीर-धवलो** धवलो गुणैः ॥ ३९

प्रार्थितौ प्रार्थनीयेऽर्थे, प्रार्थनीयेन भूभृता । देवादेशः प्रमाणं नौ, तावूचतुरिदं मुदा ॥ ४०

पाणी संपुटय्य रुन्धानो, लोलां भृङ्गीमिव श्रियम् । पुनर्व्यजिज्ञपद् **वीर-धवलो** धरणीधवम् ॥ ४१

न मे स्वामिन्नमात्योऽस्ति, यं विना विक्रमी हरिः ।
अब्दे शब्दोद्धुरे कुम्भि-भ्रान्त्योत्प्लुत्य पतत्यधः ॥ ४२

दक्षः शस्त्रे च शास्त्रे च, धने च प्रधने च यः । तममात्यं ममात्यन्त-गुणप्रगुणमर्पय ॥ ४३

---

१ क-ग प्रतापेन विनिर्जितः ॥ २ कपुस्तके–क्षितिक्षताः । ख–गपुस्तके–क्षितिक्षिताः ॥ ३ कपुस्तके–सुधाकुण्ड° ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इति लक्ष्मीलतोल्लास-सुधया तद्गिरा चिरम् । प्रीतः किञ्चिद् विचिन्त्यान्त-र्जगाद जगतीपतिः ॥ ४४

वस्तुपालवंशवर्णनम्

पुरा **प्राग्वाट**वंशाग्र-जाग्रत्कीर्तिलताततिः । राज्येऽस्मिन् महसा, **चण्डश्चण्डपः** सचिवोऽभवत् ॥ ४५

क्षीरोदसोदरो यस्य, यशोराशिर्निशाकरम् । भ्रातृव्योऽयमिति स्वर्गि-भुक्तिभीतमगोपयत् ॥ ४६

तद्भूश्च**ण्डप्रसादा**ख्यो, दाक्षदाक्षिण्यभूरभूत् । गृह्णन्ति यद्गुणान् दक्षा, लक्ष्यन्ते न च तेषु ते ॥ ४७

दासः कैलासभूमीभृद्, भुजिष्यो भुजगेश्वरः । किङ्करः शङ्करोत्तंस-शशी यद्यशसामभूत् ॥ ४८

कीर्तिकल्लोलितव्योमा, **सोमा**ख्यस्तत्सूतोऽजनि ।
न्यतिष्ठन्नर्थिनो नार्था, यस्मिन् यच्छति वाञ्छितम् ॥ ४९

अस्याऽऽसीत् कोऽपि न स्वामी, **सिद्धा**धिपतिना विना ।
विना जिनाधिपेनाभूद्, यस्य देवोऽपि कोऽपि नो ॥ ५०

तद्भूः कीर्तिभरैर**श्व-राजो** विश्वमराजयत् । तीर्थयात्रा व्यधात् सप्त, यः सप्तनरकच्छिदे ॥ ५१

त्रैलोक्यादुत्तमं वीक्ष्य, यं माता-पितृभक्तिभिः । भक्तये स्पृहयेन्माता-पितृभ्यामात्मभूरपि ॥ ५२

आसीत् **कुमारदेवी**ति, प्रीतिभूरस्य वल्लभा । या जैनधर्मधुर्याऽपि, गौरीवल्लभभक्तिभाक् ॥ ५३

तयोस्त्रयोऽभवन् पुत्रा, रिपुत्रासकरौजसः । यत्कीर्त्तिभिर्द्वितीयेव, त्रिस्रोताः समजन्यत ॥ ५४

प्रथमः प्रथितस्तेषां, **मल्लदेवो** धियांनिधिः । स्वाराज्ये गुरुबुद्धीनां स्वराज्यमतनिष्ट यः ॥ ५५

धीमानास्तेऽनुजस्तस्य, **वस्तुपालः** कलास्पदम् । अनुजेनान्वहं **तेजःपाले**नाराधितक्रमः ॥ ५६

इमौ ग्रन्थाब्धिमन्थानौ पन्थानौ श्रीसमागमे । तुभ्यं समर्पयिष्यामि, मन्त्रिणौ तौ तु मित्रयोः ॥ ५७

इत्युक्त्वा मुदिते **वीर-धवले**ऽसौ धराधवः । आहूय तौ स्वयं प्राह, नमन्मौली सहोदरौ ॥ ५८

युवां नरेन्द्रव्यापार-पारावारैकपारगौ । कुरुतां मन्त्रितां **वीर-धवल**स्य मदाकृतेः ॥ ५९

युवाभ्यामेव नेत्राभ्यां, चक्षुष्मानस्य विक्रमः । आलोक्यालोक्य निःशेषा-नपि द्विष्टान् पिनष्टु मे ॥ ६०

किञ्च प्रपञ्चयतमेव युवां जिनेन्द्र-धर्मे जिनेन्द्रपदपद्मयुगद्विरेफौ ।
स्वप्नावलोकितनृपाल**कुमारपाल**-सन्दिष्टमिष्टतममेतदवश्यकार्यम् ॥ ६१

आस्थानमण्डपशिरःप्रतिशब्ददम्भात्, केनाप्यदृष्टमरुताऽनुमतो हि तेन ।
शिक्षामिति क्षितिपतिः स तदा प्रदाय, वीराय **वीरधवलाय** मुदाऽऽर्पयत् तौ ॥ ६२

किञ्च—

कल्पान्तेषु यशोभरे तव हरिर्दुग्धाब्धिवासस्मयं,
मार्त्तण्डस्त्रिदिवापगारयपयःस्नानोत्सवं लप्स्यते ।
मिथ्योक्तिः कवितेति नात्र वचसि श्रद्धाऽस्ति चेत् तच्चिरं,
नन्द श्रीस्तुत **वस्तुपाल** ! भवतु प्रत्यक्षमेतत् तव ॥ १

१ ख-ग-पुस्तके-दाक्ष्यदां° ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शस्त्रविस्तृतिपरः परं परो, रक्षति क्षितिमिमामरातितः ।
वस्तुपालसचिवस्तु पालय-त्येष देव-गुरुवन्मनीषया ॥ २
संग्रामसिंहकुयशोभरभृङ्गभङ्गि-भास्वद्यशःकुसुमसौरभसम्भृताशः ।
वाग्वैभवेन किल कोकिलकोमलेन, शश्वद् वसन्त इव भासि **वसन्तपाल !** ॥ ३
श्री**वस्तुपाल**स्य यशस्तरङ्ग-पूरैः परीतं परितोऽ**रिसिंहः** ।
व्यधत्त दुग्धाब्धिमिव प्रबन्ध-ममुं समुद्भूतरसप्रशस्यम् ॥ ४
प्रतिसर्गं प्रबन्धेऽस्मि-**न्नरिसिंह**विनिर्मिते । इमान्यकृत चत्वारि, काव्यान्य**मरपण्डितः** ॥ ५

॥ इति सुकृतसङ्कीर्त्तननाम्नि महाकाव्ये मन्त्रिप्रकाशो नाम तृतीयः सर्गः ॥ ३ ॥

वस्तुपालसचिवेन्द्रशेमुषी-सम्मुखः पुरुषपौरुषोदधिः ।
मेदिनीमजयदब्धिमेखला-मेष **वीरधवलो**ऽथ दुर्द्धरः ॥ १
तन्महामतिरकम्पसङ्कटे, कण्टकालिरहिते हितः सताम् ।
न्यायवर्त्मनि समे समन्ततः, सम्मदेन समचीचरत् प्रजाः ॥ २
कस्यचिद्धरणिमण्डलच्युते, कुण्डलेऽपि मणिराजिराजिते ।
शङ्कयेव भृशमाशुशुक्षणेः, कोऽपि न क्षिपति पाणिपङ्कजम् ॥ ३
ऋद्धिवृद्धिविशदेषु सर्वदा, देशवासिषु जनेषु मानिषु ।
दीयमानमपि नाददीत यत्, कोऽपि तस्करकथा ततः कुतः ? ॥ ४
सर्वथाऽप्यसति याचके क्वचित्, कोऽपि किञ्चिदपि न प्रयच्छति ।
कौतुकात् कविभिरेव वर्ण्यते, दानवानिति महाधनो जनः ॥ ५
एतदाननविलासि पालय-त्याशु **वीरधवला**दपि द्विषः ।
आप्तगौरवमिति च्युतं क्षिते-र्नैव कश्चिदुदपाटयत् तृणम् ॥ ६
नित्यचैत्यकुतुकावलोकन-व्यग्रलोकमणिभूषणांशुभिः ।
जर्जरे रजनितामसेऽफलत्, पांशुलासु न मनोरथद्रुमः ॥ ७
इत्यवेक्ष्य मुदितं पदे पदे, लोकमुल्वणविवेकमेकदा ।
वस्तुपालसचिवं व्यजिज्ञपद्, व्यक्तभक्तिभरभासुरोऽनुजः ॥ ८
बुद्धिरेव तव देव ! दासता-मानिनाय विषमानपि द्विषः ।
मण्डनाय नृपमण्डलश्रिया-मेव **वीरधवल**स्य वाहिनी ॥ ९

Jain Education International For Private & Personal Use Only www.jainelibrary.org

योगपात्रवदपात्रमप्यलं, प्रीणयत्यनुदिनं धनैस्त्वयि ।
तस्करेऽपि भृशमर्थितां गते, शेरते पुरि सुखेन रक्षकाः ॥ १०
तावकीनयशसैव शाश्वतीं, पूर्णिमां शशिसमेन तन्वता ।
उज्ज्वले जगति पांशुलाकुलै-राकुलैरहह ! साधुता दधे ॥ ११
त्वन्महोभिरहिमांशुकोटिवद्, विप्रकीर्णनयनेन राहुणा ।
तिग्मभानुरनुपप्लुतोऽभवत्, सीम्नि वर्षति विशेषहर्षितः ॥ १२
इत्थमद्भुतविभूतिभूरभूद्, देव ! देशजनता नयात् तव ।
जैनधर्मपरिवर्धनोचितं, तन्महीरमणशासनं स्मर ॥ १३
बान्धवस्य सुरसिन्धुबन्धुरां, भारतीमिति निशम्य सम्मदी ।
आह किञ्चन विचिन्त्य चातुरी-रोचितः सचिवचक्रशेखरः ॥ १४
आत्मगोत्रगुरवः पुराऽभवन्, विश्रुता भुवि **महेन्द्रसूरयः** ।
यैः **सिताम्बरवरैः** सिताम्बरं, निर्ममे जगदमेयकीर्तिभिः ॥ १५
यैरजीयत जगत्त्रयीजयी, मन्मथोऽयमिदमद्भुतं न नः ।
यद्भवाऽपि यशसा यतो जितः, कामजिन्मुकुटकुट्टिमः शशी ॥ १६
शान्तिसूरिरथ तत्पदश्रियो-ऽलङ्कृतिः कृतिषु शेखरोऽभवत् ।
उद्गृणन्ति मरुतोऽपि यद्गुणान्, विस्मृतामृतरसा रसाधिकम् ॥ १७
यं सुदर्शनधरं हरिभ्रमा-न्नास्पृशद् गुरुरिति स्वयं रतिः ।
कान्तसोमकलमीशशङ्कया, यं जयीति मदनोऽपि नैक्षत ॥ १८
तत्पदेऽतिविदितप्रथावथा-ऽऽ**नन्दसूर्यमरसूरि**संज्ञकौ ।
वासमन्दिरविलासमन्दिरे, श्रेयसां मुनिविभू बभूवतुः ॥ १९
शैशवेऽपि मदमत्तवादविद्वारवारणनिवारणक्षमौ ।
यौ जगाद **जयसिंह**भूपति-र्व्याघ्र-सिंहशिशुकाविति स्वयम् ॥ २०
जल्पतोर्जगति निर्भरं ययो-र्यद्वदत्वमगमन् विवादिनः ।
खं यदि स्फुटरवानुवादतः, स्वस्य शब्दगुणतामदर्शयत् ॥ २१
तत्पदाम्बुरुहषट्पदाः पदं, भेजिरेऽथ **हरिभद्रसूरयः** ।
यैर्विलुप्य कुसुमानि कीर्त्तिभि-र्लीलयैव कुसुमायुधो जितः ॥ २२
संयमप्रभृतिभिस्तथा गुणै-र्यन्मनःपदमपूरि भूरिभिः ।
न प्रवेष्टुमिह मन्मथो यथा-ऽनङ्गतामपि गतः क्षमोऽभवत् ॥ २३
सन्ति सम्प्रति तदीयशासने, सूरयो **विजयसेनसूरयः** ।
उज्झितो जगति यैर्महास्रव-न्मन्मथोऽपि भवभेदकोऽभवत् ॥ २४

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सर्वतोमुखतपोहुताशनै-र्यैर्हुतः स्मर इति क्व विस्मयः ? ।
निर्जितः पुरजिता पुरा यतो, नेत्रमात्रतुलिताग्निनाऽपि सः ॥ २५
गम्यते तपनरम्यतेजस-स्तस्य वन्दनविधित्सया गुरोः ।
देशनां समधिगम्य तन्मुखाद्, धर्मकर्मणि निधीयते मनः ॥ २६
इत्युदीर्य मतिभासुरः पुर-स्कृत्य कृत्यविदसौ सहोदरम् ।
कम्पयन् कलियुगं मनोरथै-राससाद वसतिं मुनीशितुः ॥ २७
द्वारमध्यमविशन्निषेधिका-मुद्गिरन् गुरुमवेक्ष्य तत्पुरः ।
बाष्परुद्धनयनः पदे पदे, सम्मदेन घनगद्गदोऽस्खलत् ॥ २८
दुःषमाविषमतापतापितां, वीजयन्निव धरामसौ चिरात् ।
अञ्चलेन करचञ्चलेन त-च्चक्रिवान् गुरुनमस्कृतिं कृती ॥ २९
दन्तदीप्तिपटलच्छलोच्छल-न्मूर्त्तिमत्सुकृतवर्मितामिव ।
विच्चुटद्दुरितराशिराशिषं, निर्ममे तदनु निर्ममेश्वरः ॥ ३०
सोऽभ्युदञ्च्य कथमप्यथ क्षिते-र्भक्तिभारनमितं शिरश्चिरात् ।
अग्रतो मुनिविभोर्व्यभूषयद्, युक्तमासनममुक्तवासनः ॥ ३१
आकलय्य मुखवस्त्रिकां मुख-द्वारि विस्फुरितदन्तदीप्तिवत् ।
देशनां सचिवभर्तुरग्रतः कर्तुमारभत सूरिशेखरः ॥ ३२
वीतरागमतधर्मकारिणः, साधुवृत्तगुरुभक्तिभासुराः ।
श्रावकाः कतिचिदाप्तभावना-दान-शील-तपसो भवन्ति चेत् ॥ ३३
दान-शील-तपसां विजित्वरी, भावनैव भवनाशिनी भवेत् ।
तां पुनर्विजयते प्रभावना, सा तु सम्पदि सुखेन साध्यते ॥ ३४
अस्थिराः करभिका इव श्रियः, पातयन्ति नरकावटे नरम् ।
कञ्चिदेव निपुणं नियोजकं, लङ्घयन्ति विकटां भवाटवीम् ॥ ३५
श्रावकत्वममलं कुलं कला-चक्रवालमपि कश्चिदुद्वहन् ।
सम्पदा ललनयेव लोलया, पीतमद्य इव मोह्यते जनः ॥ ३६
श्रीलता शुचितरेषु रोपिता, स्थानकेषु समये यथाविधि ।
पुष्पिताऽद्भुततरैर्यशोभरै-राशु पुण्यफलहेतवे भवेत् ॥ ३७
न स्थिराः क्वचन यान्ति खण्डशः, सम्मिलन्ति रसवत् कथञ्चन ।
सम्पदः प्रकटितप्रभावनाः, कस्यचिद् यदि भवन्ति सिद्धये ॥ ३८
पावयन्ति परिक्लृप्तभावना-दान-शील-तपसः स्वमेव तत् ।
विश्वशासनविकाशदीपिकां, व्यातनोति विरलः प्रभावनाम् ॥ ३९

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जल्पितानि बहुशः प्रभावना-कारणानि मुनिभिः पुरातनैः ।
उत्सवो भवति तीर्थयात्रया, तेषु शेखरमणिस्तु निस्तुषः ॥ ४०

सिद्धलोक इव सङ्घतां गतः, पूज्यते ननु जनो जिनैरपि ।
धन्य एव स तु तीर्थयात्रया, कोऽपि सङ्घपतितां बिभर्त्ति यः ॥ ४१

दिक्पुरन्ध्रिकुतुकाय कस्यचिद्, रौप्यदर्पणनिभो यशश्चयः ।
सङ्घसङ्घटितरेणुमार्जना-दिन्दुधामधवलो विलोक्यते ॥ ४२

सङ्घभर्तुरधिरोपितस्तथा, वर्द्धते सपदि पुण्यपादपः ।
दर्शयत्यमृतसन्निभं यथा, विष्टपत्रितयमौलिगं फलम् ॥ ४३

नागेन्द्रगच्छमुकुटस्य मुनेरनून-माकर्ण्य कर्ण्यमिति मन्त्रिपतिर्विचारम् ।
नत्वा स्वधामनि जगाम जिनेन्द्रयात्रा-निर्माणनिर्मलमनोऽतिमनोरथश्रीः ॥ ४४

किञ्च—

वितन्वाते विश्वाङ्गणसदसि यावत् तव यशः-
प्रतापाभ्यामभ्युल्लसितरुचिवादं विधु-रवी ।
भज स्थैर्यं **सोमा**न्वयतिलक ! तावत् क सुकृतैः,
कृतैर्लभ्यः सभ्यस्त्वमिह गुण-दोषैकनिकषः ? ॥ १

ईदृक् कश्चिद् विपश्चिज्जनमनसि चमत्कारकारी पुराऽपि,
क्वापि प्रापि प्रबुद्धे वसुमति सुमतिर्**वस्तुपाल**स्य तुल्यः ।
येन क्षीरार्णवार्णश्चयसिचयजुषः सिद्धसिन्धूत्तरीय-
श्रीविस्तारोत्तराया व्यरचि शुभरुचिः कीर्त्तिभिः कञ्चुकस्ते ॥ २

सच्चक्रनन्दकपुरोगदयाद्भुतश्री-स्त्वं **वस्तुपाल** ! पुरुषोत्तम ! जिष्णुरेव ।
तद् दूयते तु हृदि मेऽन्वहमेव शङ्खो, यत् **सिन्धुराज**तनुभूर्न करे गृहीतः ॥ ३

कविर्न को निस्तुष**वस्तुपाल**-यशःसुधाविद्गुरसं रसज्ञः ।
प्रबन्धमास्वादयते**ऽरिसिंह**-मुखारविन्दैकमरन्दमेनम् ? ॥ ४

प्रतिसर्गं प्रबन्धेऽस्मिन्**नरिसिंह**विनिर्मिते । इमान्यकृत चत्वारि, काव्यान्य**मरपण्डितः** ॥ ५

॥ इति सुकृतसंकीर्त्तननाम्नि महाकाव्ये धर्मोपदेशनो नाम चतुर्थः सर्गः ॥ ४ ॥

---

१ ख-ग-°धवलोऽवलो° ॥ २ ख-°ल्लसिरुचिविवादं ॥

स तीर्थयात्रासु मनोमनोरथं प्रकाशयन् सम्मदमेदुरोद्यमः ।
पुरे पुरे श्राद्धजनाय नायको, विवेकभाजां लिखितान्यलीलिखत् ॥ १
अवाहनानामपि वाहनावली-मशम्बलानामपि शम्बलं बली ।
अकिङ्कराणामपि किङ्करान् कृती, वितीर्य सङ्घे समवीवहद् बहून् ॥ २
अदोषधीर्मन्त्रिपतिस्तदौषधी-रमीमिलद् विश्वरुजां विजित्वरीः ।
बभूव ताभिर्भृशमौषधीपतिः, स कौमुदीकोमलकीर्त्तिकारणम् ॥ ३
वृथैव वैद्याननवद्यवैभवान्, समं स मन्त्री जगृहे महेच्छया ।
प्रभूष्णुसङ्घक्रमरेणुराशिजं, तदाऽखिलव्याधिहरं तमोऽपि यत् ॥ ४
न यद्यपि प्रौढवृषप्रभावतो, भविष्यति स्पृष्टमनोभिदा क्वचित् ।
परोपकाराय तथाऽप्ययं कृती, युगादिसर्वज्ञकृताग्रहोऽभवत् ॥ ५
अथासितीव्रव्रतनिर्जितान्तर-द्विषो भवाम्भोनिधिकुम्भसंभवान् ।
मठेषु गत्वा स्वयमद्भुतादरः, समं शमीन्द्रान् समवाहयत् कृती ॥ ६
सतां पतिः सङ्घपतित्वरोपणा-भिषेकमासाद्य गुरोः कराम्बुजात् ।
शुभे मुहूर्त्तेऽद्भुतबाहवाहिनी-वृतोऽचलच्चन्दनचर्चिताकृतिः ॥ ७
ततश्चतुर्विंशतितीर्थकृत्कला-कलादितीर्थङ्करदेवतालयः ।
चचाल नृत्यादिविनोदतत्परः, प्रजामुदश्रुस्नपितेन वर्त्मना ॥ ८
पिबन् पयः स्वःसरितो वियद्वने, शशाङ्ककान्तीस्तृणुते तृणोपमाः ।
विशृङ्खलो यस्य यशःकिशोरकः, समं त्रिगोत्रैकगुरुस्ततोऽचलत् ॥ ९
अथानुचेलुर्नरचन्द्रसूरयो, लसत्त्रसस्तोमविलोकनच्छलात् ।
दयैव सिञ्चन्त इवाद्भुतक्रमां, प्रयाति सङ्घे वसुधां सुधान्तया ॥ १०
अथाचलन् वायटगच्छवत्सलाः, कलास्पदं श्रीजिनदत्तसूरयः ।
निराकृतश्रीषु न येषु मन्मथः, चकार केलिं जननीविरोधतः ॥ ११
भवाभिभूतेन मनोभुवा भया-दनीक्षितैः क्लृप्तभवाभिभूतिभिः ।
अचालि सण्डेरकगच्छसूरिभिः, प्रशान्तसूरैरथ शान्तिसूरिभिः ॥ १२
शरीरभासैव पराभवं स्मरः, स्मरन्ननश्यत् किल यस्य दूरतः ।
स वर्द्धमानाभिधसूरिशेखर-स्ततोऽचलद् गल्लकलोकभास्करः ॥ १३
सहस्रशीर्षोरगकल्पकीर्त्तयः सहस्रधामप्रतिमानतेजसः ।
सहस्रनेत्रप्रमुखामरस्तुताः, सहस्रशोऽन्येऽपि च सूरयोऽचलन् ॥ १४
चतुर्दिगापूरणभूरिनिःस्वन-श्चतुःसमुद्रान्तमहीतलागतः ।
ततश्चतुर्थव्रतनिश्चलोऽचल-चतुर्विधः सङ्घजनो यथाविधि ॥ १५

वितन्वतः **कासहृदा**ख्यपत्तने, महोत्सवं **नाभितनूजसद्म**नि ।
सहायतां प्रत्यश्रृणोन्महामते-रमुष्य दृग्वर्त्मनि देवताऽ**म्बिका** ॥ १६

अथास्य सङ्घस्य विसर्पतोऽग्रतः, शताङ्गचक्रोचितचीत्कृतस्वनः ।
नदन्महोक्षध्वनिवर्मितोऽपि सन्, हयालिहेषाभिरलाभि लाघवम् ॥ १७

पवित्रमेतत् तिलकाय नित्यशः, परस्परस्पर्द्धिभिरूर्ध्वमुत्सुकैः ।
तदा सदारैः समवापि दैवतैः, मुदैव तैः सङ्घविहारजं रजः ॥ १८

अभूत् तदा सङ्घपदाभिषङ्गत-स्तथा कथञ्चिद् विरजस्तमा मही ।
यथाधिरूढाऽपि शिरस्यहीशितु-श्चकार नो भारमुदारविग्रहा ॥ १९

विभेद्य लोभेन धवान् धवान्तरै-र्यया प्रपेदे प्रतिघातपातकम् ।
पवित्रिता सङ्घपदैर्दिवं ययौ, मही स्वदेहेन रजोमयेन सा ॥ २०

महानयं सङ्घजनोऽचलत् कथं, धरिष्यथ क्ष्मामिति जल्पितुं तदा ।
गतैः समीपं किल रेणुभिः ककुप्-करेणुभिर्मङ्क्षु मदो निराकृतः ॥ २१

रजस्तदा विस्तृतसङ्घसम्भवं, नभोनदीतीरगनीरगर्भितम् ।
इहापि गङ्गामृदलाभि दुर्लभे-त्यकर्षि सप्तर्षिभिराशु हर्षिभिः ॥ २२

द्विजेश्वरश्रीहतिपातकादिव, द्रुतं दिवः पातिभिरर्कभानुभिः ।
पवित्रसङ्घक्रमरेणुसङ्गमा-दसङ्गमूर्ध्वैव गतिः स्म तन्यते ॥ २३

विसर्पता सङ्घजनेन मेदिनी, पवित्रितौ प्रत्युपकारिणी ततः ।
उदस्य धूलीस्तपनातपं व्यधाद्, व्यधाच्च तूर्णं सुतरास्तरङ्गिणीः ॥ २४

चलाचलायां भुवि सङ्घसङ्गमात्, तदा तरन्त्यामिव धर्मवारिधौ ।
जगद्गुरोऽस्माकमवातरत्तरा-मिति स्म नृत्यन्ति मुदा महीभृतः ॥ २५

अथाघशल्यानि निरासितुं रया-द्नेन सङ्घेन परोपकारिणा ।
शताङ्गचक्रप्रधिलीलयाऽवनि-र्विदार्यमाणा सरवं व्यकम्पत ॥ २६

अमुष्य सङ्घस्य विलङ्घनक्रियां, वितन्वतोऽपि क्रमशौचकर्मठः ।
स्फुटस्फुरत्फेननिभेन भेजिवान्, शुचीनि पुण्यानि तरङ्गिणीगणः ॥ २७

क्रमक्रमस्थापितवारि-शर्करा-करम्ब-वालुङ्कविभूषितप्रपः ।
स्थितं गृहक्रोड इव प्रमोदिनं, निनाय मन्त्री जनमित्थमध्वनि ॥ २८

सृजन् जनः पूजनमुत्सवोत्सुकः, पुरे पुरे तीर्थकृतां कृताञ्जलिः ।
अलं व्यलङ्घिष्ट महीं महीयसी-मसीमसम्भावितभावनाद्भुतः ॥ २९

समीपसङ्केतनिकेतनं शिव-श्रियो वियन्मानसमुन्नतं ततः ।
पुरः पुरं धर्मनृपस्य पश्यति, स्मितः स्म **शत्रुञ्जयपर्वतं** जनः ॥ ३०

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अगण्यपुण्यैर्भवसिन्धुपारभू-रभूदयं लोचनगोचरो गिरिः ।
इति स्मेयस्मेरहृदो विदस्तदा, ससम्मदाश्चक्रुरहो ! महोत्सवम् ॥ ३१
गतोऽग्रतोऽस्मिन् दुरितैरनाविलो, विलोक्य **नाभेयनिकेत**केतनम् ।
जनस्तदा शर्मरसोर्मिविक्लवो, मदान्न किं किं रचयाञ्चकार सः ? ॥ ३२
ननर्त्त कश्चित् पृथुसम्मदस्तदा, सलीललोलायितपाणिपल्लवः ।
प्रतिप्रतीकं परितः कुतूहला-दलं यथाऽऽलोक्यत पुण्यसम्पदा ॥ ३३
बहूत्पतत्पादयुगस्तदाऽपरो, ननर्त्त दूरप्रसरत्करच्छदः ।
विधातुमुड्डीय नगाधिरोहणं, मनोरथी पत्त्रथीभवन्निव ॥ ३४
भवभ्रमिश्रान्ततुरः शिरोधरा-ऽधिरोपितं पापभरं त्यजन्निव ।
इलामिलन्मौलिरमन्दसम्मदो, ननाम विश्रामविधित्सया परः ॥ ३५
विलोकयन् कोऽपि वृषध्वजध्वजं, मुहुर्मुहुर्मङ्क्षु नमन्नमन्दधीः ।
उदञ्चित-न्यञ्चितमौलिलीलया, रराज मुक्तिश्रियमाह्वयन्निव ॥ ३६
अमुत्र **शत्रुञ्जयशैल**सन्निधौ, भवार्णवस्येव तटे तदा परः ।
निरीयितुं पातकजातकर्दमा-ल्लुलोठ सर्वाङ्गमुदारधीर्मुदा ॥ ३७
समुद्भवद्भावरसादचेतन-श्चिराय नृत्यादिविवेकवर्जितः ।
परः शिलापुत्रसमोऽपि बाष्पवा-नमोचि रिष्टैरपि रिष्टशङ्कितैः ॥ ३८
इहाथ पाथस्तृणराजिराजिते, जितेन्द्रियो मन्त्रिपतिर्महीतले ।
श्रमापनोदार्थमदापयत् तदा, निवासमासन्नममुष्य भूभृतः ॥ ३९
अथाव्रजत् खिन्नजलप्रमोदिनो, दिनोपतापे सचिवः स किङ्करान् ।
मरुत्वरान् प्रैषयदेष तत्क्षणं, शिखिच्छदच्छत्रविडम्बिताम्बुदान् ॥ ४०
सुवंशसंयोजितरूपशोभिता, विचित्रिता धातुरसेन सर्वतः ।
पदे पदे पर्वतपादसोदरा, वितेनिरे पीवरचीवरालयाः ॥ ४१
अनांसि धर्मक्षितिपस्य वप्रवत्, पदे पदे मण्डलितानि रेजिरे ।
तृणं द्विषत्पापमिवोदमूलयन्, यतो विनिस्सृत्य वृषा भटा इव ॥ ४२
गिरौ गतिं पश्यत नः कुतूहलात्, कथं वृथा मुञ्चत भूतले समे ? ।
इतीव चाटूक्तिकृतस्तृणं मुखे, वृषा व्यधुर्बभ्रति सारथौ पुरः ॥ ४३
नैयेन संङ्घस्य रसातलं यया, कथं समाकृष्यत साऽपि भिन्महे (?) ।
नवीनचुल्लीविवरापदेशतः, खनन्ति भूखण्डमिति स्म किङ्कराः ॥ ४४[1]

---

१ क-ख पुस्तके ४४ तमं काव्यं नास्ति ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रवृत्तनृत्ताः प्रचलोर्मिपाणिभिः, प्रणीतगीताः कमलास्थषट्पदैः ।
तदा व्यधुः स्वागतमागते जने, विदम्भमम्भःप्रसरेण सिन्धवः ॥ ४५
तदाऽन्नपाकाय विकाशितः शिखी, ज्वलन् बभौ सङ्घजने निवासिनि ।
भरानमद्भूमिभिदास्फुटस्फुर-त्फणीन्द्रचूडामणिरश्मिराशिवत् ॥ ४६
अथैष तीर्थङ्करदेवतालय-प्रक्लृप्तमध्यन्दिनपूजनो जनः ।
मुदा नमस्कृत्य गुरुक्रमद्वयं, प्रचक्रमे शाश्वतकृत्यकेलिषु ॥ ४७
अदायि दीनाय तदा धनं तथा, मनोरथातीतमनेन मन्त्रिणा ।
यथा परे निश्चयदायिनो जना, वनीपकानामपि चाटु चक्रिरे ॥ ४८
स्वयं स कस्मैचन मोदकादिकं, घृतादि कस्मैचन शुद्धवासनः ।
फलादि कस्मैचन साधवे ददत्, तदा विशश्राम न मन्त्रिशेखरः ॥ ४९
अकिञ्चनः कश्चन याचते क्वचित्, किमप्यहो ! शब्दमिति प्रदाप्य सः ।
चकार भोज्यादिकमात्मना कृती, तृतीययामक्षणपूरितेक्षणः ॥ ५०
अथ कृततनुकृत्यः कौतुकोत्तानचेता, जिनपदमनुसङ्घः क्लृप्तसङ्घट्टमागात् ।
इह महमहिमांशुर्द्रष्टुकामो निकामं, गगनगमनखिन्नः प्रत्यगद्रौ निषण्णः ॥ ५१

किञ्च—

पायं पायमहर्निशं रिपुयशःपीयूषपूरं भवान्,
कल्पायुः क्षितिकल्पवृक्ष ! भवताल्लक्ष्मीलतालिङ्गितः ।
श्री**सोमा**न्वयसोममौक्तिकमयैरेव प्रसूनैरिव,
त्वत्कीर्त्तिप्रकरैरपि त्रिभुवनं सौरभ्यमभ्यस्यतु ॥ १
मात्यमात्यवर ! नाम्बरे यशः, श्री**वसन्त** ! तव सन्ततस्मितम् ।
इत्यनन्यमहिमानमानशे, मानसाश्रयमहो ! महीयसाम् ॥ २
समुच्छ्रिताभिः खलु **वस्तुपाल**-प्रतापदीपाञ्जनमञ्जरीभिः ।
इहोपकण्ठस्थितिभाजि शङ्के, मालिन्यमुन्मीलितमुज्ज्वलेऽपि ॥ ३
श्री**वस्तुपाल**प्रथितप्रसादा-दासन् प्रमोदामृतवारयो याः ।
एतत्प्रबन्धच्छलतोऽ**रिसिंह**-स्ता एव मूर्त्ताः स्तबकीचकार ॥ ४
प्रतिसर्गं प्रबन्धेऽस्मिन्न**रिसिंह**विनिर्मिते । इमान्यकृत चत्वारि, काव्यान्य**मरपण्डितः** ॥ ५

॥ इति सुकृतसंकीर्त्तननाम्नि महाकाव्ये सङ्घप्रस्थानो नाम पञ्चमः सर्गः ॥ ५ ॥

१ ग-प्रफलो ॥ २ ग-समुत्थिता° ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जिनमहमहिमानं प्रत्यदीयन्त दूरा-देथ वलयितवृन्दं रासकाः श्राविकाभिः ।
तनुसदनविषण्णक्रूरकाकोलकाल-स्फुरितदुरितजालत्रासकृत्तारतालम् ॥ १
करकिशलयलीलालोलतालप्रणादो-ल्लसितलयविनोदानन्दनिर्मग्नचित्तः ।
जिनवदनविलोकव्यग्रदृग् भाविलोकः, प्रतिपदमभिरामं गीतमङ्गीचकार ॥ २
गतमदनमदानां भाविनामत्र भावा-न्तरितरसतरङ्गैरङ्ग ! चित्तं हरन्ती ।
लयविलुलितहारैरङ्गहारैर्मृदङ्ग-ध्वनिजनितविनोदं नर्तकी नृत्यति स्म ॥ ३
अशिथिलपदपातं प्रीतिपूर्णे जनेऽस्मिन्, नटति झटिति भेजे भूरियं भूरिकम्पम् ।
शिथिलककदम्बः प्रत्यगद्रेः पतित्वा, तदिव दिवसनाथः सिन्धुपाथस्यमज्जत् ॥ ४
पतितवति पतङ्गे रङ्गदुत्तुङ्गताप-व्यतिकरकृति सद्यः प्रीतिहृद्या इवाऽऽशाः ।
तुहिनमहसि कामं रन्तुमागन्तुकामे, खगकुलतुमुलेन भेजिरे कौतुकिन्यः ५
हरगलगरलाभं व्योम्नि काष्ठान्तराल-ज्वलदविरलसन्ध्यावह्निविध्यानहेतुः ।
शबलममलरत्नैरुत्पपातार्कतापा-ज्जलमिव जलराशेरन्धकारं सतारम् ॥ ६
विषमलिमिषमास्ये न्यस्य मूर्च्छामगच्छन्, परिमिलितदलालीचक्षुषः पद्मखण्डाः ।
प्रियसुहृदि गतेऽस्तं भास्वति ब्रह्मचर्य-व्रतमविरलशोकः कोकलोकश्च भेजे ॥ ७
स्वदिवसपरिवृत्तिज्ञानतः क्वापि यातः, प्रसरति रिपुरूपे ध्वान्तपूरेऽपि सूरः ।
अथ गुरुगिरिदुर्गान् प्राप्य भासस्तदीया, दिशि विदिशि बबन्धुर्बन्धुतामोषधीभिः ॥ ८
अतुहिनमहसेव स्वैरवैरप्ररोहा-दपगिरिगरीयःकुञ्जगुप्तेन मुक्ताः ।
अहह ! दहनदीप्ता दीपदम्भेन भेजु-र्दिशि तिमिरौघं भल्लयः शल्लयन्त्यः ॥ ९
प्रथमसमुदितेन्दुज्योतिपूर्णेयमुद्घा-टितविकटकपाटद्वारवत् पूर्वकाष्ठा ।
मुदमतनुत साक्षादन्धकारान्ध्यकारा-गृहकुहरगतस्यामुष्य विश्वस्य मुक्त्यै ॥ १०
द्युमणिमणिगणैर्यत्किञ्चिदप्यह्नि वह्नि-द्युतिततिभिरदाहि क्ष्मारुहादि क्षणेन ।
इह तदपि तदानीं जीव्यते स्म त्रियामा-रमणमणिसुधाभिः सर्वतः पर्वतेषु ॥ ११
अहनि दहनकीलाभैरवैः कैरविण्य-स्तरणिकिरणजालैर्मूर्च्छितातुच्छमूर्च्छाः ।
विधुरुचिमधुसेकैश्छेकलोलालिबाल-व्यजनपवनलीलावीजनैरप्यजीवन् ॥ १२
समदमदनभूभृन्नव्यसाचिव्यलब्धि-प्रगुणितगुणमब्धिर्नन्दनं चन्द्रमेनम् ।
तरलतरतरङ्गोत्तुङ्गदुत्तुङ्गबाहुः, परिचितपरिरम्भारम्भमभ्युत्पपात ॥ १३
उडुगणमिषमुक्तव्यक्तमुक्ताकलापं, गजदनुजमिवेन्दुर्ध्वान्तमुच्छिद्य सद्यः ।
हृदि तदजिनखण्डं लक्ष्मलक्षेण बिभ्रद्, व्यहरत हरमूर्तिर्मूर्ध्नि धात्रीधरस्य ॥ १४
भृशमुरसि कलङ्कच्छद्मना कालचित्रौ-षधिमधित निबद्धामोषधीनामधीशः ।
अपि पिबति चकोरीचक्रवाले कराले, तदिव न दिवि नेशुर्भासुरास्तस्य भासः ॥ १५

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विरहशिखिसमीरः कामनासीरवीर-स्तिमिरतरुकुठारः पूर्वदिक्तारहारः ।
गगनगजनिषादी कामिनीचक्रवादी, सितरुचिरुदितोऽयं वर्धयन् वार्धितोयम् ॥ १६
इभकुलमिभमल्लोद्भासि कैलासशैला-कृतिमकृत नगौघं शेषवच्छेषसर्पान् ।
रुचिरमृतमरीचेः सङ्घभर्तुर्यशःश्री-रिव धवलितविश्वा जाह्नवीं निह्नुवाना ॥ १७
वियदहनि वितेने स्वस्य विश्वस्य सङ्घ-क्रमसमुदितधूलीमण्डलैर्मण्डनं यत् ।
सुकृतमिदमिदानीं मूर्त्तमभ्युद्यदिन्दु-द्युतिनिभमिति लेभे भिन्नमालिन्यमालम् ॥ १८
चिरमुपचितहर्षः सङ्घलोकावलोका-दिव कृतसुकृतोऽयं व्योमचूडावलम्बी ।
सहजनिजकलङ्कन्यत्कृतिभ्राजमाना-कृतिरकृत न केषां विस्मयं शीतरश्मिः ॥ १९
निशि नियतमियत्यामप्यमुं सङ्घलोकं, कृतमहामिह भक्त्या जागरूकं विलोक्य ।
इयमधुनुत मौलिं विस्मिता व्योमलक्ष्मीः,कुसुममिव तदाऽस्मान् मन्दमभ्रश्यदिन्दुः ॥ २०
गिरिशिरसि जिनेशं नन्तुकामस्य मा स्या-महमहह ! महत्त्वादस्य यात्रान्तरायः ।
इति विसृमरभावभ्राजमानक्षणस्य, क्षणमपि न तमिस्रा सङ्घलोकस्य जाता ॥ २१
चलितसकलतारालोकमामुक्तसन्ध्या-दहनमिह विहायोमण्डलं द्राग् विहाय ।
सहजमहसि सूरे हन्तुमागन्तुकामे, परमपरमहीभृद्दुर्गमिन्दुर्गतोऽयम् ॥ २२
सजलजलदचारुर्वारुणीरागभाजः, क्षितितललुठितस्यामुष्य मुक्ताम्बरस्य ।
सुमरतिमिरवेषो यज्वनां भर्तुरेष, त्रिभुवनभवनान्तर्दुर्यशोराशिरासीत् ॥ २३
स्फुटघटितकलङ्को यज्वनामेष भर्त्ता, त्यजति करगृहीतामप्युषां भूरिभुक्ताम् ।
इति बत ! कुमुदिन्यः सारसौरभ्यलोभा-गतमधुपधवेषु व्यादधुर्बन्धसन्धाम् ॥ २४
हरिहरिति रथाङ्गानल्पसङ्कल्पकल्प-द्रुम इव दिवसेऽस्मिन्नुद्गमारम्भभाजि ।
जलधिसविधगुप्तादंशुमद्बिम्बबीजा-दुदयत मृदुतेजःकैतवादङ्कुरोऽयम् ॥ २५
पतितवति पयोधेरन्तरा हन्त ! रात्रि-प्रिययुवतिविभेदाद् दुःखभाजि द्विजेन्द्रे ।
द्विजततिरतितारं निर्ममे तारकाणां, पथि कलकलमुच्चैरुच्चरन्ती चिराय ॥ २६
भृशमुषसि तुषारस्यन्दसङ्काशतारा-वलिवलयितनीलध्वान्तदूर्वावणौघः ।
गगनपथविहारोच्छृङ्खलैरस्खद्भि-स्तरगिकरकिशोरैर्जग्रसे मुक्तमुक्तैः ॥ २७
भुजगजगति [1]भूतिं भोगिचूडामणीनां, भुवि भवनमणीनामम्बरे तारकाणाम् ।
सपदि विपदमेता निन्यिरे भू-र्भुवः-स्व-स्त्रयविवरविलासव्यापृता भानुभासः ॥ २८
मसृणघुसृणक्लृप्तश्चन्द्रलेखानुकारी, तिलक इव समुद्यन् प्राग्दिशः सूर्यलेशः ॥
अयमभजत जम्भारातिकुम्भीन्द्रकुम्भ-स्थलविलुलितलीलाशातकुम्भाङ्कुशाभाम् ॥ २९
जलनिधिजलमध्यात् तुङ्गशैलाग्रजाग्र-त्करपरिचयशक्त्या भानुरभ्युज्जगाम ।
सपदि विपदपेतं कान्तमेनं विलोक्य, प्रहसितमुखपद्मा पद्मिनी नृत्यति स्म ॥ ३०

१ ग-भूतिर्भो° ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अवतमसंततीनां मृत्युकालोऽपमृत्युः, कुवलयवलयानां जीवितं पङ्कजिन्याः ।
अलमकृत नभोऽङ्कं कोकलोकस्य सीता-विरहितहरिशापानुग्रहोऽयं ग्रहेशः ॥ ३१
दयितमिति पुरस्ताद् वीक्ष्य भानुं युवानं, हरिहरिति हरिद्रारागमागःप्रकोपात् ।
स्फुटकमलमुखेभ्यस्तेऽमोचि निःश्वासधूमा-वलिरलिनिकुरुम्बच्छद्मना पद्मिनीभिः ॥ ३२
अजनि गिरिनितम्बे बिम्बमर्कस्य धातु-च्छुरितमिव सरागं सूर्यकान्ताग्नितप्तम् ।
करजलपरिधौतं चुम्बितं चाम्बरेण, क्षणघटितसुवर्णादर्शवद् दिग्वधूनाम् ॥ ३३
सममसममयूखैर्भानुमन्तं लसन्तं, गिरिशिरसि विलोक्याऽऽलोकनीयप्रभावम् ।
स इव सचिवभर्त्ता सङ्घलोकेन साकं, विमलगिरिशिरोऽग्रं गन्तुमभ्युत्सुकोऽभूत् ॥ ३४
सद्यो जिनक्रमनमस्कृतिलोलसङ्घ-सङ्घट्टलोलवसुधातलसम्भ्रमेण ।
श्रीवस्तुपालगुणहृष्ट इवाचलोऽपि, शत्रुञ्जयः स्वयमकम्पयदेष मौलिम् ॥ ३५

किञ्च—

नित्यं त्वद्वदनारविन्दसदनं वाग्देवता सेवते,
त्वं पद्माश्रयभासुरोऽसि जयति त्रैलोक्यसूत्रं त्वयि ।
श्रीमच्चण्डपगोत्रमण्डन ! गुणैरेभिर्भवान् ब्रह्मणः,
साधर्म्यं वहति प्रियंवद ! मदाशीर्भिस्तदायुर्भव ॥ १
अलभत बत ! यस्मिन् सान्द्रदारिद्र्यपूर्णे, गृहपतिरवकाशं न प्रदोषक्षणेऽपि ।
वितरति सति वित्तं वस्तुपाले कवीना-मिह गृहकुहरान्तर्नैष रत्नाकुलेऽपि ॥ २
श्रीमन्त्रीश्वरवस्तुपाल ! भुजयोर्युग्मेन युद्धार्णवं,
तूर्णं निस्तरतोऽपि ते समभवन्न व्याकुलत्वं किल ।
यद्दूरादवगण्य निर्मलगुणं शङ्खं त्वया मौक्तिक-
स्तोमानामिव धैर्यधुर्य ! यशसां चक्रे महान् सङ्ग्रहः ॥ ३
श्रीवस्तुपालसचिवेन्द्रयशःप्रसून-माल्येऽरिसिंहकविना गुणगुम्फितेऽस्मिन् ।
कण्ठे सतां लुठति निर्मद्दुर्जनाली-वक्त्रप्रभाः कति न बिभ्रति भृङ्गभावम् ? ॥ ४
प्रतिसर्गं प्रबन्धेऽस्मिन्नरिसिंहविनिर्मिते । इमान्यकृत चत्वारि, काव्यान्यमरपण्डितः ॥ ५

॥ इति सुकृतसङ्कीर्त्तननाम्नि महाकाव्ये सूर्योदयवर्णनो नाम षष्ठः सर्गः ॥ ६ ॥

शैलमौलिगमनाय मनोऽश्वै-र्भ्राजमानमसमानविहारैः ।
प्रापदस्खलितमप्यसमेषु, द्राग् मनोरथरथं पथि सङ्घः ॥ १
भूरिधातुमयजङ्गमशृङ्ग-श्रेणिवद्विविधचीरविचित्रः ।
मन्दमन्दमथ सङ्घजनोऽसौ, सञ्चचाल गिरिराजतटेषु ॥ २
मञ्जुलः कनककुण्डलकान्तैः, स्त्रीमुखैः सरवि-सोमशताभैः ।
एकभानु-हिमभानुमनोज्ञं, मेरुमप्यजयदेष गिरीन्द्रः ॥ ३
अञ्चलैः शशिमुखीवसनानां, चञ्चलैः कटकसीमनि शैलः ।
सङ्घसङ्ग-सुकृतामृतसेका-दुद्भवत्प्रथमपक्ष इवाभात् ॥ ४
आन्तरेण नयनेन जिनेन्दो-राननेन्दुरुचिपानपराणाम् ।
अप्युदारगिरिशृङ्गविलासे, न श्रमः समजनिष्ट जनानाम् ॥ ५
नाम नामसुधया जिनभर्तुः, प्राप्तया जनमुखेषु न तृष्णा ।
दूरवर्त्तिनि मुखामृतकुण्डे, लोचनानि तृषितानि जनानाम् ॥ ६
प्राग्नियोजितमनोहततीर्था-धीशपादकमलाङ्कितमौलिः ।
शैलसानुषु जनो न तदानीं, तापमाप तपनांशुततिभ्यः ॥ ७
क्ष्मागतेन लघुकं यददर्शि, क्षोणिभृच्छिरसि तेन जनेन ।
उच्चकैर्विचरता ददृशे तत्, सङ्घसङ्गममदादिव पुष्टम् ॥ ८
देवभक्तिभरनिर्मितहस्ता-लम्बनव्यतिकरेण जनोऽयम् ।
आसदद् गिरिशिरांस्यतिहर्षा-न्मङ्क्षु सम्मुखमिवागतवन्ति ॥ ९
अद्भुतप्रमदशालिषु शैलः, शेखरस्थितिषु तेषु जनेषु ।
भूतिभर्त्सितसुरेषु स रेजे, मेरुवन्नवरविच्छविपिङ्गः ॥ १०
कर्मवैरिविजयाय सतेजा, **नाभिभू**पदनखांशुविचित्रम् ।
आरुरोह सचिवः शुचिदन्तं, दन्तिराजमिव तं गिरिराजम् ॥ ११
वीक्ष्य यक्षमिह सङ्घजनौघः, श्री**कपर्दिन**मथाब्धिरिवेन्दुम् ।
क्षुभ्यति स्म चतुरः स चतुर्धा, विस्तृतस्तरलहर्षतरङ्गः ॥ १२
अन्तरायदलनाय जनौघं, तीर्थसेवनकृतेऽभिपतन्तम् ।
द्रष्टुकाम इव वर्त्मनि दूरा-दारुरोह गुरुशैलशिलां यः ॥ १३
भावनासलिलशालिनि शश्वत्, तीर्थनाथपदपद्ममनोज्ञे ।
मानसे तनुमतां विलसन् यो, हंसवत् सृजति कामपि कान्तिम् ॥ १४
यक्षमुख्य ! स भवान् भुवनैक-त्राणकारणमकारणबन्धुः ।
वत्सलेव जननी जनमेनं, नाथ ! पालयतु बालमिव स्वम् ॥ १५

१. क–ख–°तटीषु ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

श्रीकपर्दिनमिति स्तुतिपूर्वं, यक्षराजमभिपूज्य सहर्षम् ।
आशु सङ्घपतिरेष ससङ्घस्तीर्थनाथनमनार्थमचालीत् ॥ १६
उत्सुकैरथ जनैर्जिनचैत्यं, वीक्ष्य मङ्क्षु पथि गामिव वत्सैः ।
व्यक्तशक्तिरभसत्रुटितोचैः-कर्मबन्धतरलं प्रदधावे ॥ १७
सञ्चरन् भुवि न माति जनो यः, स्फूर्तिसङ्कुचितमूर्तिलतोऽसौ ।
द्रष्टुमास्यनलिनं जिनभर्तु-श्चैत्यधाम्नि स ममौ सममेषः ॥ १८
दल्यमानमसमानविमर्दे, हृद् हृदा ननु मिथस्तनुभाजाम् ।
आत्मभङ्गभयभङ्गुरसत्त्वै-रन्तरारिभिरमोचि तदानीम् ॥ १९
पापपङ्कशमनाय जनानां, स्नानमन्तरकरोद् ध्रुवमात्मा ।
रोमवर्त्मसु जलेन विमर्दे, स्वेदपूरमिषतः प्रसृतं तत् ॥ २०
आबभौ घनघनाघनलक्ष्मी-रङ्गिनां प्रमदरोमविकारः ।
अन्तरस्थितजिनेन्दुरुचिश्री-निस्सरदुरिततामसतुल्यः ॥ २१
लोचनैस्तनुमतामिति खिन्नैः, प्राप्य जैनवदनामृतकुण्डम् ।
आशु क्लृप्तसवनैरिव रेजे, सम्मदेन विगलज्जललेशैः ॥ २२
तत्र तादृशि जनस्य विमर्दे, शक्यते भ्रमयितुं न करोऽपि ।
वीक्ष्य विश्वविभुमेनमनृत्यन्, भाविनो यदि मुदा मनसैव ॥ २३
स्वीयतादृशविमर्दसुदूर-क्षिप्तसूरकिरणः किल लोकः ।
रत्नभूषणविभिन्नतमिस्रो, भक्तिकृत्यमकृत प्रभुचैत्ये ॥ २४
धूलिधूम्रपद एव तदानी-मागतो जिनपतिं प्रणिपत्य ।
दूरपूरितमनोरथवेगः, स्तोतुमारभत मन्त्रिवरोऽसौ ॥ २५
त्वद्गुणान् गदितुमीश ! समग्रान्, न स्वयं सुरवरोऽपि समर्थः ।
गोचरोऽप्यसि न मादृशवाचां, मौनमेव हि तव स्तवहेतुः ॥ २६
त्वां निरर्थकगिराऽपि तथाऽपि, स्तौमि विश्वनुत ! मुग्धतयाऽहम् ।
प्रीतये निजशिशोः स्फुटलाला-म्भांसि लल्लरवचांसि गुरूणाम् ॥ २७
न क्षमोऽयमहितानपि हन्तुं, स्वं कुटुम्बकमयं च मुमोच ।
जल्पिता जिन ! परैरिति दोषाः, प्रत्युत स्तवनतां तव जग्मुः ॥ २८
भाषितं भुवनभूषण ! भित्त्वा, कर्म निर्ममपते ! भवतेदम् ।
श्रूयते त्वदभिधाऽपि कदाचिद्, यत्र तत्र न करोति निवासम् ॥ २९
नाऽऽप्नुवन्ति भवबन्धनिकेता-दग्रतस्तव गतस्य पदं ये ।
भ्रम्यते भ्रमवशाज्जिन ! मुक्त्यै, तैर्वृथैव पृथिवीवलयान्तः ॥ ३०

Jain Education International For Private & Personal Use Only www.jainelibrary.org

त्वं मनोभवमपास्य पुनस्त-जन्मभीरुरमुचः स्वमनोऽपि ।
किं हरन्तु हरिणीतरलाक्ष्य-स्तावकं तदमनस्ककिरीट ! ॥ ३१
प्राप्य रत्नमिव पुण्यपयोधे-स्त्वां हृदि प्रणिदधाति जनो यः ।
स प्रयाति पुरुषोत्तमभावं, पश्य न स्वपिति किन्तु भवाब्धौ ॥ ३२
यामवाप्य न नमामि भवन्तं, तां न निर्वृतिमपि स्पृहयामि ।
त्वत्प्रसादवशतस्त्वयि भक्ति-र्भातु मे जिन ! भवेऽपि भवेऽपि ॥ ३३
निर्मितस्तुतिरिति प्रतियातः, कृत्स्नमेष सुकृती कृतशौचः ।
स्नानहेतुकलशान् घुसृणाम्भः-पूरितानयमचीचलदिन्द्रैः ॥ ३४
श्रावकाः प्रतिपदं हृदयाग्र-न्यस्तहस्तधृतकाञ्चनकुम्भाः ।
निस्तरीतुमिव संसृतिसिन्धुं, कुर्वते स्म निरपायमुपायम् ॥ ३५
शुद्रसङ्घपतिकीर्तिलतानां, विष्टपत्रितयगर्भगतानाम् ।
आतपत्रपटली विमलश्री-रादिकन्दवदियं विरराज ॥ ३६
अत्युदारतरनर्त्तनगीतै-रुत्सवेन महता प्रहताघः ।
प्राप मन्त्रितिलकः किल कर्म-ध्वंसिनो जिनपतेरथ चैत्यम् ॥ ३७
कुङ्कुमाम्बुभिरसिस्नपदीशं, श्रावकैः सह यथाविधि मन्त्री ।
तैर्विधौततनुरेष तदाऽभूत्, पर्वतो **विमल** इत्युचिताह्वः ॥ ३८
अङ्गमण्डनमखण्डनमासी-न्निर्मितं मृगमदैर्जिनभर्तुः ।
क्लृप्तसन्नहनसन्निभमुच्चैः, कर्मकूटरिपुकोटिजयाय ॥ ३९
भूरिपुष्परचिता जिनभर्तु-र्लम्बिताः कृतिभिरर्चनमालाः ।
अप्रभूष्णव इव स्मरमुक्ता, मल्लयो वपुषि भूषणमासन् ॥ ४०
तैस्तथा जिनपुरस्तिमिरोर्मि-र्निर्ममेऽथ पृथुधूपजधूमैः ।
सस्पृहेव सचिवं सुकृतश्रीः, कौतुकादभिससार यथाऽसौ ॥ ४१
आरात्रिकं कृतमथ **प्रथमस्य तीर्थ-भर्तुः** पुरः स्फुरदुरुद्युतिचक्रवालम् ।
उच्चावचप्रसरणैर्निजघान सङ्घ-दोषद्विषः कुसुमवृष्टिविराजमानम् ॥ ४२
इत्थं प्रेक्षणकक्षणाहितमनाः सम्पूज्य विश्वत्रयी-
पूज्यं **नाभिसुतं** समाप्य च तथारूपामिहाष्टाहिकाम् ।
मन्त्रीशः प्रतिलाभितव्रतिततिः **शत्रुञ्जयो**र्वीधरा-
दुत्तीर्णः कृतमङ्गलः समजनि श्री**नेमि**सेवोत्सुकः ॥ ४३

किञ्च—

शौर्यैर्वज्रधरस्य दैत्य-मरुतामाचार्ययोः प्रज्ञया,
दानैर्देवगवी-मणि-क्षितिरुहां स्वर्गश्रियं गर्वितः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एकेनैव विभूषणेन भवता श्रीवस्तुपाल ! क्षिति-
स्त्वं निर्जित्य मुदा तवाऽऽशिषमदादेवं मेदायुर्भव ॥ १

कल्पान्तोद्भ्रान्तभास्वत्करनिकरनिभो विश्वमन्तः समन्तात्,
सन्तापस्त्वत्प्रतापज्वलदनलभवः केन शक्येत सोढुम् ? ।
मन्त्रिन् श्रीवस्तुपाल ! त्रिजगति यदि ते कीर्त्तिलेखेव न स्या-
दन्तःपीयूषपेया बहिरपि च मुहुश्चन्दनोद्वर्त्तनानि ॥ २

भासि दौस्थ्यतरुखण्डखण्डनै-र्वस्तुपाल ! भुवि दानिकुञ्जरः ।
चित्रमत्र किमु शङ्खमर्दनं, यत् त्वया क्रमणलीलया कृतम् ॥ ३

काव्यमेतदरिसिंहनिर्मितं, सर्वतोमुखतयैव रङ्गभूः ।
वस्तुपालसचिवेन्द्रकीर्त्तिभि-र्नर्त्तकीभिरिव यत्र नृत्यते ॥ ४

प्रतिसर्गं प्रबन्धेऽस्मिन्नरिसिंहविनिर्मिते । इमान्यकृत चत्वारि, काव्यान्यमरपण्डितः ॥ ५

॥ इति सुकृतसङ्कीर्त्तननाम्नि महाकाव्ये शत्रुञ्जयदर्शनो नाम सप्तमः सर्गः ॥ ७ ॥

सचिवः समं सपदि सद्धजनै-रथ देवपत्तनमगान्नगरम् ।
प्रणनाम कामजयिनं नयन-प्रियमिन्दुलाञ्छनमिहोग्रमहाः ॥ १

विधुमौलिमौलिविधुधामभरै-रिह मे भविष्यति सदाऽभ्युदयः ।
इति पाथसाममुमत्र पतिं, कृतवासमैक्षत स मन्त्रिपतिः ॥ २

इह सोमनाथमुकुटोल्लसितैः, सरिदम्बुभिर्विधुविभाभिरपि ।
सततप्रवृद्धविहरल्लहरी-निवहध्वनिध्वनितदिग्वलयम् ॥ ३

सततान्तरालशयविष्णुवपु-र्विभवद्भिभाभिरिव मेचकितम् ।
उदयत्तदीयशयनीयफणि-स्फुटरश्मिराशिनिभफेनधरम् ॥ ४

सलिलेन विश्ववलयप्रलयः, समये मयैव रचनीय इति ।
मुहुरीरितापहृतवीचिभरै-र्जनयन्तमन्वहमिहाभ्यसनम् ॥ ५

पुरुषोत्तमो हृदि मदीयसुतं, शिरसीश्वरोऽपि विदधाति सदा ।
प्रमदादुदारतरगर्जमिव, प्रकटं नटन्तमिव वीचिकरैः ॥ ६

अयि वज्रमाजि कुपिते द्युपतौ, कृतरक्षणं क्षितिभृतामभितः ।
स्फुरितोर्मिबाहुमिति कीर्तितती-र्जगति क्षिपन्तमिव फेनमिषात् ॥ ७

१ ग-महायुर्भव ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अकृशैः कृशैश्च नवशुक्तिफल-प्रकरैर्विभान्तमभितः शुचिभिः ।
शिशुभिर्निजैः शशिभिरङ्कधृतै-रिव भाविभूरितरकल्पकृते ॥ ८

द्युमणिः क्षपामणिरपि प्रभया, मयि मुच्यते जयति कोऽयमिह ।
इति विस्मयादपरवारिधिना, सचिवोऽप्यनन्यसदृशो ददृशे ॥ ९

अथ कम्बुचिह्नशुचिरम्बुनिधिः, स्फुरितेन्द्रनीलमणिनीलरुचिः ।
रभसादसस्मरदमात्यपते-र्नमनाय **नेमिजिन**मात्मगुणैः ॥ १०

अथ सञ्चलन्नचल**रैवतकं**, पुरतः स्फुरत्पवनलोललतम् ।
सचिवो ददर्श शुचिसङ्घसमा-गमनप्रवृत्तमदनृत्यमिव ॥ ११

वनवल्लयो गुरुतयाऽस्य गिरेः, शिखरान्तराललिलितोडुगणाः ।
विबभुर्भृशं सविध**नेमि**विधु-प्रभवप्रभावसततप्रसवाः ॥ १२

गिरिरेष सिन्धुतनिकानिकरै-र्वितनोति धर्मनृपतिस्थुलताम् ।
कलशश्रियं शिरसि यस्य दधौ, गगनापगाध्वजिनि **नेमिजिनः** ॥ १३

न तथा व्यराजदुडुशुक्तिफलै-स्तरणीन्दुकुण्डलयुगेन न च ।
शुशुभे **समुद्रविजया**ङ्गभव-प्रभुमौलिनीलमणिनैव यथा ॥ १४

अवलोक्य धूपमयधूमततिं, जिनधाममूर्धनि पयोदधिया ।
इह चातकैः स्मितमुखैर्मुमुदे, वियदापगालहरिसीकरतः ॥ १५

कटकस्थकाननकलापिकुलं, घनकाल एव मुदमुद्वहते ।
इह **नेमिमन्दिर**मृदङ्गरवै-रनिशं शिरोवनविलासि पुनः ॥ १६

इति वर्णयन्नयमनूननयः, सचिवः शिवश्रिय इवाऽऽश्रयभूः ।
कृतसन्निवासरचनः सुचिरं, गिरिदर्शनोत्सवविधिं व्यधित ॥ १७

कृतकृत्य एव समये शयितः, क्षणदाक्षयक्षणविबोधशुचिः ।
प्रणिपत्य **नेमि**नमयं मनसा, सचिवो मनोरथमिति व्यदधात् ॥ १८

जनये जिन ! स्मितमनाः स्नपनं, भवदीयदर्शनसुधाजलधौ ।
भवदावपावकभुवोऽभिभवन्, विपदः कदाऽहमपदाहवपुः ? ॥ १९

भुवनाधिपातिभवदाहभिदे, भवदङ्घ्रियुग्ममहमाप्तमहः ।
निदधामि मूर्ध्नि नलिनाभमथ, प्रलयैकदारुण ! कदाऽरुणितम् ? ॥ २०

भवकाननान्तरविहारभवां, भवदाननेन्दुरुचिपानरुचिः ।
विषमां तृषं परिहरामि चिरा-च्चपलश्चकोर इव देव कदा ? ॥ २१

विकटं नयामि शिखिवच्छिरसि, स्वकरौ कलापिकलया कलयन् ।
अवलोक्य वारिदमिवाशु कदा, शुकदारदीप्तिभवदीयवपुः ? ॥ २२

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नयनाग्रवर्त्मनि परिस्फुरतीं, दुरितान्धकारपटलीं विकटाम् ।
दलयन्ति मे त्रिजगदीश ! कदा भवदीयपादनखदीपशिखाः ? ।। २३
भुवनैकनाथ ! भवदीयवपु-र्विपुलप्रभापयसि मग्नमपि ।
द्वितयं कदा नयनयोरिह मां, हिमहारतारगुण ! तारयति ।। २४
तदपीयत श्रुतिपुटेन यशः, सततं विषण्णदिविषन्नदि ते ।
भवदङ्गदीप्तिममुना यमुना-जयिनीं धयामि नयनेन कदा ? ।। २५
नलिनादिपुष्पनिवहेन सुरै-र्यदपूजि पादयुगमीश ! तव ।
जिन ! तेन पङ्कजनिभेन कदा, जनयामि पूजितमिवाऽऽत्मशिरः ।। २६
इति गद्गदाश्रुपुलकाकुलितः, कलयन् मनोरथमनन्यमनाः ।
सचिवः **शिवातनय**मात्तनयः, क्षणमेकमैक्षत पुरोगमिव ।। २७
अथ कल्पिताखिलविभातविधि-र्गिरिमारुरोह सह-सङ्घजनैः ।
सचिवो जिनक्रमनखेषु पुरो-गमितेन कृष्ट इव मङ्क्षु हृदा ।। २८
तदनु प्रमोदरभसेन रजः-प्लुतपाद एव विननाम जिनम् ।
अपि चैष नेत्रगमिताक्षगण-प्रसरक्षणं निभृतमीक्षितवान् ।। २९
रचिताङ्गशौचविधिरिन्द्रगणैः, सहितो जिनस्नपनहेतुरथ ।
जिनभक्तिरागमिव मूर्त्तमसौ, कलशेषु कुङ्कुमजलं न्यदधात् ।। ३०
अथ केऽपि भक्तिभरभासुरिताः, स्फुरिता जिनस्य पुरतः परितः ।
स्वयमुत्सवं विदधिरे मधुर-ध्वनिगीतिरीतिमयवाद्यलयम् ।। ३१
वदनाग्रभागगतपाणियुग-स्थितभेरिदण्डमिषदन्तकरः ।
शुशुभे करीन्द्र इव मन्द्ररवः, किल कोऽपि पापतरुपातपटुः ।। ३२
अपरः पयोदरववादभव-न्निनदं मृदङ्गमपि वादितवान् ।
ननृते दरद्दुरितभोगिशतैः, कृतिनां मनोमयमयूरकुलैः ।। ३३
अपरस्य वंशमपि वादयतो, मधुरस्वरैः प्रमदिनां कृतिनाम् ।
यदमीलि पक्ष्मपुटकेन रसात्, तदवेशि कर्ण इव नेत्रमृगैः ।। ३४
अपरः पिबन्नपि **शिवातनुभू**-वदनेन्दुदीधितिसुधां स्थिरदृक् ।
भृशमुज्जगार जनयन् जनता-हृदि सम्मदं ललितगीतमिषात् ।। ३५
चटुला नटी सरसनृत्तवशा-दिह रत्नभूषणशुभा शुशुभे ।
कुलदेवतेव तडितां तरला, जलदद्युतेर्जिनपतेः पुरतः ।। ३६
इति सम्मदेन जिनमस्नपयद्, घुसृणाम्बुभिः क्षितिपतिः स तथा ।
कपिशो यथाऽयमपि **रैवतकः** किल देवताद्रिसदृशो ददृशे ।। ३७

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्वहृदः प्रमोदविशदस्य रसात्, परमाणुभिः पुर इव प्रसृतैः ।
सचिवेन सारघनसाररसै-र्नवमङ्गमण्डनमकारि विभोः ॥ ३८

कुसुमायुधस्य कुसुमानि मना-गपि सम्मुखानि नहि यत्र ययुः ।
इह तानि तीर्थकृति सङ्घटयन्, स बभौ कृती मदनतोऽप्यधिकः ॥ ३९

यमुनौघसङ्गमधिया सचिव-प्रथितेऽथ धूपमयधूमभरे ।
प्रमदेन तत्क्षणमकारि नभः-सरिदम्बुनि द्युमुनिभिः सवनम् ॥ ४०

अथ तामसं कवलितं चलिता-ञ्जनकैतवेन भृशमुद्गिरता ।
नवदीपिकापरिकरेण चिरं, निरराज यज्जिनमयं सचिवः ॥ ४१

स्फुटमष्टकर्ममथनोऽयमिति, प्रथयन्निहाष्टदिवसानि महम् ।
स्वयमष्टमूर्तिमुकुटेन्दुसमं, सचिवोऽष्टसु न्यधित दिक्षु यशः ॥ ४२

सचिवस्य दास इव शब्दजितो, जलवाह एष गिरिमूर्ध्नि वहन् ।
न ववर्ष सङ्घजनतार्त्तिभयात्, त्रुटितान्यपूरि सलिलानि पुनः ॥ ४३

देयाः स्वामिन्! पुनर्मे सुकृतपुरपुरोढौकनानीति जल्प-
न्नानन्दस्पन्दसारैरिव घटितमना **नेमिनाथं** प्रणम्य ।
नामं नामं निकामं विधिवदविधुरं मन्त्रिमान्योऽयम**म्बा-**
शाम्ब-प्रद्युम्नमुख्यानपि पुलकिवपुः पर्वतादुत्ततार ॥ ४४

किञ्च—

स्वस्ति श्रीदेवलोकादमरपरिवृढः क्ष्मातले श्रीविशालं,
मन्त्रीशं **वस्तुपालं** कुशलयति यथा जीव! कल्पान्तकोटीः ।
लीनास्त्वत्कीर्तिगाने यदसुरविसरा न स्मरन्त्येव वैरं,
स्वैरं वाऽमी स्मरन्तु त्वदरिभिरभवन् दुर्जया मे ध्वजिन्यः ॥ १

चञ्चत्काञ्चनकूटकोटिघटितक्रीडाचलैर्याचक—
स्तोमैः प्रस्तुत**वस्तुपाल**सचिवप्राप्तार्थसार्थस्मितैः ।
अस्त्येषां किमु नाम धामनि कियद् दास्यन्त्यमी याचिताः?,
मत्वैवं न ययाचिरे बत! परे कल्पद्रुकल्पा जनाः ॥ २

उच्चरणचारचारुस्तव खङ्गः किमपि सुरभसारम्भः ।
श्री**वस्तुपाल**! जगति, व्यजयत **सङ्ग्रामसिंह**ममुम् ॥ ३

लावण्यसिंहतनयाननसोमरश्मि-स्तोमं खलास्यकमलालिकलापहारी ।
श्री**वस्तुपाल**सचिवाधिपकीर्तिदुग्ध-सिन्धुं तरङ्गयति नित्यमयं प्रबन्धः ॥ ४

प्रतिसर्गं प्रबन्धेऽस्मि**न्नरिसिंह**विनिर्मिते । इमान्यकृत चत्वारि, काव्यान्य**मरपण्डितः** ॥ ५

॥ इति सुकृतसंकीर्त्तननाम्नि महाकाव्ये श्रीनेमिदर्शनो नामाष्टमः सर्गः ॥ ८ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथ गिरीशतटीषु मनीषिणां, परिवृढः परिपूर्णमनोरथः ।
षडपि तत्र ददर्श ऋतून् कला-शुचिरयं चिरयन्त्रितविभ्रमान् ॥ १

प्रकटितायसकर्त्तरिका मधौ, मधुसखस्य भटा इव किंशुकाः ।
भ्रमरसङ्गसितेतरविस्फुरत्-सुमनसो मनसो ददते मुदम् ॥ २

इदमभूद् दलयन् नलिनीः प्रियाः, मम महःपरिखण्डनहेतवे ।
इति हिमस्य भिदामहिमद्युतिः, स्म तनुते तनुतेजितविष्टपः ॥ ३

स्मरशिखी तनुमानिव चम्पकः, कुसुमितो मधुपावलिधूमितः ।
दहति काननसीमनि काञ्चन-च्छविरहो ! विरहोषितयोषितः ॥ ४

स्मितसरोजमुखीमुखवासना-सुरभिमद्यविशेषितसौरभम् ।
परिहृतापरवल्लिमधुव्रती-धवकुलं बकुलं प्रति धावति ॥ ५

सुमनसां त्वमसि स्थितिभूस्त्वया, जयति विश्वमसौ कुसुमायुधः ।
मधुमितीह रसालरसालसा, पिकवयः कवयः कवयन्त्यमी ॥ ६

स्मरनृपस्य चरत्वमुपागता, द्विजचया मधुरध्वनिशालिनः !
मधुलिहः सुमनस्सु ददुः पदं, तिलकजालकजातविभूतयः ॥ ७

दधुरनङ्गनिषङ्गतुलामधो-मुखशिलीमुखराजिविराजिताः ।
स्फुटविकाशमुखाः कमलाकराः, न पथि कं पथिकं प्रति प्रीतये ॥ ८

स्तुतगुणं कुतुकेन मधुव्रतै-रिव रवाकुलितैः सुमनोमयम् ।
मधुसखाय मधोर्विनियोगतः, शरचयं रचयन्तितमां लताः ॥ ९

व्यथयति प्रथितारुणतेजसो, दहनमन्त्रमयादिव शश्वतः ।
मधुसखोऽयमशोकलतालसत्-कुसुमतोऽसुमतो विरहातुरान् ॥ १०

मलयजद्रुमसङ्गिभुजङ्गम-स्फुरितफूत्कृतिसम्भ्रमसम्भृतः ।
पथिकलोलदृशां मलयानिलः, सुविषमो विषमोहमिव व्यधात् ॥ ११

कमलकोमलकोशकुचोन्नते-रलिकलालिकलासितसम्पदः ।
व्रततिकाव्रतिकायवनश्रियो-ऽधिकमशोकमशोभत पाणिवत् ॥ १२

कमलकान्तिहरीं कृशतां नयन्, सह हिमाद्रिहिमेन विभावरीम् ।
कमलबन्धुकृतोन्नमनो बभौ, शुचिरयं चिरयन् दिवसश्रियम् ॥ १३

द्रुतसमेतदिनाधिपतिप्रभा-परिगलद्गतशेषतमीकणाः ।
अनिललोलशिरीषरजच्छलाद्, द्विरदनीलरुचो बभुः ॥ १४

अहमिहारुणधाम्नि सितेतरो, बत ! विभाम्यथवाऽत्र सितच्छवौ ।
भ्रमति भृङ्गयुवा नवपाटले, विचकिले च किलेति मुहुर्मुहुः ॥ १५

---

१ ग–पथिकलोकदृ°

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तरलतारलतागृहपङ्कज-च्छदनचन्दनचन्द्रमरीचिभिः ।
तपनतापनताकृतिरप्यसौ, रतिवरोऽतिवरोरुषु जृम्भते ॥ १६
नभसि दर्पणतुल्यतडिल्लता, जलदपद्धतिरुद्धतडम्बरा ।
मदनसैन्यगजव्रजवद् बभौ, कृतरवा तरवारिसितेतरा ॥ १७
वियदमीमिलदर्क-निशाकर-द्वयमये नयने भयतो भृशम् ।
यदतुलां तडितं घनमालिका-धिकरवा करवालमिवाक्षिपत् ॥ १८
यदयमेतदवाप्य तपस्विनां, हृदि हतोऽपि जिजीव मनोभवः ।
अपि भुजङ्गभुजां शुशुभे सुधा-कवचनं वचनं शिखिनां ततः ॥ १९
मदभिवर्धितसिन्धुमहीरुह-व्रजविशोषकमेतदिति क्रुधा ।
अधिककर्ममहः सहसा घनैः, कवलितं वलितं तडितां मिषात् ॥ २०
अपरता परतापककण्टिका-हतककेतककेलिषु षट्पदी ।
अमलकोमलकोरकसौरभ-स्थितिषु जातिषु जातरसाऽभवत् ॥ २१
अलकलोलमधुव्रतमञ्जुलाऽ-म्बुजमुखी जघनोज्ज्वलसैकता ।
शरदि हंसरवेण समाश्रिता, धृतरसा तरसा तटिनीवधूः ॥ २२
क्वचन भर्तरि याति तपात्यये, घनघटाश्रुजलानि मुमोच न ।
विरहवद् दधती तपनं व्यथा-प्रदममन्दममङ्गलशङ्कया ॥ युग्मम् ॥ २३
पदमधत्त गतस्य पयोमुचः, सुहृदशून्यमसौ शिखिनां गणः ।
गलितपत्रमयातपवारणैरविभवं विभवं महसां क्षिपन् ॥ २४
समुदिते मुदितेऽम्बुरुहि प्रिये कुलवये वलये सरितां तथा ।
अभृत सम्भृतसम्पदमर्यमा-च्छविमलं विमलं च विधुर्महः ॥ २५
खररुचेर्विजयाय निजद्विषः, सहसि साहसिकीव विभावरी ।
प्रतिदिनं परितः परिवर्धितो-त्तमहिमा महिमानमुपाययौ ॥ २६
तुहिनमन्दतरां मलिनेऽब्जिनी-मलिनि मुञ्चति रागपरामपि ।
करणिकाभिरहो ! शतपत्रिकाः, सह सितं हसितं परितन्वते ॥ २७
पदमकारि मुखे सुदृशां सदा, विमलकान्तिनि कुङ्कुममण्डिते ।
हिमरुचः कमलस्य च सम्पदा, हिमनिकामनिकारविनुन्नया ॥ २८
तुहिनवाहिनवाद्भुतवातभी-रुचितकुञ्चितकुङ्कुमकैतवात् ।
वरतनूरतनूष्मणि भास्वरा-तपततिः पतति स्तनमण्डले ॥ २९
हिमभरस्य तपःप्रथितोन्नते-र्वनमहीरुह एव भुजो भृशम् ।
निजरिपोरपि निर्गमनोद्यमं, दिनकरो न करोति कथञ्चन ॥ ३०

१ क–ख अभि भु° ॥ २ एतत्पद्यं क–ख पुस्तकयोर्नास्ति ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पुलककम्पितसूक्तिभिः परि-ष्वजनकर्म दिशन् हरिणीदृशाम् ।
हिममयः पवनो ननु कामिना-ममितकामितकारणतां ययौ ॥ ३१

पथिककाननलग्नमनोभव-ज्वलनसम्भवधूमभरोपमम् ।
नवलवङ्गरजः पवनाहृतं, जगति रङ्गति रङ्गितषट्पदम् ॥ ३२

दिनमयं नमयन् सहसा कृत-स्मरजनी रजनीः परिवर्धयन् ।
विरहितारहितासु सुखोर्मिका-रसमयः समयः शिशिरो भृशम् ॥ ३३

सततकुसुमितान्नृतूनशेषा-निति समकालमिहावलोक्य मन्त्री ।
अधुनुत विदितप्रभुप्रभावा-तिशयविचारचमत्कृतः किरीटम् ॥ ३४

शैलेऽस्मिन् पुरुहूतपौरमिथुनैर्मन्त्रीशनिर्मापित-
श्रीमन्नेमिजिनेश्वरोत्सवभवत्कौतूहलाकारितैः ।
रन्तुं नित्यषडर्तुभूतिविभवद्वल्लीभवल्लीलया,
सानन्दैरतिमन्दनन्दनवनीमुक्तस्पृहैः संस्पृहे ॥ ३५

कुसुमावचायमनसां श्रवणे, सुरयोषितामथ सरोजजुषि ।
कुसुमादुपेत्य निभृतध्वनयो, दधतीव भेदमलिनो मलिनाः ॥ ३६

वयमेव शस्त्रपदवीं गमिता, मदनेन सम्प्रति किमेभिरिति ।
अवचिन्वते स्म कुसुमानि तदा, रमणैः समं सुरकुरङ्गदृशः ॥ ३७

नववृक्षमूर्ध्नि यदकारि तप-स्तपनातपेन धृतरागभरैः ।
तरुणीकरग्रहणपुण्यफलं, नवपल्लवैरिदमलाभि ततः ॥ ३८

नवपल्लवा निजविभूतिहृतो, वनवर्तिनः स्फुटमशोकजुषः ।
परिकम्पिनो हठवशादरुणै-स्तरुणीकरैर्बिभिदिरे रभसात् ॥ ३९

कुसुमार्पणेषु रमणः सुदृशा, प्रथितेऽन्यनाम्नि लघुतां गमितः ।
हृदयात् तदात्वतरलेन सह, श्वसितेन तूलवदकर्षि बहिः ॥ ४०

ददता प्रसूनमपराभिधया, दयितेन वज्रनिभयाऽभिहते ।
हृदि मानिनी ननु विधाय दृशं, सजलामवागतनुत श्वसितम् ॥ ४१

उदितं प्रियेण निभृतं चतुरा, परगोत्रमश्रुतवती च रहः ।
तदुरस्थपुष्परजसि श्वसितं, व्यधिताद्यमश्रु च तदुद्वयने ॥ ४२

सृजता स्रजं शिरसि पद्मदृशो, मृदु चुम्बता प्रियतमेन परा ।
अपि शेमुषीश्लथतया न रसाद्, ददृशे परा न तयाऽपि रुषा ॥ ४३

सकलस्वकीयकुसुमस्वहृति-प्रतिपन्थिनीः प्रति भृशं सुदृशः ।
अमुचन् शीलिमुखशतानि लताः, समभूषयन्नहह ! तान्यपि ताः ॥ ४४

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथ काननान्तरविहारभव-श्रमखेदभेदरभसेन ययुः ।
दयितैः समं मृगदृशोऽम्बुनिधि-प्रतिहस्तकं सवनहेतु सरः ॥ ४५

तरुणीसमागमवशेन जवात्, किल पल्वलोऽजनि मुदा द्विगुणः ।
विलसत्तरङ्गकरकोटिरयं, तिरयन् निजाः कमलिनीदयिताः ॥ ४६

अतिदूरतः सरभसं रसभाक्, समुपेत्य लोलविषयव्यसनः ।
कुचयोर्विलुठ्य सुदृशां विलयं, प्रययौ तरङ्गनिकरः सपदि ॥ ४७

दयितेषु तोयजवनेषु गते, रभसेन यत्र कलहंसकुले ।
सरसी रराज सुदृशां वदनैः, कुचमण्डलैरपि च फेनभरैः ॥ ४८

हरिणीदृशां कलितरागभरं, कुचसङ्गमेन परिवृद्धरसम् ।
ब्रुडदम्बुजन्मकपटेन सरः, परिमीलयत्यतिसुखीव दृशः ॥ ४९

अवलोक्य कोऽपि रभसेन जनं, विपरीतलोचनमुदाररसः ।
हरिणीदृशा श्रुतिसरोजकृता-ननचुम्बनव्यतिकरो हसितः ॥ ५०

अभिसेचनेन नयनप्रसृति-प्रसरत्कटाक्षरसतोऽनुपति ।
अपरा सखीं प्रति करप्रसृति-च्युतनीरशून्यजलकेलिरभूत् ॥ ५१

द्रुतमुद्धृतेऽम्बुजमिति प्रकटे, ब्रुडितस्य वारिणि करे कमितुः ।
विदितस्य वीक्ष्य मुखमस्य नवा, रमणी न किं किमकृत त्रपया ? ॥ ५२

ईदृक्केलिरसप्रसन्नमनसः स्वर्गौकसो भास्करे,
यातेऽप्यम्बुनिधिं सरःकुमुदिनीबोधप्रबुद्धक्षपाः ।
श्रीमन्त्रीश्वर**वस्तुपाल**यशसा शुभ्रे सदैवाम्बर-
क्रोडे वैभवपिष्टविष्टपतमःस्तोमेन जग्मुर्दिवम् ॥ ५३

किञ्च—

आस्ते यावदखर्वपर्वतघटा गुर्वीयमुर्वी भृशं,
तावन्नन्दतु **वस्तुपाल** ! जगतीपुण्यैरगण्यैर्भवान् ।
येनैतां भुजगाधिपस्तव भुजे विन्यस्य नागाङ्गना-
गोष्ठीगीतभवद्यशःश्रुतिरसैराचान्तचित्तोऽभवत् ॥ १

आजन्मापि कृशाकृतिं द्विजपतिं स्वे मूर्धनि स्वर्धुनी-
धौते धारयते जगत्पतिरसावग्र्यो गुणग्राहिणाम् ।
सद्यः सङ्गतमप्यमुं वसुभरैः पुण्णाति पूषा शिरो-
भूषा दानवतामुभावपि शुभावेतौ **वसन्ते** गुणौ ॥ २

Jain Education International For Private & Personal Use Only www.jainelibrary.org

श्रीवस्तुपाल ! रणभाजि भवत्कृपाणे, धाराधरेऽपि परवारणविभ्रमेऽस्मिन् ।
उत्पन्न कोपतरलं सहसा जगाम, **खड्गग्रामसिंह** इति स स्वयमेव भङ्गम् ॥ ३

वस्तुपालसुकृतामृतप्रपा, काव्यमूर्तिर**रिसिंह**सूत्रिता ।
कण्ठदघ्नरसपायिनः शिरः, कम्पयन्ति किल यत्र कोविदाः ॥ ४

प्रतिसर्गं प्रबन्धेऽस्मि**न्नरिसिंह**विनिर्मिते । इमान्यकृत चत्वारि, काव्या**न्यमरपण्डितः** ॥ ५

॥ इति सुकृतसङ्कीर्त्तननाम्नि महाकाव्ये षड्ऋतुवर्णनो नाम नवमः सर्गः ॥ ९ ॥

तदनु वदनकान्तिन्यत्कृतेन्दुः कृतीन्दुः, समुदितमदपात्रं पूर्णयात्राभिलाषः ।
इह विहितनिवासः काशसङ्काशकीर्तिः, कृशिततिततकर्मा निर्ममे सङ्घभोज्यम् ॥ १

मलयजमयमम्भः पादयोरुत्तमाङ्गे, घनमथ घनसारं चीवरं चारु चाङ्गे ।
यश इव निजमीदृग्रूपमारोप्य तेन, स्मयरसमुपनीताः साधवोऽगाधबोधाः ॥ २

सन्नं यन्न तदापि रत्नकनकस्तोमैरतुच्छाशये,
तस्मिन् यच्छति वाञ्छताधिकतरं दीनेषु दूरादपि ।
मन्येऽपूरि ततो गभीरिमजितो रत्नानि रत्नाकर-
स्तस्य स्थैर्यनिराकृतश्च करदो हेमानि हेमाचलः ॥ ३

किं सूते कर एव हेमनिकरं श्री**नेमि**भक्तिक्रिया-
तुष्टे **रैवतका**धिदैवतकुलैः किं वा निधिः पूर्यते ? ।
इत्थं याचकसञ्चयस्य किमपि स्वस्यापि वाञ्छाधिकं,
तस्मिन् यच्छति खेचरेष्वपि चमत्कारश्चकार स्थितिम् ॥ ४

तदानीं दीनौघे मुहुरपि गृहीत्वा बहुतरं, स्वयं निर्विण्णेऽस्मिन् ददयमनिर्विण्णहृदयः ।
अहो ! किञ्चित् कोऽपि क्वचिदपि न याचेत वचनं, चिरादुच्चार्येदं **धवलकपुरे** गन्तुमुदितः ॥ ५

दुष्कर्माद्रिपविः पवित्रमहिमा नास्यां कदाचिन्महा-
मोहध्वान्तरविः प्रविक्ष्यति भृशं सङ्घो महोत्साहवान् ।
इत्थं पापलिपिं विलुप्य करणे भालोपमे **वामन-
स्थल्याः** पुण्यदिनं चकार सुकृती कुर्वन् प्रवेशोत्सवम् ॥ ६

कर्पूरागुरुधूपधूमपटलैरुत्क्षिप्यमाणैः प्रति-
ग्रामं तीर्थकृतामनेन कृतिना ये जज्ञिरे वारिदाः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तैरेव त्रुटिते जले पथि तथा प्रेम्णैव वृष्टं यथा,
संपूर्णानि सरोवराणि न पुनः सिक्तोऽपि मार्गोऽनसाम् ॥ ७

स्वस्थानप्रसृतस्वबल्लभजनप्राग्भारसद्यःपरी-रम्भारम्भपुरःप्रसृत्वरमनोवेगावकृष्टैरिव ।
साकं सज्जनैः समुज्झिततमोभारैस्तदौत्सुक्यतो, गच्छद्भिर्धवलक्ककाभिधपुरोपान्तं प्रपेदे कृती ॥ ८

स्मेरत्काश्मीरनीरच्छुरितपथतया रागमासाद्य सद्यो,
लीलालोलत्पताकाञ्चलतरलचमत्कारिचञ्चत्कटाक्षा ।
जातक्षोभा पुरीयं सविपुलपुलकाकीर्णदूर्वाङ्कुराग्रैः,
प्राप्ते श्री**वस्तुपाले** सति सचिवशचीवल्लभे वल्लभेऽस्मिन् ॥ ९

इयं सर्वाङ्गीणप्रगुणितविभूषा किल तदा, तदाश्लेषं यावत् क्षणमिव पुरी भासुररसा ।
अभूदन्तःशून्या हृदय इव याते पुरजनैः, समं श्रीमन्त्रीशं प्रति सरभसं **वीरधवले** ॥ १०

श्री**वीरधवल-तेजःपाला**भिधसचिवमध्यगः सचिवः ।
त्रिपुरुषरीतिस्थापितहर इव हरति स्म तत्र मनः ॥ ११

भास्वन्निःस्वानभेरीमुरजभरजनिध्वानसन्तापभीति-
भ्रष्टाहङ्कारदेवीकृतरभसपरीरम्भसंरम्भहृष्टैः ।
शक्राद्यैर्देवचक्रैरपि सचिवपतिः स्तूयमानस्तदानीं,
प्रारेभेऽसौ प्रवेशं पुरि पुलकिवपुःपौरदृक्पीयमानः ॥ १२

अथ पृथुकमतुच्छैरेतदुत्सङ्गयन्त-स्त्रिभुवनमपि शब्दैरब्दसंवावदूकैः ।
